Digitized by Arya Samaj Foundation Chennai and eGangotri

D01059

कुन्तापसूक्तसौरभम्

जगन्नाथो वेदालङ्कारः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय [illegible]

गुरुकुल कांगड़ी विश्वविद्यालय, [illegible]

वर्ग संख्या........ आगत [illegible]......

पुस्तक वितरण की तिथि [illegible] दिन तक यह पुस्तक पुस्तकालय में [illegible] आ जानी चाहिए। अन्यथा [illegible] पैसे के हिसाब से [illegible] दण्ड देय होगा।

पुस्तकालय विभाग

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

D 04052

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुन्तापसूक्तसौरभम्

410,25
4052

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

D04052

कुन्तापसूक्तसौरभम्

[अथर्ववेदीयसूक्तानाम् आध्यात्मिकभाष्यम्]

(२०.१२७-१३६)

गुरुकुल कांगड़ी पुस्तकालय

भाष्यकारः
जगन्नाथो वेदालङ्कारः

प्रकाशकः
गुरुगङ्गेश्वर-चतुर्वेदप्रकाशनसंस्थानम्
श्रौतमुनिनिवासः, गांधीमार्गः
वृन्दावनम् (मथुरा), उत्तरप्रदेशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुगङ्गेश्वर-चतुर्वेदप्रकाशनसंस्थानम्
श्रौतमुनिनिवासः, गांधीमार्गः
वृन्दावनम् (मथुरा), उत्तरप्रदेशः

सर्वाधिकाराः भाष्यकारेण प्रकाशकेन च स्वायत्तीकृताः

प्रथमसंस्करणम्—११०० पुस्तकानि

मूल्यम् : २५ रूप्यकाणि

मुद्रकः
श्री वेदव्रतो वेदालङ्कारः
रायसीना प्रिंटरी, ४ चमेलियन रोड
दिल्ली-११०००६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

410,25
4052



वेदोद्धारकः स्वामी दयानन्दसरस्वती

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—ओ३म्—

उपोद्घातः

विदितमेव वेदितव्यविदां विदुषां यदस्माभिः कतिचिद्वर्षपूर्वं चतुर्णामपि वेदानां महामहिमानुरूपम्, परिशुद्धम्, हृद्यानवद्यम्, बृहदाकारमेकखण्डात्मकम्, नयनाभिरामम्, मनोरममभूतपूर्वम्, परमपावनसंस्करणं कारयित्वा स्वदेशे विदेशेषु च शतशः मन्दिरेषु, ग्रन्थालयविश्वविद्यालयेषु प्रशस्तप्रतिष्ठानेषु च सस्वरपाठपूर्वकम्, वेदरहस्यबोधनपुरस्सरञ्च यथाबिधि प्रतिष्ठापितम् ।

ततोऽस्माभिर्वेदानां ब्राह्मणारण्यकादीनाञ्च सुबोधप्रामाणिकभाष्य-प्रणयनयोजनाऽऽयोज्यत । तत्पूर्तये चास्मदीय-चतुर्वेदप्रकाशनसंस्थाने श्रौतमुनि-निवासे, वृन्दावने वेदपारावारपारदृश्वानः अधोलिखिताः पञ्च विपश्चिद्विदांसो न्ययुज्यन्त ।

१. स्वामी श्रीसुरजनदासः, साहित्यव्याकरणवेदान्तसाङ्ख्ययोगाचार्यः, जोधपुरविश्वविद्यालयस्य सेवानिवृत्तसंस्कृतविभागाध्यक्षः ।

२. महामहिमोपाध्यायः श्रीनवलकिशोरकाङ्करः, जयपुरविश्वविद्यालयस्य सेवानिवृत्तसंस्कृतविभागाध्यक्षः ।

३. पण्डितप्रकाण्डश्रीजगन्नाथवेदालङ्कारः, पाण्डिचेरीस्थश्रीअरविन्दा-श्रमस्यान्ताराष्ट्रियशिक्षाकेन्द्रस्य संस्कृतविभागाध्यक्षः ।

४. वाराणसेयविद्वद्वरश्रीमहेशदत्तशुक्लः शास्त्री ।

५. वाराणसेयपण्डितप्रवरश्रीगोविन्दनरहरिवैजापुरकरः न्यायवेदान्तसाहि-त्याचार्यः ।

तत्रादौ, अथर्ववेदस्य कस्यापि उत्तमभाष्यस्य अनुपलब्धत्वात् तद्भाष्यकार्यं श्रीनवलकिशोर-श्रीजगन्नाथ-श्रीमहेशदत्त-श्रीगोविन्दनरहरिषु व्यभज्यत । तत्र श्री जगन्नाथवेदालङ्कारो नो न्यवेदयत् यत् कर्मकाण्डीयव्याख्याने नास्ति मे श्रद्धा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भास्था वा, अतश्च न स्यान्मे तत्र बुद्धिप्रसरः। ततः स्मिताननैरस्माभिः सोऽथर्ववेदस्य विंशकाण्डान्तर्गतकुन्तापसूक्तानां श्रीअरविन्ददृशाध्यात्मिकभाष्यप्रणयनार्थं प्रेरितः सहर्षं तदङ्गचकार्षीत्।

तदेवमस्मत्प्रेरणायाः पुण्यफलमिदं 'कुन्तापसूक्तसौरभम्' नामाध्यात्मिकव्याख्यानम्। एतच्चास्माभिराद्युपान्तं सावहितं श्रोत्रपुटेन पीतम्। तदेतत् "सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः। स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।" इति सुप्रसिद्धं भाष्यलक्षणमनुवर्तते, क्लिष्टस्थलव्याख्यानं च वेदस्य मन्त्रान्तराधारेण, श्रुतेरन्तःसाक्ष्येणैव करोतीत्यस्य विलक्षणवैशिष्टचम्। न दृष्टं मया कुन्तपानामीदृग् विस्तृतं हृदयङ्गमं च भाष्यान्तरम्। एतदर्थं भाष्यकाराः परमप्रशस्तिं धन्यवादराशिञ्चार्हन्ति भूरिशः।

इदं 'कुन्तापसूक्तसौरभम्' नाम पुस्तकं दिल्लीनगरवास्तव्येन विद्यालङ्कारोपाधिधारिणा परमवेदप्रियेण श्रीमनोहरेण मम प्रेरणया प्रकाशितम्। अतस्तस्मै भृशमाशीर्वादाः प्रदीयन्ते यत्तस्य वेदेषु प्रीतिर्भूयोभूयः प्रकर्षमाप्नुयात्।

वेददर्शनाचार्यमहामण्डलेश्वराः
स्वामिगङ्गेश्वरानन्दोदासीनाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—ओ३म् —

प्रास्ताविकम्

अथ कुन्तापसूक्तव्याख्यानं प्रस्तूयते । कानि खलु तानि कुन्तापसूक्तानि ? अथर्ववेदस्य शौनकसंहिताया हस्तलिखितपुस्तकेषु विंशकांडस्य सप्तविंशत्यधिकशत (१२७) तमसूक्तादारभ्य षट्त्रिंशदुत्तरशत (१३६) तमसूक्तान्तस्य सूक्तदशकस्य आदौ 'अथ कुन्तापसूक्तानि' अन्ते च 'इति कुन्तापसूक्तानि' इत्येवं समुल्लेखाद् इमानि कुन्तापपदाभिधेयानि इति स्पष्टं विज्ञायते । किञ्च 'ऋग्वेदपरिशिष्ट'नामकग्रन्थस्य कुन्तापाध्याये अथर्व० २०. १२९-१३२तमसूक्तात्मकस्य 'ऐतश'प्रलापस्य षट् पदानि, २०.१३४ तमसूक्तस्य मन्त्रद्वयम्, २०-१३६तमसूक्तस्य अष्ट मन्त्रांश्च विहाय अन्ये सर्वेऽपि कुन्तापमन्त्राः समुपलभ्यन्ते । तेषां कृते 'कुन्ताप'शब्दप्रयोगश्च शाङ्खायनश्रौतसूत्रे (१२.१३७), शाङ्खायनब्राह्मणे (३०.५), आश्वलायनश्रौतसूत्रे (८.३.७), वैतानश्रौतसूत्रे (अ० ६ क० २ [३२] सू० १९), गोपथब्राह्मणे (उ० प्र० ६ क० १२) चापि परिलक्ष्यते ।

अथैषां 'कुन्ताप' पदाभिधेयत्वे किं निमित्तम् ? कुं पृथ्वीं, पार्थिवविकारान् पापतापदुःखदोषदुरितादिकान् इत्यर्थः, तापयन्ति दहन्ति इति कुन्तापानि च तानि सूक्तानि मन्त्रसमुदायाश्चेति कुन्तापसूक्तानि । यद्वा, कु कुत्सितमात्रं पापताप-दुरितदुर्गुणादिकम्, 'पापकुत्सेषदर्थे कु' इत्यमरः (३.२४०), तत् तापयन्ति दहन्ति इति तथाविधानि सूक्तानि । कर्मण्यणि उपपदस्य मुमागमश्छान्दसः ।

गोपथब्राह्मणकारास्तावदेवं निब्रुवन्ति पदमिदम्—'कुयं ह वै नाम कुत्सितं भवति तद्यत्तपति तस्मात् कुन्तापाः, तत् कुन्तापानां कुन्तापत्वम् । तप्यन्तेऽस्मै कुयानीति तप्तकुयः स्वर्गे लोके प्रतितिष्ठति' । (गो० ब्रा० उ० २. ६. १२) ।

तत्र कुयोपपदात् तप्धातोः 'कर्मण्यण्' इत्यणि, उपधावृद्धौ, उपपदसमासे, कुयशब्दस्य छान्दसे यलोपे मुमागमे च 'कुन्ताप'पदं सिध्यतीति बोध्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ 'कुय'शब्दः कु कुत्सितां योनिं याति प्रापयतीति व्युत्पत्त्या पापबोधकः। एवञ्च कुन्तापमन्त्राः पापतापकाः, पापतापापहर्तार इति पर्यवस्यति।

ईदृशामेषां त्रितापहारिसूक्तानां सायणभाष्यं तावद् विलुप्तमिति अनुमीयतेऽनुपलम्भात्। ऐतरेयब्राह्मणे च एषु केषाञ्चिदेव व्याख्यानं दृश्यते न सर्वेषाम्, तदपि च न गूढ़मर्मप्रकाशकं परितोषकरं वा। श्रीक्षेमकरणदासत्रिवेदिनामथर्वभाष्ये उपलभ्यमाना तेषां संस्कृतहिन्दीव्याख्या च न सर्वत्र हृदयग्राहिणी वेदगौरवविवर्धिनी वा। अथ राष्ट्रभाषायां हिन्द्यां श्रीराजारामशास्त्रिचतुर्वेदभाष्यकारजयदेवविद्यालङ्कार-महामहोपाध्यायश्रीसातवलेकरविद्यामार्तण्ड-श्रीपण्डितविश्वनाथविद्यामार्तण्डादिविद्वद्वरैरेषां व्याख्या विहिताः, परं तेषु श्रीराजारामशास्त्रिभिः १३३, १३६तमसूक्ते, श्रीसातवलेकरमहोदयैश्च १३५-१३६तमसूक्ते न व्याख्याते दुरूहत्वात्। परममीषामिमा व्याख्या अतिसंक्षिप्ततयाऽनेकत्र स्वीयसम्पूर्णतात्पर्यं न समर्पयन्ति।

रॉथ-ग्रिफिथ-ह्विटनीप्रभृतयः पाश्चात्त्यभाष्यकारास्तावदिमानि सूक्तानि निरर्थकानि, असम्बद्धप्रलपितानि अश्लीलानि चाहुः। एतत्सर्वं समीक्ष्य वेदमूर्तिवेददर्शनाचार्यमहामण्डलेश्वरश्रीस्वामिगङ्गेश्वरानन्दोदासीनैस्तेषां भूरिभावोन्मेषविजम्भितं, विविधपक्षप्रदर्शनसमलङ्कृतं, सुबोधं विशदञ्च समन्वयभाष्यं विरचय्य सद्यः प्राकाश्यमानायि।

१९७४तमवर्षे तैरेव प्रेरितोऽहमेषां वेदगुह्यार्थदर्शि-महर्षिश्रीअरविन्दयोगदृष्टिसमुन्मेषिताऽऽध्यात्मिकभाष्यप्रणयनार्थम्। तस्याः सत्प्रेरणायाः पुण्यफलमिदं प्रस्तुतं भाष्यम्। तदेतत् सदसद्व्यक्तिहेतवः सन्तः सम्यगालोच्य समनुग्रहीतुमर्हन्ति मां स्वीयसन्निर्देशैर्येनास्य नूतनसंस्करणप्रकाशने तेषां सदुपयोगो विधीयेत।

जगन्नाथो वेदालङ्कारः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—ओ३म्—

भूमिका

अथर्ववेदगतानां कुन्तापसूक्तानामाध्यात्मिकं व्याख्यानं "कुन्तापसूक्त-सौरभम्" इति नाम्नि स्वसन्दर्भे पण्डितवर्येण श्रीजगन्नाथवेदालङ्कार-महोदयेन संस्कृतगिरोपनिबद्धमवलोक्याहं मुहुर्मुहुः प्रसीदामि। कुन्ताप-सूक्तानां मन्त्राणां प्रतिपदं व्याख्यानम्, तेषामध्यात्मपरांश्च गूढाभिप्रायान् प्रदर्शयित्रा ग्रन्थकर्त्रा स्वीयमतिगम्भीरं वेदज्ञानं द्योतितम्। मन्त्राणां त्रिविधं व्याख्यानं प्राक्तनाचार्यैः स्वीकृतम्। तदवलम्ब्य ग्रन्थकर्त्राध्यात्मिकार्था अतिसूक्ष्मदृष्ट्या कुन्तापसूक्तानां विवृताः।

'वेदानां मुख्योऽर्थ आध्यात्मिकः, परमार्थपरः, व्यावहारिकश्चार्थः गौणः' इति महर्षिणा दयानन्देनापि ऋग्वेदभाष्यभूमिकायामपि प्रतिपादितम्। ऋग्वेदेनाप्ययमेव भावः "यस्तं न वेद किमृचा करिष्यति" (ऋ. १.१६४.३९) इति मन्त्रचरणेनोद्घोषितः। उपनिषदप्येतमेव भावं पुष्णाति। यथा,

सर्वे वेदा यत्पदमामनन्ति, तपांसि सर्वाणि च यद् वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति, तत् ते पदं संग्रहेण ब्रवीम्योमित्येतत्॥
(कठोप० २.१५)

अतः कुन्तापसूक्तमन्त्राणामाध्यात्मिकं व्याख्यानं कृतवन्तं श्रीपण्डित-जगन्नाथविद्वांसमहं मुक्तकण्ठेन प्रशंसामि।

अस्मिन्नेव प्रसङ्गेऽहमेतत् सूचयामि यदिमानि कुन्तापसूक्तानि अथर्ववेदस्य "गोपथब्राह्मणे" व्याख्यातानि, तच्छ्रौतसूत्रेषु च विविधकर्मसु विनियुक्तानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्ति, तथापि महर्षिदयानन्देन कुन्तापसूक्तानि अथर्ववेदे प्रक्षिप्तानि मतानि। अथर्ववेदस्यानुक्रमणीकारस्याप्येतानि सूक्तानि "खिलानि" इत्यभिमतम्। तथाप्येतानि यतः अध्यात्मसुभाषितान्यतः ग्राह्याण्येवाथर्ववेदपरिशिष्टरूपेण, न च तदङ्गरूपेण इति ममाभिमतम्।

श्रीमहामहिमोपाध्यायः
पण्डितविश्वनाथविद्यामार्तण्डः
२४.६.१९८३ ६१ कांवलीमार्गदेहरादूनवास्तव्यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमणी

	पृष्ठाङ्कः
उपोद्घातः	......
प्रास्ताविकम्	......
भूमिका	......
सूक्तम् १२७	१-१२
सूक्तम् १२८	१३-३२
सूक्तम् १२९	३३-४०
सूक्तम् १३०	४१-४७
सूक्तम् १३१	४८-५३
सूक्तम् १३२	५४-६१
सूक्तम् १३३	६२-६८
सूक्तम् १३४	६९-७४
सूक्तम् १३५	७५-१००
सूक्तम् १३६	१०१-१५३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्रानुक्रमणी

मन्त्राः	पृष्ठसङ्ख्याः	मन्त्राः	पृष्ठसङ्ख्याः
अकुप्यन्तः	४२	आय वनेनती	५०
अजागार	३८	इदं जना उप	१
अत्यर्धर्च	५२	इदं मह्यं	५१
अथो इयन्निति	४६	इन्द्रः कारु०	१६
अथोश्वा	४६	इरावेदुमयं	४६
अथो इयन्नियन्निति	४६	इह गावः	१०
अदूहमित्यां	५२	इहेत्थ प्रागपागुदगधराग्	
अनामयोप०	३८	—अक्षिलली	७३
अप्रपाणा च	२४	,, —अराला०	६९
अभीव स्वः	६	,, — आष्टे	७२
अयन्महा ते	३६	,, —वत्साः	७०
अरदुपरम	५२	,, — स वै पृथु	७१
अरंगरो वावदीति	६९	,, —स्थालीपाको	७१
अलाबुकं निखातकम	५४	उग्रं वनिषदाततम्	५५
अलाबूनि पृषातका०	८०	उत श्वेत	६०
अव श्लक्ष्णमिव	६८	उत्तानायै शयानायै	६५
अश्वत्थ खदिरो	५१	उप नरं	११
अश्वस्य वारो	३८	उयं यकांश	४६
अहलकुश	५०	उष्ट्रा यस्य	२
आदलाबुकमेककम्	५४	एतं पृच्छ	४१
आदित्या रुद्रा	६१	एता अश्वा	३३
आदित्या ह	८८	एनश्चिपङ्क्तिका	४५
आमणको	४२	एष इषाय	४
आ मिनोनिति	४८	क एषां कर्करी	५६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्राः	पृष्ठसङ्ख्याः	मन्त्राः	पृष्ठसङ्ख्याः
क एषां दुन्दुभिं		परिवृक्ता च	२५
कतरत् त आ	८	पर्यागारं	५६
कर्करिको	५४	पल्प बद्ध	६७
कः काष्र्याः	४१	पाक बलिः	५१
कुलायं	५४	पुमां कुस्ते	३७
कुहाकं पक्वकं	४१	पृदाकवः	३५
को अर्जुन्याः	४१	पृष्ठं धावन्तं	३०
को अर्य	४१	प्रतीपं प्राति	३३
को असिद्याः	४१	प्रदुद्रुदो	४५
कोशबिले रजनि	७८	प्र रेभ धियं	६
क्वाहतं परास्यः	३५	प्र रेभासो मनीषा	५
तद्वात उन्मथायति	५४	बद्ध वो	३६
तस्य अनु	४८	भुगित्यभिगतः	७६
तासामेका	३४	मातुष्टे किरणौ	६३
तां ह जरितर्नः	८९	मा त्वाभि	४५
ते वृक्षाः	५१	मेमा इन्द्र	११
त्रीण्युष्ट्रस्य	६०	महानग्नी कृकवाकं	१२९
त्वमिन्द्र कपोताय	९६	महानग्नी महानग्नं	१३३
त्वमिन्द्र शर्म	६५	महानग्न्यतृप्नद्वि	११३
त्वं वृषाक्षं	२८	महानग्न्युप . . . यथा	१२२
देव त्वप्रतिसूर्य	४२	महानग्न्युप . . . यथैव	११९
देवा ददत्वा	६४	महानग्न्युप . . . स्वस्त्या	१२४
देवी हनत्	५६	महानग्न्युलूखल०	११७
दौव हस्तिनो	५२	महान् वै भद्रो बिल्वो	१४५
द्वौ वा ये	६०	य आक्ताक्षः	२३
न वनिषदाततम्	५५	यः कुमारी पिङ्गलिका	१४८
निगृह्य कर्णकौ	६४	यः पर्वतान्	२९
नीलशिखण्डवाहनः	६०	यः सभेयो विद०	१३
पत्नी यद् दृश्यते	८६	यत्रामूस्तिस्रः	३५
परिक्षिन्नः	७	यदल्पिका	११०
परि त्रयः	३५	यदस्या अंहु०	१०१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्राः	पृष्ठसङ्ख्याः
यदा स्थूलेन	१०४
यदिन्द्रादो	२८
यदीयं हनत्	५६
यद् देवासो	१११
यद् भद्रस्य	१५
यवा नो यति	४२
यश्च पणि	१५
युक्त्वा श्वेता	३१
ये च देवा अय०	१८
यो जाम्या अमेथ०	१४
योऽनाक्ताक्षो	२१
राज्ञो विश्वजनीनस्य	७
वच्यस्व रेभ	५
वनिष्ठा नाव	५१
वरुणो याति	४८
वशा दुग्धामिमाङ्गुरि	१३६
वशायाः पुत्रमा	४५
वावाता च	२७
वितती किरणौ	६२

मन्त्राः	पृष्ठसङ्ख्याः
विदेवस्त्वा महा०	१४२
वीमे देवा	८३
व्याप पूरुषः	५२
शक बलिः	५१
शतमाश्वा	४६
शतं वा भारती	४६
शफेन इव	५०
शयो हत इव	५२
शृङ्ग उत्पन्न	४५
शृङ्ग धमन्त	३५
श्येनीपती सा	३८
श्लक्ष्णायां	६६
स इच्छकं	३६
स घाघते	३६
साधुं पुत्रं	३४
सुदेवस्त्वा महा०	१३८
सुप्रपाणा च	२५
हरिक्निके	३४
हिरण्य इत्येके	६०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

अथ कुन्तापसूक्तानि[1]

अथर्ववेदः २०-१२७

तिस्रो नाराशंस्यः । अतः परं त्रिंशद् ऋच इन्द्रगाथाः ।

इदं जना उप श्रुत नराशंस स्तविष्यते ।
षष्टिं सहस्रा नवतिं च कौरम आ रुशमेषु दद्महे ॥ १ ॥

'जनाः' हे मनुष्याः ! 'इदम् उप श्रुत' इदं वक्ष्यमाणं वचः सादरं, सावहितं शृणुत । 'नराशंस' नरस्य नरोत्तमस्य, देवस्य पुरुषोत्तमस्य आशंसः स्तुतिः 'स्तविष्यते' उपक्रान्ता भविष्यति, कीर्तयिष्यते । अथवा, 'नराशंस' नरेषु प्रजासु आशंसः स्तुतिर्यस्य देवस्य स देवः पुरुषोत्तमः 'स्तविष्यते' कीर्तयिष्यते वर्णयिष्यते वा । 'कौरम' कौ पृथिव्यां रमते सृष्टिक्रीडां लीलां वा करोतीति तथाभूत ! यद्वा, कौ पृथिव्यां रमयति आनन्दयति जीवान् स्वलीलयेति तथोक्त देवाधिदेव ! 'रुशमेषु' रुशन्ति हिंसन्ति, विनाशयन्ति दहन्ति वा इन्द्रियमलानि, दोषदुरितानि पापानि चेति रुशमानि नाडीचक्राणि निगृहीतप्राणानि, यद्वा, रुशन्ति हिंसन्ति इति रुशः साधनायाः प्रतिबन्धका अन्तरायाः तान् मिन्वन्ति प्रक्षिपन्ति, निरस्यन्तीति तथोक्तानि प्राणायामविशुद्धानि नाडीचक्राणि तेषु मध्ये, तथा चाह मनुः—

दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः ।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥ (६.७१)

तेषु निरुद्धप्राणेषु नाडीचक्रेषु मध्ये वयं 'षष्टिं सहस्रा नवतिं च' नवत्यधिकषष्टिसहस्रसंख्यका नाडीः, सहस्रशब्दोऽत्र बहुत्ववाची असंख्यातवचनो वा, असंख्याता नाडीरित्यर्थः 'आ दद्महे' प्रतिगृह्णीमः, प्राणायामसाधनाया आधारत्वेन आश्रयामः, प्राणनियमनपूर्वकं सुषुम्णायां तव साक्षात्कारसिद्धये हे कौरम पृथिव्युपलक्षितलोकलोकान्तरलीलारसिक !

प्राणायामपरायणस्य साधकस्य नाडीनाम् आत्मपरमात्मप्राप्त्युपकारकत्वं च श्रुत्या अवसीयते । तथा चाम्नातं प्रश्नोपनिषदि—

हृदि ह्येष आत्मा । अत्रैतदेकशतं नाडीनां तासां शतं शतमेकैकस्यां

---

१. कुं पृथिवीं, पार्थिवविकारान् पापतापदुःखदोषदुरितादिकान् इत्यर्थः तापयन्ति दहन्ति इति कुन्तापानि च तानि सूक्तानि मन्त्रसमुदायाश्चेति कुन्तापसूक्तानि । यद्वा, कु कुत्सितमात्रम् पापतापदुरितदुर्गुणादिकम्, 'पापकुत्सेषदर्थे कु' इत्यमरः (३.२४०) तत् तापयन्ति दहन्ति इति तथाविधानि सूक्तानि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वासप्ततिर्द्वासप्ततिः प्रतिशाखानाडीसहस्राणि भवन्त्यासु व्यानश्चरति ॥
अथैकयोर्ध्व उदानः पुण्येन पुण्यं लोकं नयति ।...३.६-७
अथापि कठोपनिषदि—
शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥ २.३.१६
अलमतिप्रपञ्चेन स्वानुभवैकवेद्यत्वाद् विषयस्य ।

उष्ट्रा यस्य प्रवाहिणो वधूमन्तो द्विर्दश ।
वर्ष्मा रथस्य नि जिहीडते दिव ईषमाणा उपस्पृशः ॥ २ ॥

'यस्य' यस्य नराशंसस्य पुरुषोत्तमस्य 'द्विर्दश' द्विरावृत्ता दश विंशतिरित्यर्थः 'उष्ट्राः' ओषन्ति दहन्ति समूलाम् अविद्यां प्राणशक्तिविकारान् वा इति तथोक्ताः समूलाविद्याविदाहिकाः प्राणशक्तिविकारविनाशिका वा शक्तयः, यद्वा, उष दाहे इत्यस्माद् भावे क्विपि 'उष्'शब्दो निष्पाद्यः । उषः दाहात् आध्यात्मिकाधिभौतिकाधिदैविकत्रितापात्, दुःखदावानलात् त्रायन्ते इति तास्तथाभूताः शक्तयः 'वधूमन्तः' वैरिवधविधायिन्यः, साधकानां साधनाध्वनः सकलविघ्नबाधासमूलोच्छेदिकाः 'प्रवाहिणः' प्रकृष्टं प्रशस्तं स्थानं पदं वा वहन्ति प्रापयन्तीति तथाभूताः परमपदप्रापिकाः सन्ति इति शेषः । 'यस्य रथस्य' यस्य पुरुषोत्तमस्य सम्बन्धिनो रथस्य, रंहति इति रथः (रंहतिर्गतिकर्मा, निघ. २.१४), यद्वा, रङ्घते इति रथः (रघि गतौ, भ्वा. आ.) रंहतेर्वा रङ्घतेर्वा रमु क्रीडायां रमणे च (भ्वा. आ.) इत्यतो वा थप्रत्यये व्युत्पन्नो रथशब्दो गतिशीलानन्दस्य प्रतीकम् । रथः शक्तेर्गत्याः प्रतीकम् इति श्रीअरविन्दपादाः (वेदरहस्य, पूर्वार्द्ध, पृ० ३९७) । रथस्य गतिशील[सक्रिय]-आनन्दस्य 'वर्ष्मा' शिखराणि साधकेन उत्तरोत्तरमारुह्यमाणानि 'दिवः उपस्पृशः ईषमाणाः' द्युलोकस्य आनन्दस्य उच्चतमभूमिकायाः स्पर्शं कामयमानानि 'नि जिहीडते' निरन्तरम् उच्चात्युच्चतरम् आरोहन्ति, दिवम् अधिकर्तुम् उद्युञ्जते इति भावः । 'यत् सानोः सानुमारुहद् भूर्यस्पष्ट कर्त्वम्' (ऋ० १. १०. २, साम० १३४५) इत्यत्र निर्दिष्टम् इन्द्रस्य जीवात्मनः सानोः सानौ आरोहणम् अत्रापि विवक्षितम् इति दिक् ।

विशेष-विवरणम्

उष्ट्राः—ओषन्ति दहन्तीत्यर्थे उष दाहे (भ्वा. प. से.) इत्यतः औणादिकः ष्ट्रन्, स च कित् (उणा. ४. १६३) । कित्त्वाद् गुणाभावः ।

भगवत्पाददयानन्दसरस्वतीस्वामिनः स्वोपज्ञे वैदिकलौकिककोषाभिधव्याख्यासहिते उणादिकोषे 'उषिखनिभ्यां कित्' (उणा० ४.१६३) इति सूत्रस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याख्यायाम् 'ओषति दहतीति उष्ट्रः पशुजातिभेदो वा' इति समुल्लिखन्तः, दाहकमात्रार्थे उष्ट्रपदं व्युत्पाद्य 'वा'कारेण तस्य पशुविशेषवाचकत्वमपि निर्दिशन्तः वेदे यौगिकार्थस्य प्राधान्यं रूढार्थस्य च गौणत्वमभिप्रयन्ति ।

द्विर्दश—इमा विंशतिः शक्तयस्तावद् ऋग्वेदवर्णिता दश गावो द्विरावृत्ताः । तत्रैष निगमो भवति—

चत्वार ईं बिभ्रति क्षेमयन्तो दश गर्भं चरसे धापयन्ते ।
त्रिधातवः परमा अस्य गावो दिवश्चरन्ति परि सद्यो अन्तान् ।।

(ऋ० ५.४७.४)

अस्मिन् मन्त्रवर्णे याः सत्-चिद्-आनन्दस्वरूपत्रिधातुमय्यः, तत्त्वत्रयात्मिका दश गावश्चिज्ज्योतिषोऽर्चिषः परिकीर्तिताः ता हि परिपूतमनसो दश सूक्ष्म-विचारशक्तयः । अत एव ता विशुद्धमनश्चेतनाप्रतीकायमान-द्युलोक-दिगन्तस्पृश इत्युक्तमत्र 'दिवः अन्तान् परि सद्यः चरन्ति' इति मन्त्रवर्णैः । तासां द्विरावृत्तता तु स्वप्रभावविस्तारार्थं भौतिकचेतनायां प्रवेशसमकालं स्थूलमनसि तदनुरूप-रूपग्रहणादिति बोध्यम् । तथा चाहुः श्रीअरविन्दपादाः—

"परिस्रुताः सोमा आनन्दरसा इन्द्रमुशन्ति—'सुता इमे त्वायवः' (ऋ० १.३.४) । ज्ञानज्योतिर्मयमनःस्वरूप इन्द्रदेवो यज्ञवेदीमुपसद्य स्वक्रियाः सम्पाद-यितुमस्मान् स्वायत्तीकरोतु इति ते कामयन्ते । परिशोधिताः खलु ते 'अण्वीभि-स्तना पूतासः' (ऋ० १.३.४), सायणभाष्यानुसारतः[1] तावत् ते "अङ्गुलिभि-स्तन्वा च" परिपूता इति अस्य चरणस्यार्थः । परन्तु योऽर्थोऽस्य नः प्रतिभाति तदनुसारेण ते "पवित्रमनसः सूक्ष्मविचारशक्तिभिः भौतिकचेतनायां स्वविस्तारेण च परिपूताः ।" यतो हि यदि 'अण्वी'शब्देन अङ्गुलय एव विवक्षिताः तर्हि इमा "दश अङ्गुलयः" अश्विनोः वध्वाः सूर्यदुहितुः सूर्याया दश अङ्गुलयः । अस्य प्रकृतसूक्तस्य (ऋ० १.३) ऋषिर्मधुच्छन्दा अत्र अतिसंक्षेपेण प्रोक्तमिममेव विचारं नवममण्डलीयप्रथमसूक्ते सविस्तरं प्रतिपादयति । सोमस्य देवतां संबोधयन्नसौ आचष्टे, सूर्यस्य दुहिता ते सोमं पुनाति, यदा स सततविस्तारेण चालन्यां परिस्रुतः सर्वतः प्रसरति", 'वारेण शश्वता तना' (ऋ० ९.१.६) ।[2] ततश्च तत्कालमेव स इदमप्यभिधत्ते—"सूक्ष्मशक्तयः स्वप्रयत्ने (स्वकीये महाकार्ये, महासङ्घर्षे, उदात्ताभीप्सायाम्—'समर्ये') इममाददते, ताः शक्तयश्च समुल्लङ्घनीयद्युलोके विद्यमाना दश वध्वः स्वसारो वा[1] ।"………"विशुद्ध-मनोवर्तिन्यस्ताः सूक्ष्माः (अण्वीः) दश स्वसारो, दश वध्वः (योषणः) वा अन्यत्र

---

१. "अण्वीभिः……ऋत्विजामङ्गुलिभिः सुता इत्यन्वयः । किञ्च एते सोमास्तना नित्यं पूतासः पूताः शुद्धा दशापवित्रेण बहुधा शोधितत्वात्" इति सायणः ।

२. पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता । वारेण शश्वता तना । (ऋ० ९.१.६)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'दश' प्रक्षेप्त्र्यः (क्षिपः) प्रोक्ताः, यतस्ताः सोमं प्रतिगृह्य तस्य मार्गं प्रगमयन्ति। इमाः सम्भवतस्ता एव या वेदे क्वचित् क्वचित् दश किरणाः (दश गावः) इति कीर्तिताः । 'नप्तीभिः विवस्वतः' (ऋ० ९.१४.५) अर्थात् सूर्यस्य पौत्रीभिः, इति पदाभ्यां ता एव निरूपिताः प्रतीयन्ते । उपरिनिर्दिष्टे परिशोधनकार्ये 'सप्त धीतयः', विचारात्मकचेतनायाः सप्त रूपाणि तासां साहाय्यमनुतिष्ठन्ति ।"

अथ 'यो मे शता च विंशतिं च गोनां हरी च युक्ता सुधुरा ददाति' (५.२७.२) इत्यस्य व्याख्यायां त आचक्षते—"वर्षस्य द्वादशसु मासेषु यज्ञस्य (द्वादशमासोपलक्षितेषु) द्वादशसु कालेतेषु च याः क्रमिकचित्प्रभात (गो) रूपायिता दिव्यज्ञानदीप्तयो भवन्ति तासां प्रतीकात्मकसङ्ख्येयं विंशत्यधिकशतमिति । अत्र पुनः ज्ञानप्रदीप्तमनसः शक्तीनां दशानां सूक्ष्मस्वसृणामनुरूपा दशगुणिताद्द्वादश गावः (दिव्यज्ञानप्रभाः) अभिप्रेताः ।" (Cent. Vol. II, P. 241)

अन्यत्र च तैरुक्तम्—"दश सन्ति सूक्ष्मशक्तयः प्रकाशितमनसः, तासु एकैकया स्वीयसमग्रपूर्णता समुपलभ्या ।" (—*ibid.* P. 241)

ज्योतिर्मयमनसः इमा दश शक्तय एव द्विरावृत्ताः प्रकृतमन्त्रगत'द्विर्दश'-पदेन विवक्षिताः । इमाश्च वेदेऽन्यत्रापि वर्णिता विलोक्यन्ते—

परिद्युक्षं सहसः पर्वतावृधं मध्वः सिञ्चन्ति हर्म्यस्य सक्षणिम् ।
आ यस्मिन् गावः सुहुताद ऊधनि मूर्धञ्छ्रीणन्त्यग्रियं वरीमभिः ॥
समी रथं न भुरिजोरहेषत दश स्वसारो अदितेरुपस्थ आ ।
जिगादुप ज्रयति गोरपीच्यं पदं यदस्य मतुथा अजीजनन् ॥
(ऋ० ९.७१.४-५)

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः । (ऋ० ९.९३.१)
अभि प्रियाणि पवते पुनानो देवो देवान्त्स्वेन रसेन पृञ्चन् ।
इन्दुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये ॥ (ऋ० ९.९७.१२)

एष इषाय मामहे शतं निष्कान् दश स्रजः ।
त्रीणि शतान्यर्वतां सहस्रा दश गोनाम् ॥ ३ ॥

'एषः' स एष पूर्वमन्त्रद्वये प्रोक्तः पुरुषोत्तमः 'इषाय' इच्छति, अभीप्सति, अन्विच्छति, अन्विष्यति वा देवादिदेवं पुरुषोत्तममिति इषः भगवदन्वेषकः, परमार्थाभीप्सुः तस्मै, यद्वा, यजति पुरुषोत्तमम् अन्तर्यज्ञेन इति इष आत्मयाजी तस्मै, अपि वा, इष्णाति अन्तर्यागं कर्तुमभीक्ष्णमुद्युङ्क्ते इति तस्मै योगयज्ञोद्योगिने 'शतं निष्कान्' शतं स्वर्णमुद्राः, स्वर्णञ्च परमसत्यस्य विज्ञानमयसत्यस्य वा प्रतीकमित्यतः शतं बहुसङ्ख्यकान् निष्कान् सत्यचिद्रश्मीन् इत्यर्थः 'दश स्रजः' दश मालाः, देवप्रदत्तत्वाद् दिव्याः, दिव्यसम्पत्संवर्धिकाः 'अर्वतां त्रीणि शतानि' त्रिशतम् अश्वान् अध्यात्मशक्तिरूपान्, अश्वस्य अध्यात्मशक्तेः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतीकत्वात्, 'गोनाम् दश सहस्रा' गवां ज्ञानरश्मीनां दिव्यप्रकाशरश्मीनां वा दशसहस्रं 'मामहे' दत्त ।

इति नाराशंस्यः

तिस्रो रैभ्य ऋचः

वच्यस्व रेभ वच्यस्व वृक्षे न पक्वे शकुनः ।
नष्टे जिह्वा चर्चरीति क्षुरो न भुरिजोरिव ॥ ४ ॥

परमेश्वरः पुरुषोत्तमः तदभीप्सुं पूर्वमन्त्रोल्लिखितम् इषम् उपदिशति— 'रेभ' हे मद्भक्तिप्रवण स्तोतः ! 'वच्यस्व वच्यस्व' पुनः पुनरुच्चर स्तुतिगिरम्, पौनःपुन्येन भृशं च स्तुहि, वीप्सार्था द्विरुक्तिः । तत्र दृष्टान्तः—'न' यथा 'पक्वे वृक्षे' पक्वफलसमृद्धे तरौ उपविष्टः 'शकुनः' पक्षी सहर्षं, पुनः पुनः भृशं च वक्ति, कलं किमपि रौति कूजति वा, अपि च 'पक्वे वृक्षे' अस्मिन् व्रश्चनीय-देहवृक्षे जरापरिणते सति, अथवा व्रश्चनीयविनश्वरदेहवृक्षे परिपक्वज्ञान परिणतप्रज्ञे वा सति अस्मिन् आसीनः 'शकुनः' आत्मपक्षी, हंसस्वरूप आत्मा आत्मसुपर्णो वा त्वं, हे रेभ, स्वयं स्तुतिपरः सन् अन्यान् स्वापेक्षया न्यूनज्ञानान् अपरिपक्वप्रज्ञान् वा 'वच्यस्व वच्यस्व' प्रवचनैः उपदिश उपदिश अतिशयेन भक्तिमार्गम् इति श्लेषेण ध्वनितोऽयमर्थः सुधीभिरवधेयः ।

स्तुतेरुपदेशस्य च अविरामतायां निदर्शनद्वयं प्रस्तौति भगवान् वेदः— 'इव' यथा 'नष्टे' आधिव्याधिभिः व्याप्ते सति आत्मीये तनयादौ स्वात्मनि वा 'भुरिजोः जिह्वा चर्चरीति' भरणपोषणकर्त्रोः पित्रोः रसना चाचलीति, अविरतं चलति आत्मीयस्य स्वात्मनो वा कष्टक्लेशनिवारणार्थं भगवत्स्तवन-परायणा, अपि च 'क्षुरः न' यथा क्षुरः नापितास्त्रं चलति अनवरतं केशकर्त-नार्थम् । हे रेभ ! हे भक्तवर ! स्तवनेन स्वात्मनः उपदेशेन च अन्येषां शोक-सन्तापान् तथा छिन्द्धि भिन्द्धि यथा नापितः क्षुरेण केशान् कृन्तति इति अस्या उपमाया रहस्यार्थः ।

प्र रेभासो मनीषा वृषा गाव इवेरते ।
अमोत पुत्रका एषाममोत गा उपासते ॥ ५ ॥

'रेभासः' स्तोतारः 'मनीषाः' स्वा मतीर्धियो वा 'प्र ईरते' प्रेरयन्ति परमेश्वरं प्रति इति शेषः । तत्र उपमामुपन्यस्यति—'वृषाः गावः इव' यथा वृषा गोपतिः इन्द्रः गावः गाः दिव्यप्रकाशरश्मीन् प्रेरयति स्तोतॄन् प्रति ।

'वृषाः' इत्यत्र वचनव्यत्ययेन एकवचनार्थे बहुवचनम् । गाव इत्यत्र विभक्ति-व्यत्ययेन द्वितीयार्थे प्रथमा । वेदे वर्णिता गावश्च चिज्ज्योतिष्प्रदास्तमस्स्तोम-निरासका रश्मय एवेति मन्त्रवर्णैरेवाम्नायते—सं ते गावस्तम आ वर्तयन्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्योतिर्यच्छन्ति सवितेव बाहू (ऋ० ७.७९.२), प्रति भद्रा अदृक्षत गवां सर्गा न रश्मयः (ऋ० ४.५२.५) इत्यादिभिः।

वृषा गाव इवेत्युपमया स्तोतुर्दिव्यालोकप्राप्तिरपि सूच्यते दिव्य (ईश्वरीय)-मनसोऽधिष्ठातुरिन्द्रस्य प्रसादात्।

ते रेभासश्च 'अमोत अमोत' सर्वथा बन्धनमुक्ता भवन्ति, अमोत इत्यत्र प्रथमाबहुवचनस्य लुक्, द्विरुक्तिरादरार्था, प्रकृतार्थस्य दार्ढ्यनिगमनार्था असन्दिग्धतासूचनार्था वा। 'एषां पुत्रकाः' एषां स्तोतॄणां तनयाश्च, अनुकम्पायां कः, देवानुकम्पापात्रपुत्राश्चेत्यर्थः 'गा उप आसते' वाणीः, वंशपरम्परागताः सद्विद्या इति भावः, दिव्यचैतन्यरश्मीन् वा सेवन्ते। 'सर्वेऽपि रश्मयो गाव उच्यन्ते' (निरु० २.२.६), 'येन गौरभिप्रवृत्ता···वागेषा माध्यमिका' (निरु० २.२.९)। 'स्वर्गेषु-पशु-वाग्-वज्र-दिङ्-नेत्र-घृणि-भू-जले। लक्ष्य दृष्ट्या स्त्रियां पुंसि गौर्लिङ्गं चिह्न-शेफसोः॥' इत्यमरः (३.२५)

प्र रेभ धियं भरस्व गोविदं वसुविदम्।
देवत्रेमां वाचं कृधीषुं न वीरो अस्ता॥ ६॥

'रेभ' हे स्तोतः! 'गोविदं' गां गोलोकं स्वर्गविशेषं तन्निवासिनमानन्द-स्वरूपं विष्णुञ्च वेदयति प्रज्ञापयति प्रापयति चेति तां, यद्वा, गाः चैतन्यरश्मीन्, ज्ञानज्योतींषि वेदयति प्रापयतीति ताम् इति धियो विशेषणम्। गोलोकश्च वैष्णवमतेन शाश्वतसौन्दर्यानन्दयोः लोकः, ज्योतिर्मयदिव्यलोकेष्वन्यतमः। तं लोकं स्वयं विन्दति अन्यांश्च निजभक्तान् वेदयति प्रापयतीत्यतो भगवान् श्रीकृष्णो गोविन्द इत्युच्यते। 'गोविदम्' इति पदं गोविन्दपदं स्मारयति तदर्थं च ध्वनयति। 'वसुविदम्' पिण्डे ब्रह्माण्डे च सर्वत्र वसतीति वसुर्भगवान् वासुदेवः, तं वेदयति बोधयति प्रापयति चेति तां, यद्वा, वसति सर्वभूतेषु वस्तुसत्तात्मना इति वसु वस्तुमात्रस्य अन्तःस्थसारतत्त्वं, तदन्तर्वर्तिवास्तविकैश्वर्यं परतत्त्वं परमार्थो वा तम्, आत्मानं परमात्मानं चेत्यर्थः, वेदयति अवगमयति अधिगमयति चेति तां तथोक्ताम् 'धियम्' बुद्धिम् अपि वा, 'गोविदं वसुविदम् धियम्' गां गोलोकं वेदयते स्तोतरि निवासयति दृढप्रतिष्ठितं करोतीति तां, स्तोतरि गोलोकस्य तद्वासिविष्णोरित्यर्थः शाश्वतप्रतिष्ठाकरीं धियम्, गौर्गोलोको वा आधारे आधेयलक्षणया तद्वासिविष्णुमाचष्टे। एवमेव स्तोतरि वसोः वासुदेवस्य तदीयवसुनश्च सुचिरनिवाससम्पादिकां धियम्। अस्मिन्नर्थे विद चेतनाख्यान-निवासेषु इति चौरादिको वेदयतिः शरणीकरणीय इति दिक्। 'धियम्' ध्यान-चिन्तनक्षमां बुद्धिं, ध्यायतेऽनयेति धीरिति तद्व्युत्पत्तेः, 'प्र भरस्व' प्रकर्षेण सम्पादय। 'इमां वाचम्' एतां स्तुतिलक्षणां गिरञ्च 'देवत्रा' देवेषु देवादिदेवे परमेश्वरे वा तत्प्राप्तिनिमित्तमित्यर्थः, निमित्तसप्तमी 'कृधि' रचय, उपकल्पय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयुङ्क्ष्वेति भावः। तत्र दृष्टान्तः—'अस्ता वीरः इषुं न' यथा शरप्रक्षेप्ता शूरो धनुर्धरः स्वबाणं लक्ष्यवेधार्थम् उपकल्पयति मुञ्चति च।

प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्॥

इति श्रुतिनिर्दर्शितदिशा (मुण्ड० उ० २.२.४, ध्या० बि० १४) स्तोता स्वधियं शरवत्तन्मयीं कुर्यादिति 'अस्ता वीर इषुं न' इति उपमाया हार्दम्।

अथ चतस्रः पारिक्षित्यः

राज्ञो विश्वजनीनस्य यो देवोऽमर्त्याँ अति।
वैश्वानरस्य सुष्टुतिमा सुनोता परिक्षितः॥ ७॥

'यः देवः' य आदिदेवः परमेश्वरः 'अमर्त्यान् अति' अमरान् सकलदेवान् अतीत्य वर्तते तस्य, यत्तदोर्नित्यसम्बन्धात् तस्येति पदमाक्षिप्यते, 'वैश्वानरस्य' विश्वेषु सर्वेषु नरेषु मनुष्येषु देवेषु च विद्यमानस्य विराट्पुरुषस्य विश्वात्मनः 'विश्वजनीनस्य' सर्वजनहितकरस्य 'परिक्षितः' परि परितः सर्वतः क्षियति निवसति स्वयम्, निवासयति च सर्वभूतानि इति परिक्षित्, क्षि निवासगत्योः इति तौदादिकाद् धातोः परिपूर्वात् क्विपि तुकि च परिक्षित् इति साधु। क्षियतेरत्र अन्तर्भावितण्यर्थत्वमपि विवक्षितम्। तथा सति परिक्षित् सर्वभूताधिवासः, सर्वेषां निवासप्रदाता चेति द्वावप्यर्थौ प्रसिद्ध्यतः। क्षियतेः गत्यर्थग्रहणाच्च परितः सर्वतः क्षियति अप्रतिहतगतिर्भवति गमयति च सर्वान् कर्माध्यक्षतया इत्यर्थोऽपि अवसीयते। तथा च

'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥

इति श्रुतेः (श्वेता० ६.११) कृत्स्नोऽप्यर्थः 'परिक्षित्'पदेन समर्प्यते। तस्य तथाभूतस्य परिक्षितः 'राज्ञः' राजराजेश्वरस्य कोटिकोटिब्रह्माण्डशासकस्य 'सुष्टुतिम्' उत्तमां, सर्वाङ्गपूर्णां स्तुतिम् 'आ सुनोत' समन्तात् मथ्नीत, तदीयसद्गुणसिन्धुं समवगाह्य स्तुतिसारं सम्प्रकाशयत।

परिक्षिन्नः क्षेममकरोत् तम आसनमाचरन्।
कुलायं कृण्वन् कौरव्यः पतिर्वदति जायया॥ ८॥

'कौरव्यः' करोति सर्वमिति कुरुः, कर्तुमकर्तुमन्यथाकर्तुं समर्थ ईश्वरः। करोतेः 'कृग्रोरुच्च' (उणा० १.२४) इति कुप्रत्यये, ऋकारस्य उकारे रपरत्वे च साधुः। कुरुरेव कौरव्यः, स्वार्थे ण्यश्छान्दसः। 'पतिः' सर्वेषां पाता पालकश्च प्रभुः 'जायया कुलायं कृण्वन्' निजभार्यया प्रकृतिरूपिण्या, तद्द्वारा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वकुटुम्बं करिष्यम्, रचयिष्यन्, करोतेः 'वर्तमानसामीप्ये वर्तमानवद्वा' (अष्टा० ३.३.१३१) इति लृटः स्थाने लट्, लटः शत्रादेशः, व्यत्ययेन श्नुः। 'तम आसनम् आचरन्' तमसः, षष्ठया लुक्, सृष्टेः पूर्ववर्तिनः तमसोऽन्धकारस्य आ समन्तात् असनं क्षेपणं, निरसनं कुर्वन् 'वदति' जायां, निजशक्तिं प्रकृतिं ब्रवीति, शास्ति, आदिशति जगत्सर्जनार्थमिति शेषः। एवं च स 'परिक्षित्' सर्वभूताधिवासः, जीवानां कर्माध्यक्षः, कर्मफलप्रदाता पूर्वमन्त्रोक्तः परमात्मा 'नः' अस्माकं जीवानां 'क्षेमं' कल्याणम् 'अकरोत्' कृतवान्, जीवेभ्यः प्राक्तनकर्मानुसारेण आत्मविकाससाधनं नूतनजन्म प्रदाय तेषां मङ्गलमकरोदित्यर्थः।

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥

इति श्वेताश्वतरोपनिषदि (४.५) वर्णितौ 'अजा' 'अजोऽन्यः' च प्रकृतमन्त्रे 'जाया'-'पति'-शब्दाभ्यां कीर्तितौ इति अवधेयम्।

कतरत् त आ हराणि दधि मन्थं परिस्रुतम्।
जाया पतिं वि पृच्छति राष्ट्रे राज्ञः परिक्षितः॥ ६॥

'परिक्षितः राज्ञः राष्ट्रे' सर्वभूताधिवासस्य, राजराजेश्वरस्य परमात्मनः राज्ये 'जाया' तद्भार्या प्रकृतिः 'पतिं' स्वपतिं परमेश्वरं 'वि पृच्छति' सर्जनविषयकं विशेषं पृच्छति, वि इत्युपसर्गोऽत्र विशेष-वैविध्य-वैचित्र्यवाचकः, सर्जनाय सामान्यादेशं सम्प्राप्य प्रकृतिः तस्य विशेष-वैविध्य-वैचित्र्यविषये पृच्छां करोति इति भावः। 'दधि' दधिवत् स्थूलं घनमन्नमयतत्त्वं, प्रस्तरखनिजधात्वादिकं जडपदार्थं, दधाति धारयति पोषयति चेति दधि धारकपोषकमन्नधान्यादिकं वा 'मन्थं' मथितदधिवत् तक्रवद्वा वैद्युतप्राणशक्तिमयम् उद्भिज्जं वृक्षवनस्पत्यादिकम् अन्नप्राणमयसत्तां वा 'परिस्रुतम्' निर्जलतक्रस्यापि सारभूतं तत्त्वं, परिस्रवणशीलं, स्यन्दनस्वभावं नवनीतघृतरसात्मकम्; घृतं च शुद्धमानसदीप्तेः प्रतीकम् इति कृत्वा अन्नप्राणमनोमयीं सत्तां पशुपक्षिमनुष्यादिरूपामित्यर्थः, 'कतरत्' दधिमन्थपरिस्रुतेषु स्थूल-सूक्ष्म-सूक्ष्मतरेषु तत्त्वेषु कतमत् तत्त्वम्, 'शुद्धान्नमय'-'अन्नप्राणमय'-'अन्नप्राणमनोमय'सत्तासु कतमां सत्तां, तमःप्रधान-रजःप्रधान-सत्त्वप्रधानेषु पदार्थेषु प्राणिषु च कतमं पदार्थं प्राणिनं वा 'ते आहराणि' तुभ्यमुपानयानि, सृजानि उत्पादयानि वा इति प्रकृतेः पृच्छा।

अत्रायमभिसन्धिः—लोहितशुक्लकृष्णा अजा, सत्त्वरजस्तमोरूपत्रिगुणात्मिका तेजोऽबन्नलक्षणा वा प्रकृतिजाया स्वपतिं परमेश्वरमाख्याति—सात्त्विकराजस-तामसीः, अन्नमय-अन्नप्राणमय-अन्नप्राणमनोमयीः त्रिविधा अपि सृष्टीः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कत क्षमाऽहं भवज्जाया किं किं सृजेयं भवते इति आदिशतु मां सर्वशक्तिमान् मदीश्वरः ।

अभीव स्वः प्र जिहीते यवः पक्वः परो बिलम् ।
जनः स भद्रमेधते राष्ट्रे राज्ञः परिक्षितः ॥ १० ॥

'पक्वः' हविर्दानाय अग्निना कृतपाकः शृतो वा 'यवः', यवोऽत्र उपलक्षणं तण्डुलादीनां हविष्यान्नानाम् । 'पक्वः यवः' इत्याभ्यां पदाभ्यामत्र पुरोडाशो विवक्षितः । अन्तर्यज्ञे च सः [पुरोडाशः] तप्ततनोः प्रतीकम् । तपसा परिपूता, जीवनस्य अग्निज्वालानां, कष्टानामनुभवानाञ्च सहनेन आत्मानं भगवतेऽर्पयितुं सिद्धा तनुरेवात्र मन्त्रवर्णैः 'पक्वः यवः' इत्युक्ता । सा 'बिलं' विभक्तिव्यत्ययेन पञ्चम्याः सुः, सोरमादेशः, बिलात् गुहायाः, हृद्गुहायाः 'परः' परतः, असङ्गतया हृदयात् पृथक्कृत्य भगवते अर्पिता 'स्वः अभि' स्वर्गलोकं प्रति 'प्र जिहीते इव' प्रशस्ततया प्रवेगेन च गच्छति नूनम् । इवेति निपातोऽत्र नूनम् इत्यर्थकः । निपाताः 'उच्चावचेष्वर्थेषु निपतन्ति···अपि कर्मोपसङ्ग्रहार्थेऽपि पदपूरणाः' इति यास्कोक्तेः (१.२.१), कर्मोपसङ्ग्रहार्थाः, अर्थोपसङ्ग्रहार्थाः, अर्थविशेषस्योपसङ्ग्रहार्थका इति तद्व्याख्यानात् । 'स जनः' सोऽयं पक्वयवोपम-देहः तप्ततनुः साधकः 'परिक्षितः राज्ञः राष्ट्रे' सर्वभूताधिवासस्य राजराजेश्वरस्य परमात्मनो राज्ये 'भद्रम् एधते' भद्रं यथा स्यात्तथा सक्षेमं ससुखञ्च वर्धते, एधतेरन्तर्भावितण्यर्थत्वाङ्गीकाराच्च (भद्रं) सुखमानन्दं कल्याणञ्च (एधते) वर्धयति स्वस्य परेषाञ्च इत्यर्थः ।

अथ चतस्रः कारव्याः

इन्द्रः कारुमबूबुधदुत्तिष्ठ वि चरा जरन् ।
ममेदुग्रस्य चर्कृधि सर्व इत् ते पृणादरिः ॥ ११ ॥

'इन्द्रः' दिव्य[ईश्वरीय]मनसो ज्योतिर्मयलोकस्य, शुद्धदिव्यप्रज्ञाया लोकस्य स्वर्नामकस्य अधिपतिर्देवः इन्द्रः 'कारुम्' निजस्तोतारम् 'अबूबुधत्' अजागरयत्, तस्य मनश्चेतनां प्राणचेतनायाः सीमाभ्यो बाधाभ्यश्च विमोच्य तां दिव्यज्योतिषा अपूरयदित्यर्थः । मनुष्यस्य मनोमयचेतनायाः प्राणिक-बन्धनेभ्यो विमोचनं दिव्यप्रकाशेन तस्याः परिपूरणञ्चैव इन्द्रकृतं प्रबोधनम् । स्तोतारं तथा अन्तः प्रबोध्य सोऽन्तर्वाण्या समादिशत्—हे स्तोतः ! 'उत्तिष्ठ' उद्यतः, सन्नद्धः भव । 'जरन्' मम स्तुतिं कुर्वन्, जॄ स्तुतौ (भ्वा०प०), अन्यांश्च तामुपदिशन्, गॄ शब्दे, क्र्यादि० प०, व्यत्ययेन शप्, गकारस्य चुत्वं छान्दसम्, 'वि चर' व्यापकं लोकसङ्ग्रहात्मकं कर्म आचर मत्प्रदत्तप्रकाश-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रेरितम्, विश्वकल्याणसाधकम् । 'उग्रस्य' उद्‌गूर्णस्य, प्रबलशक्तिशालिनः 'मम इत्' ममैव 'चर्कृधि' कर्म कुरु भृशं भूयो भूयश्च, स्वार्थप्रेरितमहङ्कारात्मकं कर्म परित्यज्य निःस्वार्थं निरहङ्कारं भगवत्कर्म समाचर । 'सर्वः इत् अरिः' सर्वोऽपि, प्रत्येकमपि अरणशीलः, सत्यस्य विजयार्थं सङ्ग्रामशीलः आर्यजनः 'ते पृणात्' त्वां प्रीणयेत्, तर्पयेत् प्रसादयेच्च सत्यसङ्ग्रामे विजयश्रिया यशोलक्ष्म्या चेति भावः ।

अस्मिन् मन्त्रे 'अरि'शब्दः आर्यवाचकः । तथा च महर्षिश्रीअरविन्दाः—

'उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत । दधाना इन्द्र इद् दुवः ॥'

'उत नः सुभगां अरिर्वोचेयुर्दस्म कृष्टयः । स्यामेदिन्द्रस्य शर्मणि ॥' ऋ० १.४.५-६ इत्यनयोर्ऋचोर्व्याख्यायामाहुः—

"प्रगतिं प्रयासं वा कुरुध्वम्" इत्यर्थकम् 'आरत'पदं स्वसजातीयैः 'अरि'-'अर्य'-'आर्य'-'अरत'-'अरणि'पदैस्तुल्यं वेदस्य केन्द्रीयविचारम् अभिव्यनक्ति । 'अर्'धातुः (ऋ गतौ इति) सदा प्रयत्नस्य सङ्घर्षस्य वा गतिं निर्दिशति, सर्वातिशायिन्या उच्चतायाः श्रेष्ठताया वाऽवस्थां सूचयति । अयं नौचालनम्, कर्षणम्, आयोधनम्, उद्यमनम्, आरोहणम् इत्येतेषु अर्थेषु प्रयुज्यते । तदेवम् आर्यो नाम स मनुष्यो यो वैदिककर्मणा देवयजनरूपेण आन्तरेण बाह्येन च कर्मणा 'अपसा' वा आत्मपूर्णतायै स्पृहयते । किन्तु इदं कर्म, यात्रा, प्रयाणं, युद्धम्, ऊर्ध्वारोहणम् इत्येषां रूपकैरपि निरूपितं वेदे । आर्यपुरुषः शिखराणि आरोढुं प्रयतते, पुरोगमनम्, ऊर्ध्वारोहणम् इत्युभयरूपा खलु तस्य यात्रा प्रयाणं वा । तस्मिन् सङ्घर्षं सङ्ग्रामश्च विधाय स स्वपथं विरचयति । इदमेव तस्य आर्यत्वम् ।···

"अयमेव भावः शब्दप्रतिध्वनिद्वारा विचारशृङ्खलायाः संसूचनरूपां सूक्ष्म-वैदिकशैलीम् अवलम्ब्य अग्रिममन्त्रस्य 'अरिः कृष्टयः' इति पदाभ्यां पुनरुपस्थाप्यते ।···अरिः कृष्टयः नाम मानवस्य ऊर्ध्वारोहणसहायिकाः शक्तयः ।"

इह गावः प्रजायध्वमिहाश्वाः इह पूरुषाः ।
इहो सहस्रदक्षिणोऽपि पूषा नि षीदति ॥ १२ ॥

'इह' अस्मिन् कारौ स्तोतरि वा 'गावः' हे चिद्रश्मयः, ज्ञानार्चिषः ! 'प्रजायध्वम्', यूयं वर्धध्वम् । 'इह' अस्मिन् 'अश्वाः' हे प्राणशक्तयः ! वर्धध्वम् । 'इह' अस्मिन् 'पूरुषाः' पुरि शयानस्य पुरुषस्यात्मनः शक्तयः ! वर्धध्वम् । 'इह उ' अस्मिँश्च 'सहस्रदक्षिणः' भूरिदक्षिणः, भूरिदाः, बहिरन्तरैश्वर्यस्य प्राचुर्येण प्रदाता, 'भूरिदा भूरि देहि नो मा दभ्रं भूर्या भर । भूरि घदिन्द्र दित्ससि ॥' 'भूरिदा ह्यसि श्रुतः पुरुत्रा शूर वृत्रहन् इत्यादिमन्त्रेषु इन्द्रस्य भूरिदात्वप्रसिद्धेः । 'पूषा अपि' बाह्यान्तरवैभवानां पुष्कलप्रदानेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्माकं पोषयिता वर्धयिता इन्द्रः अपि 'नि षीदति' निषीदतु, विराजतु अस्य अन्तरे निकामं निरन्तरं च। 'नि' इत्युपसर्गोऽत्र निरन्तरं निकामं च अन्तर्निवेशमाह गभीरेऽन्तस्तले।

मेमा इन्द्र गावो रिषन् मो आसां गोपती रिषत्।
मासाममित्रयुर्जन इन्द्र मा स्तेन ईशत॥ १३॥

'इन्द्र' हे दिव्यज्योतिष्प्रदातः स्वर्पते! 'इमा गावः' त्वत्प्रदत्ता इमे दिव्य-ज्ञानरश्मयः 'मा रिषन्' हीनाः क्षीणा वा न भवेयुः। 'आसां गोपतिः उ' एतासां प्रकाशधेनूनां स्वामी त्वत्स्तोता अपि 'मा रिषत्' क्षतिं, हानिं हिंसां वा न प्राप्नोतु। 'इन्द्र' हे इन्द्र! 'आसाम् अमित्रयुः जनः' एतासां पूर्वोक्तप्रकाशगवाम् अहितकामः अमित्रताकामी, अमित्रवत् अनिष्टकर्ता जनः, देवविरोधिनी प्रकाशद्वेषिणी वा सत्ता शक्तिर्वा 'मा ईशत' आसां शासनं मा करोतु। 'स्तेनः मा ईशत' प्रकाशविरोधी पणिर्दस्युर्वा इमा मा ईष्टाम्, अपहर्तुम् आत्मसात् कर्तुं वा मा क्षमताम्।

इन्द्रसहकृतैः अग्नीषोमादिदेवैः वृजिनस्य रिपोः, स्तेनस्य, वृकस्य पणेर्वधेन तच्चोरितज्योतिर्गवां पुनःप्राप्तिविषये इमे मन्त्रा द्रष्टव्या :—

अप त्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यम्।
दविष्ठमस्य सत्पते कृधी सुगम्॥
...जही न्यत्रिणं पणिं वृको हि षः॥ ऋ० ६.५१.१३-१४
अयं देवः सहसा जायमान इन्द्रेण युजा पणिमस्तभायत्। ऋ० ६.४४.२२
या शश्वन्तमाचखादावसं पणिं ता ते दात्राणि तविषा सरस्वति।
सरस्वति देवनिदो निबर्हय। ऋ० ६.६१.१-३
अग्नीषोमा चेति तद् वीर्यं वां यदमुष्णीतमवसं पणिं गाः।
अवातिरतं बृसयस्य शेषः अविन्दतं ज्योतिरेकं बहुभ्यः॥ ऋ० १.९३.४

उप नरं नोनुमसि सूक्तेन वचसा वयं भद्रेण वचसा वयम्
वनादधिध्वनो गिरो न रिष्येम कदाचन १४॥

'वयं सूक्तेन वचसा' वयं स्तोतारो वैदिकसूक्तात्मकवाण्या 'नरम् उप नोनुमसि' देवं नरोत्तमम्, पुरुषोत्तमम्, वेदे 'नर'शब्दो देवानां कृते बहुशः प्रयुक्तः, तद्यथा—

'तद् वां नरावश्विना पश्वइष्टी' (ऋ० १.१८०.४)
'ऋषिं नरावंहसा पाञ्चजन्यम्' (ऋ० १.११७.३)
'तद् वां नरा शंस्यं पज्रियेण' (ऋ० १.११७.६)
'हये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः' (ऋ० ५.५७.८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यादिमन्त्रेषु अश्विनोः मरुतां कृते च 'नर'शब्दो व्यवहृतः। तं नरोत्तमम उप आदरेण, घनिष्ठतयाऽन्तरङ्गतया च, पौनःपुन्येन भृशं च नुमः स्तुमः। 'वयं भद्रेण वचसा' वयं कल्याणकारिणा, आनन्दमयेन वेदवाक्येन, मन्त्रवर्णैः 'नरम् उप नोनुमसि' इति पुनरन्वीयते। स नरोत्तमो नः अधिध्वनः गिरः' हृदयादधिध्वन्यमाना वाणीः, हृदा तष्टान् मन्त्रान् 'वनात्' जुषेत, प्रीतिपूर्वकं सेवेत। वन षण संभजने इत्यतो लेटि, तिपि, आडागमे इकारलोपे च रूपम्। 'कदाचन न रिष्येम' वयं कदापि हिंसिताः पीडिता वा न भवेम, हीनाः दीना दूना वा न भवेम तस्य नरोत्तमस्य प्रसादात् इति शेषः।

अस्य सूक्तस्य प्रथममन्त्रेऽस्मिन्नन्तिममन्त्रे च 'नर'शब्दस्य पुरुषोत्तमवाचकस्य प्रयोगात् उपक्रमोपसंहाराभ्यां तात्पर्यनिर्णयलिङ्गाभ्यामिदं सूक्तं पुरुषोत्तमपरतया पर्यवस्यति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्तम् १२८

अथ पञ्च क्लृप्तयः

यः सभेयो विदथ्यः सुत्वा यज्वाथ पूरुषः ।
सूर्यं चामूं रिशादसस्तं देवाः प्रागकल्पयन् ।। १ ।।

'यः पूरुषः' यो मनुष्यः 'सभेयः' सभायां साधुः, तत्त्वज्ञानगोष्ठयां प्रवीण इत्यर्थः । वेदे 'सभेय'पदेन न हि साधारणज्ञानगोष्ठीषु ज्ञानचर्चाकुशलो गृह्यते किन्तु देवप्रदत्तज्ञानसम्प्रदीप्त इति ।

सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ।। (ऋ० १.९१.२०)

इति मन्त्रे आत्मदानकारिणे यजमानाय सोमदेवो विदथ्यं, सभेयं पुत्रं ददाति इति आम्नातम् । स तथाभूतः सभेयः पुरुषोऽत्र विवक्षितः ।

उताशिष्ठा अनु शृण्वन्ति वह्नयः सभेयो विप्रो भरते मती धना ।
(ऋ० २.२४.१३)

इति मन्त्रे 'सभेयः विप्रः मती धना भरते' सभेयः दिव्यज्ञानसम्पन्नः विप्रः ज्योतिरैश्वर्येण अन्येषां पूरयिता मती मत्या धना नानैश्वर्याणि भरते धारयतीत्युक्तम् । तथाभूतः सभेयो विप्र एवात्र अभिप्रेतः । 'विप्र'शब्दश्च वैदिकात् प्रकाशार्थकाद 'विप्'धातोर्निष्पन्नः । तथा चाहुः श्रीअरविन्दपादाः—" 'वि'धातुः प्रकाशार्थः (तुल० वी गति-व्याप्ति-प्रजन-कान्त्यसन-खादनेषु) । 'विप्'-धातोरर्थश्च प्रकाशस्य क्रीडा, प्रकम्पः पूर्णोच्छ्वासो वा । यस्य मनसि ज्ञानोदयः सञ्जातः, यस्य मनोद्वारं ज्ञानस्य तेजस्वितरक्रीडार्थमुन्मुक्तं स एव विप्रः ।" (बंगला रचनाएँ, पृ० ४३) । तथा हि, विपं प्रकाशं राति ददाति इति विप्रः, अपि वा विपा प्रकाशेन प्राति पूरयति अन्यान् इति विप्रः, विप्+प्रा+क-प्रत्ययः, पकारलोपश्छान्दसः । 'विदथ्यः' विदथं यथार्थज्ञानम् आत्मपरमात्मविषयकं वेदाह्वयम् अर्हति इति सः, आत्मसाक्षात्कारक्षम इति भावः, तदर्हति (अष्टा० ५.१.६३) इत्यधिकृत्य 'छन्दसि च' (अष्टा० ५.१.६७) इति यत् । 'सुत्वा' सुनोति निजसत्ताया अन्तःसारम् सोमम् आनन्दरसं वा निष्पीडयति निष्कृषति देवाय अर्पयितुमिति सः, 'अथ' अपि च यः 'यज्वा' अन्तर्यजनशीलः अस्ति 'तम् अमूं सूर्यम्' तमिमं सूर्यतुल्यतेजस्विनं पुरुषं 'रिशादसः देवाः' हिंसकानां पीडकानां च उपक्षपयितारो विनाशका वा देवाः 'प्राक्' प्रकर्षेण, प्रकृष्टतया प्रशस्ततया च अञ्चति आचरति, पूजनीयां क्रियां करोति इति तं तथाभूतम्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राचीतुल्यम् अग्रगण्यं, प्रथमं, प्रधानं श्रेष्ठञ्च 'अकल्पयन्' कल्पयन्ति विभावयन्ति इति भावः ।

यो जाम्या अमेथयद् यत् सखायं दुधूर्षति ।
ज्येष्ठाय यदप्रचेतास्तदाहुरधरागिति ।। २ ।।

'यः' पुरुषः 'जाम्याः' जामिर्भगिनी तया सह, तत्कल्पया सत्या, साध्व्या कुलस्त्रिया सह वा 'अमेथयत्' सङ्गं करोति, तां दूषयतीति यावत्, 'यत्' यः 'सखायं' मित्रं 'दुधूर्षति' हिंसितुमिच्छति, विश्वासघातपूर्वकं तस्यानिष्टं कर्तुं तं हन्तुं वा इच्छति, 'यत्' यः 'ज्येष्ठाय' ज्येष्ठं वयोवृद्धं गुरुजनं प्रति 'अप्रचेताः' अप्रकृष्टचित्तो दुर्मना दुष्टचित्तो दुरात्मा च वर्तते, यद्वा, यो ज्येष्ठो वयोवृद्धः सन्नपि 'अप्रचेताः' न प्रकृष्टं चेतः यस्य, तथाभूतः, निकृष्टचित्तः अज्ञानी अचेतनो वा विद्यते इति भावः, 'तत्' तम् 'अधराक्' अधरम् अधः अञ्चति गच्छतीति सः अधोगामी अधोगतिभाग्, अवनतिप्रवणो वाऽयम् अधोवर्तिदिक्तुल्यः, प्रेतपतियमनदनुचर-भयङ्करपुरुषाद्यधिष्ठिताऽधःस्थिताऽधमतमदिशाऽधराचीसदृशो वाऽयम् इति' इत्येवम् 'आहुः' कथयन्ति तज्ज्ञाः सदसद्विवेकविचक्षणा इति शेषः ।

'अमेथयत्' इत्यस्य स्थाने 'अप्रथयत्' इति पाठे तु पर्थयति, प्रक्षिपति तिरस्करोति वा जामिं स्वसारं कुलवधूं वेत्यर्थो बोध्यः ।

स्वभगिनीसङ्ग-कुलस्त्रीसतीत्वभङ्ग-मित्रद्रोह-विश्वासघात-वयोवृद्धजनावमानकर्तुर्जनस्य विवेकभ्रष्टत्वात् 'भवति विनिपातः शतमुखः' । जघन्यगुणवृत्तिरसौ तामसो जनोऽधोऽधो गच्छति निम्नातिनिम्नयोनीः, आपातालतलम्, गुणसङ्गस्य सदसद्योनिजन्मकारणत्वात् । तथा चोक्तं गीतायाम्—'जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः' (१४.१८), 'कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु' (१३.२१) इति । सामाजिकाचारमर्यादावहेलनात् स समाजच्युतवद् बहिष्कार्यः ।

व्याकरणम्

जाम्याः—'जामिरन्येऽस्यां जनयन्ति । जामपत्यं, जमतेर्वा स्याद् गतिकर्मणो निर्गमनप्राया भवति' इति निरुक्तम् (३.१.६) । 'जनी प्रादुर्भावे' (दि०आ०से०) इत्यतः 'इणजादिभ्यः' इति वार्तिकेन (अष्टा० ३.३.१०८) इण्प्रत्ययोऽधिकरणे । उपधावृद्धिः । नस्य मः पृषोदरादिवत् । अथवा, जायते मातापितृभ्यां (सकाशाद्) इति जाः । 'जा'शब्दोऽपत्यवचनः (निघ० २.२) । 'जनी प्रादुर्भावे' (दि०आ०से०) इत्यस्मात् 'अन्येष्वपि दृश्यते' (अष्टा० ३.२.१०१) इत्यनेन डप्रत्ययः । डित्त्वाट्टिलोपः । टाप् । जां मिनोति प्रक्षिपतीति जामिः । 'डुमिञ् प्रक्षेपणे' (स्वा०उ०अ०) इत्यतो विच् । गुणाभाव आर्षः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा हि पतिकुलं गच्छन्ती पुत्रिका सती पितुर्गृह एव अपत्यं प्रक्षिपतीति जामि-रुच्यते ।

यद्वा जमति गच्छति पितुर्गृहात् कुलाद्वा पतिकुलमिति जामिः । जमते-र्गतिकर्मणः (निघ० २.१४) कर्तरि इण् बाहुलकात् ।

किंवा जमति गच्छति विरुद्धमिति जामिः । यथा—जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः (मनु० ३.५८) । पूर्ववद् इण् । 'जामिः स्वसृकुलस्त्रियोः' इत्यमरः (३.१४२) । जामिशब्दात् द्वितीयैकवचने तृतीयैकवचने वा विवक्षिते व्यत्ययेन षष्ठयेकवचनम् ।

अमेथयत्—'मेथृ मेधाहिंसयोः सङ्गमे च' (भ्वा०उ०से०) इत्यतो णिजन्तात् लट्प्रथमपुरुषैकवचनविवक्षायां व्यत्ययेन लङ् ।

दुधूर्षति—ध्वर्तुमिच्छति । 'ध्वृ हूर्च्छने' हूर्च्छनं कौटिल्यम् (भ्वा०प०अ०) इत्यतः सन्नन्ताल्लट्प्रथमपुरुषैकवचने रूपम् ।

यद् भद्रस्य पुरुषस्य पुत्रो भवति दाधृषिः ।
तद्विप्रो अब्रवीदुदग् तद् गन्धर्वः काम्यं वचः ।। ३ ।।

'यद् भद्रस्य पुरुषस्य पुत्रः' यो मङ्गलाचारस्य, परेषां सुखदातुर्मनुष्यस्य तनयः 'दाधृषिः' दुरितधर्षकः, पापपराभवकर्त्ता 'भवति' जायते 'तद् विप्रः उदग् अब्रवीत्' तं ज्ञानदीप्तः, दिव्यप्रकाशप्रदाता, दिव्यज्योतिषा परेषां पूरयिता मेधावी उदग् उद ऊर्ध्वम् अञ्चति गच्छति, ऊर्ध्वगामी, ऊर्ध्वारोही, उदयभाग् अयम् इति कथयति 'तद् काम्यं वचः' एतत् कमनीयं, प्रियं मनोहरं च वचनं 'गन्धर्वः' गां वेदवाणीं चिद्रश्मीन् वा धारयतीति तथाभूतः परमदेवः परमेश्वरः 'अब्रवीत्' इति पुनरन्वीयते ।

यश्च पणि रघुजिष्ठयो यश्च देवाँ अदाशुरिः ।
धीराणां शश्वतामहं तदपागिति शुश्रुम ।। ४ ।।

'यः' पुरुषः 'च' पुनः 'पणि' पणनकर्ता वणिक्, वाणिज्यव्यवसायसञ्चितविपुलैश्वर्यः सन्नपि 'रघुजिष्ठ्यः' रघुर्लघुरित्यनर्थान्तरं, रलयोरभेदात्; रघुषु लघुषु, क्षुद्रचेतःसु जिष्ठ्यं ज्येष्ठत्वं, प्रधानत्वं यस्य सः, क्षोदिष्ठप्रकृतिः, अनुदारचेताः, 'यः' पुमान् 'च' 'देवान्' यागे अग्नीन्द्रादीन् प्रति, समाजे देवोपममानवान् प्रति वा 'अदाशुरिः' अदानशीलः, कृपणः कदर्यो वा तद् सः 'अपाक्' पश्चिमः, समाजे सकलजनानां पृष्ठवर्ती अधमाधमो नरापसदोऽस्ति 'इति' इत्येतद् 'अहं' वयं, वचनव्यत्ययः, 'शश्वतां' सर्वेषां, यद्वा शाश्वतानां, चिरञ्जीविनां, दीर्घायुषां 'धीराणां' धी-रतानां प्राज्ञानां सकाशात् 'शुश्रुम' श्रुतवन्तः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषविवरणम्

अस्य सूक्तस्य प्रथममन्त्रे पुण्याचाराणां पूतात्मनां प्राक्त्वं, प्राथम्यं, प्राधान्यं प्रशस्तत्वं वा प्रोक्तम् । अत्र च पापात्मनामपाक्त्वं, सभ्यसमाजे पश्चवर्तित्वं, नीचतमपदयोग्यत्वं, धीरसमाजाद् बहिष्कार्यत्वम्, अपवर्ज्यत्वं, दूरतो नमस्कार्यत्वं परिहर्तव्यत्वं च प्रतिपादितमिति दिक् ।

पणि:—'पणि' इति प्रथमैकवचनार्थे लुप्तविभक्तिक आर्षप्रयोग: । पणिर्वणिक्, कृपण:, कदर्य:, देवेभ्यो हविरदाता, दिव्यनिधेरपहर्ता, गूहिता ईर्ष्यालुर्गोपिता चेति लोकप्रसिद्धोऽर्थोऽस्य वैदिकशब्दस्य । वेदस्य गुह्यार्थेऽस्य विशेषभावोऽत्र उपन्यस्यते वेदतत्त्वदर्शिश्रीअरविन्दचरणानामेव परमौजस्विवाचा—

"ये जना: स्वान्त:स्थितमानन्दं दिव्यशक्ती: प्रति हवीरूपेण नार्पयन्ति, प्रत्युत आत्मानम् ऐन्द्रियजीवनाय निम्नजीवनाय च आरक्षितुं रोचयन्तेतराम् ते पणीनां पूजका न तु देवानाम् । पणयस्तावद् ऐन्द्रियचेतनाया अधिपतयो ये तस्या: सङ्कीर्णक्रियास्वेव पणन्ते व्यवहरन्ते च, रहस्यमयं सोमं न सुन्वन्ति, विशुद्धं हविर्नार्पयन्ति, पावनसूक्तं नोद्गायन्ति । त एव ज्योतिर्मयचेतनाया दिव्यरश्मीन्, सूर्यस्य देदीप्यमाना गा अस्मत्सकाशाच्चोरयित्वा अवचेतनस्य गुहायां जडप्रकृतेर्गहनाद्रौ च निरुन्धन्ति । यदा च प्रकाशमयसम्बोधिस्वरूपा देवशुनी सरमा तासां गवां पदचिह्नानि अनुसरन्ती तेषां गुहाम् उपसीदति तदा ते तामपि कलुषयन्ति ।"—वेदरहस्यम्, पृ० १३

"सरमा च सत्यगवेषिणी अन्तर्ज्ञानशक्ति: । साऽवचेतनस्य गुहां प्रविशति यत्रैन्द्रियक्रियाया: कृपणाधिपतिभि: (पणिभि:) 'सूर्यस्य' देदीप्यमाना गावो गोपिता: । ततश्च सा इन्द्राय (गोविषयक) सूचनां ददाति । अथ प्रकाशमानमनसोऽधिपतिरिन्द्र उपेत्य, गुहां निर्भिद्य गोयूथानि उपरि चोदयति, 'उदाजत्', उपरि बृहत् सत्यचैतन्यं, देवानां स्वीयसदनं (स्वं दमम्) प्रति ।"

रघुजिष्ठय:—अस्यस्थाने 'अभुजिष्ठ:' इति पाठे तु न भुङ्क्ते भोजयति वा इति अभुक्, सर्वेषामतिशयेन अभुक् इति अभुजिष्ठ:, अभोक्तृतम:, अल्पतमभोक्ता, अल्पार्थे नञ्, नराधमस्य प्राकृतजनस्य भुजिक्रियायां अत्यन्ताभावस्य असम्भवत्वात्, यद्वा अन्येषाम् अभोजयिता, कृपणशिरोमणित्वात् परेषां न कदापि भोजनप्रदाता, अर्थिभ्योऽन्नवस्त्रादेरप्रदानेन तेषाम् अपालयिता (भुज पालनाभ्यवहारयो:)।

'देवान्' इत्यस्य स्थाने 'रेवान्' इति पाठे तु रेवान् रयिमान्, ऐश्वर्यवान् सन्नपि अदाशुरि: अदानशील इत्यर्थो बोध्य: ।

समृद्धिशाली सन्नपि य: पुमान् स्वोपार्जितधनस्य दानमुपभोगञ्च न प्रकुरुते स कदर्य: परमपामरश्चेति प्राह भगवान् वेद: ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा चोक्तं प्राज्ञैः—

दानात् प्रतिष्ठा लोकेऽस्मिन् न तु वित्तस्य संचयात् ।
ऊर्ध्वंस्थितिः पयोदानां समुद्राणामधस्तथा ॥[1]—कश्चित्

द्वावप्सु प्रवेशितव्यौ[2] कण्ठे बद्ध्वा दृढां शिलाम् ।
धनवन्तमदातारं दरिद्रञ्चातपस्विनम् ॥—नारदप्रोक्तजीवनसंहिता

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥
—भर्तृहरिः (नीतिशतके)

दानोपभोगवन्ध्या या सुहृद्भिर्या न भुज्यते ।
साऽपीह यदि लक्ष्मीः स्यादलक्ष्मीः कतमा भवेत् ॥

शश्वताम्—पदमिदमस्माभिरत्र 'सर्वेषाम्' इत्यर्थेऽपि व्याख्यातम् । मोनियर-विलियम्स-कोषकारैरप्यस्य 'numerous, many, ever-recurring, all, every' इत्यादिष्वर्थेषु प्रयोगा उद्धृताः । नित्यार्थे प्रसिद्धस्यास्य बहु-सर्वाद्यर्थंकत्वं सर्वथा सुसङ्गतमेव, सर्वस्यापि समष्टिशो व्यष्टिशश्च नित्यशाश्वतसत्तान्तर्गतत्वात् 'एकं सत्', 'तत् सत्' इत्येवं ख्यातस्य एकाद्वितीयनित्यसतो वाचकः 'शश्वत्' इति शब्दो बहुवचने प्रयुक्तः तस्यैवैकस्य सतो देशकालावच्छिन्नानां सम्भूतीनां, बहूनां सर्गेषां वा वाचको भवतीति सर्वं निरवद्यम् ।

अपाक्—कुन्तापसूक्तेषु अष्टमे चतुस्त्रिंशदुत्तरशततमे सूक्ते इदं पदं प्रतिमन्त्रमुपात्तम् 'इहेत्थ प्रागपागुदगधराग्' इति प्रथमचरणे । तत्रैतत् प्रतीचीवाचकमिति परिस्फुटमिव । 'प्राच्यपाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः' इति अमरकोषकारैः (१.३.१) 'अपाची'पदस्य दक्षिणदिग्वाचित्वस्वीकारेऽपि वेदेऽयं पश्चिमदिग्वचनः प्रेक्ष्यतेऽनेकत्र, 'यदिन्द्र प्रागपागुदङ् न्यग्वा हूयसे नृभिः' (ऋ० ८.४.१) इत्यत्र सायणाचार्यैः अपाक् प्रतीच्यां दिशि वर्तमानैरिति व्याख्यानात्, 'न्यक्'शब्दश्च तत्र 'नीच्यां दिश्यधस्ताद्वर्तमानैः' इत्येवं व्याख्यातत्वाद् 'अधराक्' समानार्थकः । अथर्ववेदभाष्यकारैः श्रीक्षेमकरणदासत्रिवेदिभिरपि स्वीयभाष्ये (अथर्व० २०.१२०.१) मन्त्रमिमं व्याचक्षाणैः 'अपाक्' इति शब्दः 'प्रतीच्यां दिशि' इत्येवं विवृतः । प्रकृतमन्त्रेऽपि स एवार्थः सङ्गत इति दिक् ।

व्याकरणम्

पणि—'पणि'शब्दात् 'सुपां सुलुक्' इत्यादिना सोर्लुक् ।

रघुजिष्ठ्यः—लघुज्येष्ठ्यः । ज्येष्ठस्य भावो ज्येष्ठ्यम् । भावे यत् बाहुल-

---

१. गौरवं प्राप्यते दानान्न तु वित्तस्य संचयात् ।
स्थितिरुच्चैः पयोदानां पयोधीनामधःस्थितिः ॥—सुभाषितरत्नभाण्डागारम्

२. प्रवेशितव्याविति आर्षः प्रयोगः । यद्वा, 'प्रवेशयेदुभावप्सु' इति वाच्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कात् । ज्येष्ठ्यमेव जिष्ठ्यम् । वर्णविकारः सम्प्रसारणादिकं वा छान्दसम् ।

लघुषु जिष्ठ्यं यस्य स इत्यर्थे बहुव्रीहौ, रलयोरभेदात् रघुजिष्ठ्य इति साधुः ।

अदाशुरिः—दाशतीति दाशुरिः । 'दाशृ दाने' (भ्वा० उ० से०) इत्यत औणादिक उरिन् बाहुलकात् (उणा० २.७४) । न दाशुरिरित्यदाशुरिः । नञ्तत्पुरुषः ।

ये च देवा अयजन्ताथो ये च परादिदः ।
सूर्यो दिवमिव गत्वाय मघवानो वि रप्शन्ते ।।५।।

'ये च देवाः' अपि च, ये देवोपममानवा 'अयजन्त' देवाधिदेवं परमात्मानं यजन्ते, यजनेन च तेन सह सङ्गता योगयुक्ता वा भवन्ति, अथवा. 'ये च' अपि च ये 'देवाः' देवान्, द्वितीयार्थे प्रथमा, अग्नीन्द्रादीन् 'अयजन्त' यथाविधि यजन्ते, यजनेन च तैः सह सङ्गताः, तत्तद्देवेन सारूप्यमुपेताः तत्तद्दिव्यताविद्योतिताश्च सञ्जाताः, 'अथो ये च' अथो च इति समुच्चये, अन्ये 'परादिदः' परादयो विद्यन्ते, वचनव्यत्ययः, परान् कामादीनन्तारिपून् बाह्यांश्च शत्रून् आददते निगृह्णन्ति, वशीकुर्वन्ति, यद्वा परेभ्यः स्वेतरेभ्यः सर्वेभ्योऽपि निर्विशेषं ददति स्वकीयं लौकिकमलौकिकञ्चैश्वर्यं वितरन्ति तदीयाभ्युदयनिःश्रेयसकामाः सर्वभूतहितरताश्च सन्त इति शेषः, ते 'मघवानः' महनीय-मंहनीय-महामहिमसमृद्धिसम्पन्ना इन्द्रोपमाः पुमांसः 'सूर्यः इव दिवं गत्वाय' द्युलोकं गतो दिवमधिश्रितो भास्कर इव दिवं द्युलोकं, स्वर्लोकम् उच्चतमज्योतिर्लोकं गत्वा 'वि रप्शन्ते' विराजन्ते ।

भावार्थः—महीयन्ते खलु मघवानो विभासन्ते च देवयजनब्रह्मोपासनस्वर्लोकसमारोहण-सर्वेश्वरसायुज्यसम्भजनजन्यसौरभासा, स्वीयैश्वर्यविश्राणनपुरःसरमवंभूतहितसम्पादनस्वरूपदिव्यसम्पत्तेजसा च इति भावः ।

'दिवं गत्वाय' इति पदाभ्यां तेषामूर्ध्वगतिर्व्यज्यते, ऊर्ध्वदिवसम्बन्धाच्च सकललोकचूडामणित्वम् । 'ऊर्ध्वं गच्छन्ति सत्त्वस्थाः' (गीता १४.१८) इति भगवद्वचनाच्च उत्तरोत्तरमूर्ध्वमारोहन्तस्ते ब्रह्मसायुज्यमासाद्य ब्रह्मलोकमधितिष्ठन्तीति रहस्यम् ।

विशेषविवरणम्

मघवानः—चतुर्थमन्त्रे पणीनामपाक्त्वं प्रतिपादितं कतिचिद्विशेषणैः । तच्चास्माभिर्वेदमन्त्रावलम्बिश्रीअरविन्दवचोभिः प्रपञ्चितं प्रतरां तन्मन्त्रव्याख्याने । अत्र तु पणीनां मघोनां च प्रकृतिवैषम्यं मन्त्रवर्णैरेव उपवर्ण्य प्रकृतमन्त्रस्य विवक्षितं विशदीक्रियते । तद्यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मघोनां स्वरूपम्—

तवोतिभिः सचमाना अरिष्टा बृहस्पते मघवानः सुवीराः ।
ये अश्वदा उत वा सन्ति गोदा ये वस्त्रदाः सुभगास्तेषु रायः ॥
(ऋ० ५.४२.८)

ऐषु धा वीरवद् यश उषो मघोनि सूरिषु ।
ये नो राधांस्यह्रया मघवानो अरासत सुजाते अश्वसूनृते ॥
(ऋ० ५.७९.६)

एतानि भद्रा कलश क्रियाम कुरुश्रवण ददतो मघानि ।
दान इद् वो मघवानः सो अस्त्वयं च सोमो हृदि यं बिभर्मि ॥
(ऋ० १०.३२.९)

त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
यन्तारो ये मघवानो जनानामूर्वान् दयन्त गोनाम् ॥
(ऋ० ७.१६.७)

पणीनां स्वरूपम्—

न देवत्वं पणयो नानशुर्मघम् । (ऋ० १.१५१.९)

उच्छन्तीरद्य चितयन्त भोजान् राधोदेयायोषसो मघोनीः ।
अचित्रे अन्तः पणयः ससन्त्वबुध्यमानास्तमसो विमध्ये ॥
(ऋ० ४.५१.३)

मघोनां महिमा—

यान् राये मर्तान् त्सुषूदो अग्ने ते स्याम मघवानो वयं च ।
(ऋ० १.७३.८)

प्र बोधयोषः पृणतो मघोन्यबुध्यमानाः पणयः ससन्तु ।
रेवदुच्छ मघवद्भ्यो मघोनि रेवत् स्तोत्रे सूनृते जारयन्ती ॥
(ऋ० १.१२४.१०)

वि पृक्षो अग्ने मघवानो अश्युर्वि सूरयो ददतो विश्वमायुः ।
(ऋ० १.७३.५)

ऊती देवानां वयमिन्द्रवन्तो मंसीमहि स्वयशसो मरुद्भिः ।
अग्निर्मित्रो वरुणः शर्म यंसन् तदश्याम मघवानो वयं च ॥
(ऋ० १.१३६.७)

पणीनां परिगर्हणा—

चोष्कूयमाण इन्द्र भूरि वामं मा पणिर्भूरस्मदधि प्रवृद्ध ।
(ऋ० १.३३.३)

हता इन्द्रेण पणयः शयध्वे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

असेन्या वः पणयो वचांस्यनिषव्यास्तन्वः सन्तु पापीः ।
अधृष्टो व एतवा अस्तु पन्था बृहस्पतिर्व उभया न मृळात् ॥
दूरमित पणयो वरीय उद्गावो यन्तु मिनतीर्ऋतेन ।
बृहस्पतिर्या अविन्दन्निगूळ्हाः सोमो ग्रावाण ऋषयश्च विप्राः ॥

(ऋ० १०.१०८.४, ६, ११)

अयमाशयः—अन्न-वस्त्र-गवाश्व-ज्योतिःशक्तिप्रदातारः सुवीरा मघवानः खलु सुभगसम्पदः । त एव बृहस्पतेरूतीर्भजन्ते रक्षण-प्रीणन-तर्पण-संवर्धन-ज्ञानोद्दीपनादिरूपाः, भवन्ति च अक्षतजीवनाः, वीरवत्तमाः, दिग्दिगन्तविततयशसश्च । त एव विन्दन्ति इन्द्रस्य सोमस्य चैश्वर्यं दिव्यज्योतिरानन्दस्वरूपम् । दानवीरास्त एव भवन्ति सकलजननियन्तारः, अग्नेः प्रियाः स्तोतारः । तेषां दानवीरत्वं प्रदीप्ततेजःपुञ्जत्वञ्च 'मघवत्' इति शब्दस्य व्युत्पत्त्यापि समर्थ्यते । मघमिति धननामधेयं मंहतेर्दानकर्मणो वा मंहयतेर्दीप्तिकर्मणो वा, महतेर्मंहयतेर्वा पूजाकर्मणः । अतः दानप्रयोजनं, दीप्ति(तेजो)मयं, पूज्यं, कीर्तियोग्यं धनमेव मघमिति बोध्यम् । तादृशधनशालिन एव मघवानः ।

एतद्विपर्ययेण पणयो न देवत्वमश्नुवते नो मघम्—न देवत्वं पणयो नानशुर्मघम् । अलसाः, सतन्द्राः, स्वप्नशीला निद्रालवश्च ते शेरते गाढान्धतमसे, स्वपन्ति अज्ञानसाम्राज्ये, न च भवन्ति भाजनानि उषसो वैभवस्य नवदिव्यचिज्ज्योतिःस्वरूपस्य भोजैर्मघवद्भिरेव लभ्यस्य ।

मघवान एव प्राप्नुवन्ति अग्निदेवस्य सत्प्रेरणं प्रबोधनञ्च सकलैश्वर्यमूलम्, त एव अश्नुवते अग्निदेवाल्लभ्याः सर्वविधास्तृप्तीः, देवानामूतीः, अग्निमित्रावरुणानां परमवरणीयं शरणं सकलकष्टक्लेशहरणं, शान्तिकरणं, भवसन्तरणं, निःश्रेयसभरणम् ।

पणयः पुनः पापमयतनवः, पराक्रमरहिताः नपुंसकाः, सत्पुरुषाऽगम्यमार्गगामिनः, बृहस्पत्यादिदेवानुग्रहानधिकारिणो दूरातिदूरं द्रावणीयाः सभ्यसमाजात्, येन पणिगुहातः प्रमुक्ता ज्ञानज्योतीरश्मयः प्रसरन्तु मानवसमाजे मघोनां देवपूजा-सङ्गतीकरण-दानादिधर्मसाम्राज्यसंवर्धका इति सारः । परिहरणीयं खलु पणित्वं, कदर्यत्वं, कृपणत्वं, सामाजिकारातित्वम् । पणित्वमपरिहरन्तः निषूद्यन्ते इन्द्रेण मानवस्य महनीय-महामहिम-मघवत्त्वकामेन ।

व्याकरणम्

परादद्दिः—आददातीति आदद्दिः । 'आदृगमहनजनः किकिनौ लिट् च' (अष्टा० ३. २. १७१) इत्यनेन आङ्पूर्वाद् ददातेस्तच्छीलादिष्वर्थेषु किप्रत्ययः, तस्य लिड्वद्भावश्च । द्वित्वे, अभ्यासह्रस्वे, कित्वादातो लोपे च रूपम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परानाददातीति परादिः । परेभ्यो ददातीत्यर्थे तु 'पर'शब्दस्यान्त्यदीर्घश्छान्दसः ।

गत्वाय—गमेः परस्य 'क्त्वा'प्रत्ययस्य 'क्त्वो यक्' (७. १. ४७) इत्यनेन यगागमश्छान्दसः ।

D 04052

वि रप्शन्ते—'वि रप्शते विविधं राजते' इति ऋग्वेदभाष्ये (४. ४५. १) सायणः स्वामिदयानन्दश्च । तन्मतेन रप्शतिर्दीप्तिकर्मा छान्दसो धातुरूह्यः । यद्वा 'रप लप व्यक्तायां वाचि' इति धातुपाठे पठितो व्यक्तवागर्थको रपतिरत्र दीप्त्यर्थको बोध्यो धातूनामनेकार्थत्वात् । पदव्यत्ययः शकारागमश्च छान्दसो ।

यद्वा, व्यक्तवागर्थको रपतिः व्यञ्जनसामान्यवाचको वेद्यः । व्यञ्जनञ्च प्रकाशनं, दीपनं विराजनं वा, विपूर्वकस्य अनक्तेर्विशिष्टकान्तिदीप्त्यर्थबोधनसामर्थ्यादिति दिक् ।

गुरुकुल कांगड़ी पुस्तकालय

अपि वा, निघण्टौ महन्नामसु पठिताद् 'विरप्शी' इति पदात् क्विपा नामधातुं विरचय्य तस्माद् 'विरप्शन्ते' इति रूपं निष्पाद्यम् छान्दसम् ।

वि रप्शन्ते=महीयन्ते निजतेजःपुञ्जप्रतापादिभिरित्यर्थः ।

अथ षट् जनकल्पाः

D 04052

योऽनाक्ताक्षो अनभ्यक्तो अमणिवो अहिरण्यवः ।
अब्रह्मा ब्रह्मणः पुत्रस्तोता कल्पेषु संमिता ॥६॥

(२०.१२८.६)

अस्या ऋच आरभ्य २०.१२८.११ ऋक्पर्यन्ताः षड् ऋचः जनानामुच्चावचवर्गविशेषवर्णनात् 'जनकल्पा ऋच' इत्याख्ययाऽऽख्यायन्ते । नरो निम्नवर्गान् विहाय तत्तदुच्चवर्गान्तर्गतो भूत्वा परमपुरुषार्थं सम्पादयेदिति वेदगिरोऽन्तर्गर्भितमिङ्गितमिति दिक् ।

तासु जनकल्पासु आद्या व्याख्यायते ।

'यः' पुमान् 'अनाक्ताक्षः' अनाक्तम् अपवित्रम् अक्षि चक्षुर्दृष्टिर्वा यस्य सः, अपवित्रदृष्टिः, कामादिविकारविद्धवीक्षणः ईर्ष्याद्वेषादिदूषितदृष्टिर्वा, ज्ञानाञ्जनशलाकया अनक्तनेत्रतया अनुन्मीलितलोचनः अज्ञानतिमिरान्धो वा । यद्वा, अनाक्तानि अपवित्राणि अक्षाणि इन्द्रियाणि यस्य सः, विषयवासनाविदूषितेन्द्रियोऽपवित्रान्तरङ्गो वा । अपि वा, अनाक्तानि अपवित्राणि अक्षाणि व्यवहारा यस्य सः, अनृताऽनार्जवादिदोषदूषितव्यवहार इत्यर्थः, अनभ्यक्तः अनभिव्यक्तः, प्राकाश्यमप्राप्तः, अप्रख्यात इति यावत्, यद्वा, अभ्यङ्गवर्जितः, तैलामर्दनेन अङ्गरागाऽलेपनेन च स्वास्थ्यसौन्दर्यविरहितः, अस्निग्धसंहननः, अनाकर्षकाङ्ग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संहतिरित्यर्थः, 'अमणिवः' रत्नाभरणविहीनः, 'अहिरण्यवः' स्वर्णभूषणाऽनलङ्कृतः, यद्वा, हिरण्यं स्वर्णं तच्च रजतादिमहार्घद्रव्याणामप्युपलक्षणम्, न सन्ति हिरण्यानि अस्येति अहिरण्यवः, स्वर्णरजतादिनिधिविहीनो निर्धनः, अथ च यः 'ब्रह्मणः पुत्रः' वेदाध्येतुर्ब्रह्मवेत्तुश्च पुत्रः सन्नपि 'अब्रह्मा' वेदस्य अनध्येता, अवेदज्ञः, ब्रह्मज्ञानरहितश्च अज्ञानी वर्तते, ता उ ता तान्येतानि दूषितदृष्टिमत्त्व-विकृतेन्द्रियत्व-स्वास्थ्यसौन्दर्यसम्पत्समृद्धिराहित्य-वेदविद्याब्रह्मज्ञानशून्यत्वादीनि 'कल्पेषु' कल्पशास्त्रेषु, विधिग्रन्थेषु, तदीयविधिविधानेषु क्रियासामर्थ्येषु वा संमिता समानत्वेन मितानि सम्भावितानि, तुल्यत्वेन मतानि परिगणितानि वा, गुण-हीनत्वसाधर्म्यादिति भावः। यद्वा, 'ता उ ता कल्पेषु संमिता', लिङ्गव्यत्ययः, त एते सर्वे अनाक्ताक्षाऽनभ्यक्ताऽमणिवादयः पूर्वोक्ताः शास्त्रविधानेषु समान-कोटिकाः गुणहीनजनवर्गपरिगणितत्वात्।

अथवा—'यः' जनः 'अनाक्ताक्षः' अञ्जनाऽरञ्जितलोचनः, 'अनभ्यक्तः' अमर्दिततैलोद्वर्तनः, अभ्यङ्ग-मलाऽपकर्षण-पिष्टकादिवर्जितत्वादपवित्रगात्रः, 'अमणिवः अहिरण्यवः' मणि-माणिक्य-स्वर्णरजताद्यलङ्कारैर्वर्जितः तज्जन्यतेजो-विरहितश्च 'ब्रह्मणः पुत्रः अब्रह्मा' ब्राह्मणस्य पुत्रः सन्नपि ब्राह्मणगुणकर्म-स्वभावशून्यः। शेषं पूर्ववत्।

अथ (यः ब्रह्मणः पुत्रः अब्रह्मा) यो ब्राह्मणस्य पुत्रः सन्नपि अब्राह्मणः इति वचनात् वैदिकी वर्णव्यवस्था गुणकर्मानुसारिणी न तु जन्मना जात्या वेति प्रसिद्धयति प्राञ्जलपरमौजस्विमन्त्रवर्णैः। तथा चोक्तं मनुमहाराजैः श्रुत्यर्थानु-सारिस्मृतिकारैः (मनुस्मृतिः अ० २)—

उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता।
ब्रह्म जन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् ॥१४६॥
कामान्माता पिता चैवं यदुत्पादयतो मिथः।
संभूतिं तस्य तां विद्याद् यद् योनावभिजायते ॥१४७॥
आचार्यस्त्वस्य यां जातिं विधिवद् वेदपारगः।
उत्पादयति सावित्र्या सा सत्या साऽजरामरा ॥१४८॥
ब्राह्मस्य जन्मनः कर्ता स्वधर्मस्य च शासिता।
बालोऽपि विप्रो वृद्धस्य पिता भवति धर्मतः ॥
अज्ञो भवति वै बालः पिता भवति मन्त्रदः ॥१५०॥
मातुरग्रेऽधिजननं द्वितीयं मौञ्जीबन्धने।
तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनात् ॥१६९॥
तत्र यद् ब्रह्मजन्मास्य मौञ्जीबन्धनचिह्नितम्।
तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ॥१७०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदप्रदानादाचार्यं पितरं परिचक्षते ।
शूद्रेण हि समस्तावद् यावद् वेदे न जायते ।।१७२।।

व्याकरणम्

अनाक्ताक्षः—आङ्पूर्वादनक्तेर्निष्ठायाम् 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' (रु० प० वे०) इत्यतो निष्ठायाम्, ऊदित्वाद् वैकल्पिके इडभावे, उपधानकारलोपे, जकारस्य कुत्वे चर्त्वे च आक्तमिति रूपम् । न आक्तमिति अनाक्तम् । नञ्तत्पुरुषः । अनाक्तमक्षि यस्य सः अनाक्ताक्षः । समासान्तः षच् (पा० ५.४. ११३) ।

यद्वा, अश्नुवते व्याप्नुवन्ति विषयानिति अक्षाणि इन्द्रियाणि । अपि वा, अश्यन्ते व्याप्यन्ते इन्द्रियैरिति अक्षाणि व्यवहाराः । तथा चाहुः भगवत्पाददयानन्दसरस्वतीस्वामिनः उणादिसूत्रव्याख्यायां 'वैदिकलौकिककोषा'ऽऽख्यायाम्—"अश्नुते व्याप्नोतीति अक्षः; अक्षाणि इन्द्रियाणि, तुषं, चक्रं, शकटं व्यवहारो वा" (श्रीयुधिष्ठिरमीमांसकसम्पादिते उणादिकोषे, पृ० ६४) ।

अनाक्तानि अक्षाणि इन्द्रियाणि व्यवहारा वा यस्य सोऽनाक्ताक्षः ।

अनभ्यक्तः—न अभ्यक्त इति अनभ्यक्तः । अभिपूर्वादनक्तेर्निष्ठायाम् अभ्यक्तमिति रूपं पूर्ववन्निष्पाद्यम् । न अभ्यक्त इति अनभ्यक्तः ।

अमणिवः—मणिरस्यास्तीति मणिवः । 'वप्रकरणेऽन्येभ्योऽपि दृश्यते इति वक्तव्यम्' इति वार्तिकेन (पा० ५.२.१०६) मत्वर्थीयो वप्रत्ययः । न मणिवः इत्यमणिवः ।

अहिरण्यवः—हिरण्यमस्यास्तीति हिरण्यवः । न हिरण्यवः इति अहिरण्यवः । अमणिव इति पदवत् व्युत्पाद्यम् ।

ता—तानि । 'शेश्छन्दसि बहुलम्' (पा० ६.१.७०) इति शेर्लोपः । 'नलोपः प्रातिपदिकान्तस्य' (पा० ८.२.७) इति नलोपः ।

संमिता—संमितानि । सम् इत्युपसृष्टात् मातेर्मिमीतेर्मायतेर्वा निष्ठान्तात् प्रथमाबहुवचने रूपम् । शेर्लोपो नलोपश्च 'ता' इति पदवत् बोध्यः ।

य आक्ताक्षः स्वभ्यक्तः सुमणिः सुहिरण्यवः ।
सुब्रह्मा ब्रह्मणः पुत्रस्तो ता कल्पेषु संमिता ।।७।।

'यः' जनः पूर्वमन्त्रवर्णितापवित्रपुरुषविपर्ययेण आक्ताक्षः पवित्रदृष्टिः, प्रयतेन्द्रियः, शुद्धव्यवहारः, अञ्जनरञ्जितनेत्रः, स्वभ्यक्तः, सुविख्यातः, सम्यक्तैलमर्दनोद्वर्तनसुगन्धिद्रव्यानुलेपनमसृणितगात्रः, स्वस्थ-सुन्दर-सुपुष्ट-सुमृष्ट-सुवासिततनुः 'सुमणिः' सुशोभनमणिमाणिक्यमण्डितः, सुपरिहितरत्नहारः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'सुहिरण्यवः' सुन्दरस्वर्णाभरणसमलङ्कृतः, तेजःपुञ्जभ्राजमानः, 'ब्रह्मणः पुत्रः सुब्रह्मा' वेदब्रह्मवेदितुः तनयश्च, स्वयं शब्दब्रह्मणि सम्यङ् निष्णातः परब्रह्मणः सुवेदिता च 'ता उ ता' लिङ्गव्यत्ययः, त एते आक्ताक्षादयः कल्पेषु संमिता इति गतम् । यद्वा, 'ता उ ता' तान्येतानि परिपूतदृष्टिमत्त्वप्रयतेन्द्रियत्व-विशुद्ध-व्यवहारत्वादीनि कल्पेषु संमिता इति व्याख्यातचरम् । समानकक्षामधिरोहन्ति ईदृशः पुण्यात्मानः तेषाम् इमानि परिपूतदृष्टिविशुद्धव्यवहारादिवैशिष्टचानि दिव्यगुणवैभवानि वेति भावः ।

अप्रपाणा च वेशन्ता रेवाँ अप्रददिश्च यः ।
अयभ्या कन्याकल्याणी तो ता कल्पेषु संमिता ।।८।।

'च' अथ च 'अप्रपाणा' अप्रपाणः, सोराकारश्छान्दसः, प्रकर्षेण पीयते इति प्रपाणं पेयं जलं, यद्वा, प्रकर्षेण पीयतेऽनेन साधनेन अत्र वेति प्रपाणः पिपासूनामवतरणाय निर्मितो घट्टविशेषः, नास्ति प्रपाणं प्रपाणो वा यस्मिन् सोऽप्रपाणा, पेयजलरहितः, घट्टादिलक्षणपानस्थानशून्यो वा, 'वेशन्ता' वेशन्तः, सरोबरः, 'यः च' अपि च यः पुमान् 'रेवान्' धनवान् सन्नपि 'अप्रददिः' अप्रदाता, दानकर्मविरहितः, किञ्च 'कल्याणी' बहिर्मनोरमरूपलावण्यसौशील्यादिशुभलक्षणसम्पन्ना सत्यपि 'अयभ्या' रोगादिवशात् संगमायोग्या, अगम्या, प्रजननशक्तिशून्या, गृहस्थेन सपत्नीकमनुष्ठेयेषु यज्ञादिकर्मस्वपि सहयोगित्वस्वरूप-संगमायोग्या, सहधर्मिणीत्वानुपयुक्ता 'कन्या' कुमारी, यद्वा, कन्या अकल्याणी इति च्छेदं कृत्वा 'शुभलक्षणापेता, दुर्भगा संगमायोग्या च कन्या' इत्येवमर्थो योज्यः, 'ता उ ता' निर्जलसरोवर-क्षारपूतिगन्धपयःपूरितवापिका-कृपणधनपतिदुर्भगाऽगम्यकन्याः 'कल्पेषु संमिता' इति गतम् । इमे सर्वेऽपि समानकोटिमाटीकन्ते इति भावः । यद्वा, तान्येतानि शुष्कह्लदत्व-निर्घट्टजलाशयत्व-कृपणधनिकत्व-रुग्णाऽपरिणेय-कुमारीत्वानि कल्पविधानेषु साम्येन निर्धारितानि अनुपयोगित्व-साधर्म्यात् ।

'अप्रददिश्च यः' इत्यस्य स्थाने 'अप्रतिदिश्ययः' इति पाठे तु प्रतिदेशनमेव प्रतिदिक् (दिश अतिसर्जने, तु० उ० अ०, भावे क्विप्), प्रतिदिशं दानम् अर्हन्तीति प्रतिदिश्याः, अर्हार्थे यत्, तान् याति तदभीष्टं प्रदातुं गच्छति चेष्टते वेति प्रतिदिश्ययः, सोपपदात् यातेः कः । न प्रतिदिश्ययः इत्यप्रतिदिश्ययः, नञ्तत्पुरुषः, सत्पात्रविप्रादिवाञ्छापूरणे दानार्थिदीनदयनीयनराय द्रव्यप्रदाने बाऽप्रवणः कृपणाग्रगण्य इत्यर्थो बोध्यः ।

व्याकरणम्

अप्रतिदिश्ययः—प्रतिपूर्वाद् दिशतेर्भावे क्विपि तदन्तात् 'प्रतिदिशमर्हन्ति'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यर्थे अर्हार्थीयो यत् । ततश्च 'प्रतिदिश्यान् (दानार्हान् आर्तान् गृहागतान्) याति' इत्यर्थे यातेः कः । न प्रतिदिश्यय इति अप्रतिदिश्ययः । नञ्तत्पुरुषः । व्युत्पत्तिरियं मन्त्रार्थे निर्दिष्टचरी ।

यद्वा, प्रतिदेष्टुं योग्याः प्रतिदेश्याः, त एव प्रतिदिश्याः । वर्णव्यत्ययः, प्रति-पूर्वाद् दिशतेः क्यब् वा छान्दस आस्थेयो गुणबाधनार्थः । अग्रे पूर्ववत् ।

अयभ्या—'यभ मैथुने' (भ्वा० प० अ०) इत्यस्मात् कृत्यार्थे 'पोरदुपधात्' (पा० ३.१.९८) इति यत् । न यभ्या इति अयभ्या । नञ्तत्पुरुषः । सङ्गमा-योग्याऽगम्या वेत्यर्थः ।

सुप्रपाणा च वेशन्ता रेवान्त्सुप्रददिश्च यः ।
सुयभ्या कन्या कल्याणी तो ता कल्पेषु संमिता ।।९।।

'च' अपि च, 'सुप्रपाणा' सुपेयजलः, सुशोभनघट्टो वा 'वेशन्ता' तडागः 'यः च' अथ च यो जनः 'रेवान्' लक्ष्मीवान् सन् सुप्रददिः सु अतिशयेन प्रदाता, सत्पात्रेभ्य आर्तेभ्यो गृहागतेभ्यश्चार्थिभ्यः, सुशोभनसात्त्विकदानदाता, दातृ-शिरोमणिरिति यावत्, 'कल्याणी' कमनीया, सौन्दर्यसद्गुणसम्पदाढ्या, कल्याण-करलक्षणोपेता, कल्याणमार्गस्था 'सुयभ्या' सुष्ठु संगन्तुं योग्या, सन्तानोत्पादन-समर्था, सुभगा कन्या च, शिष्टं समानम् । समानश्रेणीमधिश्रयन्ति सुपेयस्वादिष्ठ-सलिलसंपूरित-सरोवर-सुदानवीग्धनेश्वर-सुभग-सद्गुणसमृद्धसुकुमारकन्याः, समा-नार्थक्रियाकारित्वसामर्थ्यात् इति भावः, सुपेयसलिल-सुपानस्थानसमुपेतसरो-वरत्वादीनि वा साम्यं संभजन्ति समुपयोगित्वसाधर्म्यात् ।

'सुप्रददिश्च यः' इत्यस्य स्थाने 'सुप्रतिदिश्ययः' इति पाठेऽपि नार्थे विशेषः ।

परिवृक्ता च महिषी स्वस्त्या चायुधिगमः ।
अनाशुरश्वोऽयामी तो ता कल्पेषु संमिता ।।१०।।

'च' समुच्चयार्थकश्चकारः, किञ्च, 'परिवृक्ता' पत्या परित्यक्ता 'महिषी' पट्टराज्ञी, यद्वा महिषी इति स्त्रीमात्रवाचकः शब्दः, महनीयत्वात् स्त्रीजातेः, 'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' (मनु० ३.५७) इति मनुमहाराजै-र्नार्या महनीयत्वसङ्कीर्तनात्, 'परिवृक्ता महिषी' परित्यक्तगृहधर्मा, सकल-कर्तव्यविरक्ता, धर्मकर्मविच्युता वनिता, 'च' अपि च 'स्वस्त्या' सुखजीवित्व-वासनावशात् 'अयुधिगमः' युद्धाय न गन्तुकामः, कातरसैनिकः, यद्वा 'स्वस्त्या' शोभनास्तित्वयुक्तः, स्वस्थः सुपुष्टश्च सन्नपि 'अयुधिगमः' युद्धपराङ्मुखो रण-भीरुः 'अनाशुः' अशीघ्रगामी, आशुगतिरहितः 'अश्वः' तुरङ्गः, 'अयामी' नियम-मर्यादारहितो नरः, उच्छृङ्खलो मनुष्यः । शेषं व्याख्यातपूर्वम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्तव्यकर्मविच्युता, पतिपरित्यक्ता नारी राजमहिषी वा, सुखकामः, समरकातरः सैनिकः, अनाशुगतिरश्वः, अदान्तोऽनियन्त्रितो नरश्च निन्दनीयत्वेन परस्परतुलामधिरोहन्ति । राजमहिष्याः पतिबहिष्कृतत्वं, कलत्रस्य कर्तव्यविच्युतत्वम्, योद्धुर्युद्धभीरुत्वम्, अश्वस्य अनाशुत्वम्, नरस्य यमनियमशून्यत्वञ्च तुल्यतया तिरस्करणीयानीति भावः ।

'अनाशुरश्वोऽयामी' इत्यस्य चरणस्य स्थाने 'अनाशुरश्चायामी' इति पाठे तु अयमर्थो द्रष्टव्यः—'अनाशुरः' अशीघ्रगामी, अलसः, 'अयामी' असंयतः, प्रशिक्षणेनाऽसाधितत्वाद्, अदान्ताऽसंयतत्वात् स्वाम्यादेशानुसारेण अयाताऽगन्ता वाऽश्व इति शेषः, 'च' इति समुच्चये, च आयामी इति च्छेदः कार्यः, 'च' अयञ्चापरः 'अनाशुरः' अशीघ्रकारी, राष्ट्ररक्षणादौ आत्ययिककार्येऽपि चिरकारी 'आयामी' आ समन्ताद् यच्छति नियच्छति इति राज्यनियन्ता शासकः । शिष्टं समानम् ।

व्याकरणम्

महिषी—–मह्यते पूज्यते इति महिषी । 'मह पूजायाम्' (भ्वा० प० से०, चु० उ० से०) इत्यतः 'अविमह्योष्टिषच्' (उणा० १.४५) इति सूत्रेण टिषच् । टचावितौ । स्त्रीत्वविवक्षायां 'पुंयोगादाख्यायाम्' (पा० ४.१.४८) इति ङीष् ।

अयुधिगमः—योधनमेव युधिः । 'युध सम्प्रहारे' (दि० आ० अ०) इत्यतः 'इगुपधात् कित्' (उणा० ४.१२६) इत्यनेन इन् स च कित् । युधये गच्छति इति युधिगमः । 'युधि'शब्दे उपपदे गच्छतेः खच् मुमागमश्च । न युधिगमः इति अयुधिगमः । नञ्तत्पुरुषः ।

अनाशुरः—आ समन्तात् पूर्णतया वा अश्नुते व्याप्नोत्यध्वानं कार्यक्षेत्रं वेति आशुरः । 'अशू व्याप्तौ सङ्घाते च' (स्वा० आ० वे०) इत्यतः 'शु'शब्देऽनुपपदेऽपि 'शावशेराप्तौ' (उणा० १.४४) इत्यतः उरन् स च णित् बाहुलकात् । णिद्वद्भावात् उपधावृद्धिः । न आशुरः इत्यनाशुरः इति नञ्तत्पुरुषः ।

अयामी—न यातुं शीलमस्येति अयायी । ताच्छीलिको णिनिः । अयायी एव अयामी । वर्णविकारश्छान्दसः । यद्वा, जुहोतेः कर्तरि औणादिकमिनिप्रत्ययवत् (उणा० ३.८४) यातेरपि कर्तरि मिनिर्बाहुलकात् । न यामीत्ययामी, नञ्तत्पुरुषः ।

आयामी—'अनाशुरश्चायामी (अनाशुरः च आयामी)' इति पाठान्तरगत 'आयामी' इति शब्दः 'आ समन्ताद् यन्तुं यमयितुं नियमयितुं वा शीलमस्य' इत्यर्थे आङ्पूर्वाद् यच्छतेः शुद्धात् णिजन्ताद् वा ताच्छीलिके णिनिप्रत्यये साधुः । प्रजागणस्य नियन्ता नियमयिता वा शासक इत्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वावाता च महिषी स्वस्त्यश्च युधिगमः ।
स्वाशुरश्वः सुयामी तो ता कल्पेषु संमिता ॥११॥

'च' इति समुच्चये, अथ च, 'वावाता' वात(वायु)वत् पौनःपुन्येन अतिशयेन च गतिशीला, कर्मण्यतमा, अनवरतं कर्तव्यपरायणा, किंवा, सौरभ-प्रसारिसमीरवत् सुप्रियपुण्यसुगन्धसमुपेता, प्राणिमात्रप्रियप्राणवायुवच्च पत्युः परमप्रेमपात्रीभूता 'महिषी' राजमहिषी, या कापि महिलामतल्लिका वा, 'च' अपि च 'स्वस्त्या' लोककल्याणस्य सुखमयसर्वाङ्गसम्पूर्णसामाजिकाऽस्तित्वस्य जीवनस्य वा भावनया सह, तया भावितः प्रेरितश्चेत्यर्थः, सुखेन सहजानन्देन च 'युधिगमः' युद्धार्थं गमनशीलः शूरसैनिकः 'स्वाशुः अश्वः' सु अतिशयेन, पूजितत्वेन प्रशस्तत्वेन वा आशुगतिशाली तुरगः 'सुयामी' सुसंयतः, सुदान्तो नरः, यद्वा 'स्वाशुः सुयामी अश्वः' जविष्ठः, सुशिक्षितत्वाद् दान्तो विनीतः सुनियन्त्रितः, सुयायी प्रशस्तगतिशाली च हयः इत्यर्थः, शिष्टं समानम् ।

'स्वाशुरश्वः सुयामी' इति चरणस्य स्थाने 'श्वाशुरश्चायामी' इति पाठे एवमर्थयोजना द्रष्टव्या—'श्वाशुरः' शु इति क्षिप्रनाम (निघण्टुः २.१५.१५), आशुरः इति व्याख्यातचरं पूर्वमन्त्रे, शु आशु क्षिप्रं वाऽश्नुतेऽध्वानमिति तथाभूतः, क्षिप्रातिक्षिप्रधावनक्षमः 'अयामी च' अश्वः इति शेषः । 'अयामी' यद्वा 'आयामी' इति पदे विवृतपूर्वे ।

अत्यन्तकर्मठ-कर्तव्यकर्मानुरक्त-पुण्यगन्धोपेत-परमप्रेमास्पद-महनीयमहिला, सर्वभूतसुखसक्तः, लोककल्याणाय धर्मसङ्ग्रामे प्राणोत्सर्गार्थं समुद्यतो योद्धा, सुशिक्षितः, सुविनीतो वेगवत्तमो वाजिवरः, सुदान्तः संयतो नरश्च समानवर्गे सन्निवेशमर्हन्ति सत्करणीयत्वसाधर्म्यात् ।

यद्वा, अनवरतकर्तव्यपरायण-तनुमनःप्राणपुण्यपरिमलपरिपूत-परमप्रेमपात्र-प्रमदात्वादीनि शास्त्रविधानेषु तुल्यतया निर्धारितानि ।

विशेषविवरणम्

स्वस्त्या—लोकभाषायामव्ययस्यापि 'स्वस्ति'शब्दस्य अनव्ययवत् प्रयोगः प्रायिको वेदे, प्रेक्ष्यते चात्र तत्र ब्राह्मण-रामायण-महाभारत-पुराणादिष्वपि अस्येदृश आर्षप्रयोगः, स्वस्ति नाम सकललोककल्याणं, यद्वा, सर्वेषां सुखसौमनस्यमयं सर्वाङ्गसुन्दरमस्तित्वं जीवनं वा ।

व्याकरणम्

वावाता—वावायते इति वावाता अतिशयेन गतिशीला सुगन्धसमृद्धा वा । 'वा गतिगन्धनयोः' (अ० प० अ०) इत्यस्माद् यङन्तात् 'हसि-मृ-ग्रिण्-वा०'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(उणा० ३.८६) इति सूत्रेण तन्प्रत्ययः । 'अतो लोपः' (पा० ६.४.४८) इति यङोऽल्लोपः । 'लोपो व्योर्वलि' (पा० ६.१.६६) इति यलोपः । तन्नन्तात् स्त्रियां टापि साधु ।

यदिन्द्रादो दाशराज्ञे मानुषं वि गाहथाः ।
विरूपः सर्वस्मा आसीत् सह यक्षाय कल्पते ॥१२॥

'इन्द्र' हे इन्द्र ! दिव्यमनसोऽधिपते देव ! 'यद्' यदा त्वम् 'दाशराज्ञे' दश पञ्चज्ञानेन्द्रियपञ्चकर्मेन्द्रियरूपा दशसंख्याका राजानो यस्मिन् तस्मिन् देहराज्ये 'अदः मानुषम्' तं प्रसिद्धं मानुषं जीवं 'विगाहथाः' विलोडयसि, नानायोनिषु क्षिपसि तदा स 'सर्वस्मै विरूपः आसीत्' सर्वेषामपि दृष्टौ विकृतरूपः भवति, स्वतात्त्विकस्वरूपाद् विरुद्धरूपः प्रतिभाति, किन्तु यदासौ इन्द्रियवासनाः परित्यज्य 'सह' त्वया सह संयुज्यते, एकीभवति, इन्द्रियाणां सम्राड् भूत्वा त्वमिव इन्द्रपदवीं प्राप्नोति, इन्द्रस्येमानि इन्द्रियाणि इति इन्द्रियशब्दव्युत्पत्तेः इन्द्रियेषु स्वकीयं विलुप्तप्रभुत्वं पुनः प्राप्य तेषां स्वामी, दिव्यमनस्स्वरूपः तेषां दशेन्द्रियाणां वास्तविकराजः, दिव्यपवित्रमनश्चेतनाधिपतिः स्वरूपावस्थित आत्मा, इन्द्रः, सञ्जायते तदा स सर्वस्मै इति पुनरन्वीयते, 'यक्षाय कल्पते' सर्वेषां पूजापात्रं भवति ।

त्वं वृषाक्षं मघवन्नम्रं नर्याकरो रजिम् ।
त्वं रौहिणं व्यास्यो वि वृत्रस्याभिनच्छिरः ॥१३॥

'नर्य' हे नरहितकर ! 'मघवन्' महत् उदात्तं, महनीयं पूजनीयं, मंहनीयं दानीयं, दानैकप्रयोजनञ्चैश्वर्यमेव मघम् । मंहते वृद्धिशालि महत्त्वशालि च भवति, मह्यते पूज्यते दीयते च इत्यर्थे 'महि वृद्धौ' (भ्वा० आ० से०), 'मह पूजायाम्' (भ्वा० प० से०, चु० उ० से०), मंहतिर्दानकर्मा (निघ० ३.२०) इत्येभ्यः धातुभ्यः कर्तरि कर्मणि वा कप्रत्यये, पृषोदरादित्वात् नलोपे, हस्य घकारे च रूपम् । तथाभूतं मघं दिव्यमैश्वर्यमस्यास्तीति मघवा, तत्सम्बुद्धौ मघवन्, हे दिव्यैश्वर्यशालिन् इन्द्र ! 'त्वं' 'वृषा' द्युलोकीयैश्वर्यस्य वर्षिता, सच्चिदानन्दधाराणां प्रवर्षकः सन् 'रजि' रजोगुणयुक्तं, राजसभावलिप्तम् 'अक्षम्' इन्द्रियम्, जातावेकवचनम्, सर्वाणीन्द्रियाणि इन्द्रियगणं वा 'नम्रं' विनीतम् 'अकरः' कृतवान् । 'त्वं' 'रौहिणम्' इन्द्रियाणामभिभावकं कामक्रोधादिरूपमग्निम्, रौहिणोऽग्निरिति मोनियरविलियम्सकारः शतपथब्राह्मणाधारतः, यद्वा प्रकाशनिरोधकं 'वल'नामकदस्युं, 'वलः स शत्रुर्दस्युर्वा यः ज्योतिषो गाः स्वबिलं स्वगुहां वा अवरुणद्धि, सोऽवचेतनस्य मूर्तरूपम्' इति श्रीअरविन्दः (वेदरहस्यम् पृ० ९१), तं तथाभूतं वलं 'व्यास्यः' व्यस्तवान्, खण्डितवान्, तस्य निरोधक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुहां छिन्नभिन्नां कृत्वा चिद्रश्मिधेनूः उपरि चेतनसत्तां प्रति प्रेरय इति भावः । तथा च मन्त्रवर्णः—'यो गा उदाजदपधा वलस्य' (ऋ० २.१२.३) ।

न च त्वं केवलं वलं खण्डशः अकरोः अपितु 'वृत्रस्य शिरः वि अभिनत्' प्रकाशावरकस्य वृत्रासुरस्य मूर्धानं विशेषेण व्यदारयः, आत्मस्वरूपाच्छादकस्य अज्ञानस्य आवरणशक्ति विशेषेण विचूर्णितवान् । 'वृत्रो नाम स शत्रुर्दस्युर्वा यः सचेतनसत्तायाः सप्तविधसरितां प्रवाहमवरुन्द्धे,—यो निश्चेतनस्य मूर्तविग्रहः' इति श्रीअरविन्दः (वेदरहस्यम् पृ० ६१) ।

यः पर्वतान् व्यदधाद् यो अपो व्यगाहथाः ।
इन्द्रो यो वृत्रहान्महं तस्मादिन्द्र नमोऽस्तु ते ।।१४।।

'यः इन्द्रः' यः पूर्वोक्तः इन्द्रः 'पर्वतान्' अस्मद्भौतिकसत्तायाः भूमिका अन्नप्राणादिकाः 'व्यदधाद्' विरचितवान् याथातथ्यतो व्यवस्थापितवांश्च, तथा चाह महर्षिः श्रीअरविन्दः—'अद्रिर्हि साकारसत्तायाः विशेषतश्च भौतिकप्रकृतेः प्रतीकम् । अस्मादद्रेरेव सूर्यस्य गावः उन्मुच्यन्ते, आपश्च प्रवहन्ति । मधुनः सोमस्य च धारा अपि अस्मादद्रेरेव दुह्यन्ते इत्युक्तं मन्त्रवर्णैः । एवञ्च अद्रौ अश्वखुरस्य स प्रहारो यस्मात् अन्तःप्रेरणाया आपो निर्मुच्यन्ते एकम् अतिस्पष्टमाध्यात्मिकरूपकं सञ्जायते ।' (वेदरहस्य, पूर्वार्द्ध, पृ० १३७) । अत्र च इमे मन्त्राः द्रष्टव्याः—ऋ० १.३०.३, ३.३१.६.७,४.१.१३, ६.१७.५,५.४५.३ ४.१६.८,१.११६,७-१.११७.६ । 'यः अपः व्यगाहथाः' यश्च चिन्मयसत्तायाः धाराः विगाहितवान् प्रवाहितवांश्च। दिव्यमनोऽधिपतेरिन्द्रस्य दिव्यज्योतिष्प्रभा एव विद्युतः । तादृशविद्युद्वज्रसहायोऽसौ अस्मत्सत्तायां सच्चिदानन्दधाराः प्रवाहयति । अत्र च—

'यो हत्वाहिमरिणात् सप्त सिन्धून्' (ऋ० २.१२.३)
'अपां बिलमपिहितं यदासीद् वृत्रं जघन्वाँ अप तद् ववार'
'अजयो गा अजयः शूर सोममवासृजः सर्तवे सप्त सिन्धून्'
(ऋ० १.३२.११,१२)
'यः सप्तरश्मिर्वृषभस्तुविष्मानवासृजत् सर्तवे सप्त सिन्धून्'
(ऋ० २.१२.१२)

इत्यादयः शतशो मन्त्राः प्रमाणम् । 'आत्' अथ 'यः वृत्रहा' यो वृत्रस्य तदुपलक्षितवलशम्बररौहिणादीनां दिव्यैश्वर्योपलब्धिबाधकदस्यूनां च हन्ता

---

१. इन्द्रोऽन्तरयें दिव्यं मन इत्यत्र 'यन्मनः स इन्द्रः' (गो० ब्रा० १.४.११) इत्यादीनि ब्राह्मणग्रन्थवचनान्यालोच्यानि विपश्चिदपश्चिमैः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरीवर्ति 'तस्मात्' पर्वतविरचन-अब्धिवगाहन-वृत्रहननादिपराक्रमकार्यकर्तृत्वात् 'इन्द्र' हे इन्द्र! 'ते महं नमः अस्तु' तुभ्यं महत् नमनमस्तु, समर्पणात्मकमन्त्रैर्नमनमस्तु नो भूयो भूयः।

पृष्ठं धावन्तं हर्योरौच्चैःश्रवसमब्रुवन्।

स्वस्त्यश्व जैत्रायेन्द्रमा वह सुस्रजम् ॥१५॥

'हर्योः' इन्द्रस्य प्रसिद्धयोः भास्वराश्वयोः, सत्यज्योतिषः अश्वयोः 'पृष्ठं' पृष्ठे, अनुपदं 'धावन्तं' वेगेन प्रयान्तम् 'औच्चैःश्रवसम्' उच्चभूमिकानां शब्दानां श्रवणस्य शक्त्या सम्पन्नम्, श्रुति (अन्तःश्रवण) शक्तिस्वरूपमश्वम् 'अब्रुवन्' अवोचन् देवा इति शेषः, 'अश्व' हे अश्व! 'स्वस्ति जैत्राय' देवविरोधिशक्तिषु ससुखं विजयलाभाय 'सुस्रजम्' सु सुष्ठु शोभनं वा सृजतीति तम्, सुपूर्वकात् सृजतेः पचाद्यच्। 'सृजिदृशोर्झल्यमकिति' (पा० ६.१.५८) इति सूत्रेण झलादौ अकिति प्रत्यये विधीयमानोऽमागमश्छन्दसि व्यत्ययेन अझल्यपि भवति। शोभनसृष्टिकर्तारम् 'इन्द्रम्' 'आ वह' अत्र आनय प्रापय वा।

अत्रेदमवधेयम्—देवानामश्वाः सत्यज्योतिष एवाश्वा इति 'ऋतस्य वा केशिना योग्याभिर्घृतस्नुवा रोहिता धुरि धिष्व' (ऋ० ३.६.६) इत्यत्र अग्नेरश्वयोर्वर्णने 'ऋतस्य' (सत्यस्य) घृतस्नुवा प्रकाशस्राविणौ केशिना केशिनौ रश्मिमन्तौ (निरु० १२.३.२५) इति पदैः स्पष्टमभिहितम्। 'केशा रश्मयस्तैस्तद्वान् भवति। काशनाद्वा प्रकाशनाद्वा' इति यास्कः (निरु० १२.३.२५)। रश्मिमत्त्वात् तौ केशिनौ इत्युच्येते। अथवा प्रशस्ताः केशा अनयोरिति केशिनौ। अनयोर्ज्योतिषः शक्त्याश्च तरङ्गाः केशैरुपमिताः। तदेवं ज्योतिर्धाराभिः शक्तितरङ्गैश्च युक्तौ ताविति विवक्षितम्। काशो दीप्तिरनयोरस्तीति काशिनौ, तावेव केशिनौ। 'काशृ दीप्तौ' भावे घञ्, ततो मत्वर्थीय इनिः। काशतेराकारस्य एकारश्छान्दसः। अग्नेरिन्द्रस्य चोभयोरपि अश्वौ 'ऋतस्य घृतस्नुवौ केशिनौ' (तुल० ऋ० ३.४१.६) किन्तु अग्नेर्लोहितवर्णौ (रोहितौ) इन्द्रस्य च हरिद्वर्णौ (हरी) इति विशेषः। स च तत्तच्चिद्भूमिकाया ज्योतिषो वर्णविशेषं सूचयतीति बोध्यम्।

प्रकृतमन्त्रे औच्चैःश्रवसः इन्द्रस्यानयनार्थं प्रार्थितः। इन्द्रस्य वोढा अश्वश्च सत्यज्योतिषोऽश्व एव। तद्यथा 'यो मे शता च विंशतिं च गोनां हरी च युक्ता सुधुरा ददाति' (ऋ० ५.२७.२) इत्यादिमन्त्रस्य व्याख्यायां श्रीअरविन्दपादाः प्राहुः—

"इन्द्रस्य द्वौ भास्वराश्वौ किल 'गावा चेतिष्ठो असुरो मघोनः' (ऋ० ५.२७.१) इत्यत्र कीर्तिताभ्यां प्रकाशधेनभ्यामभिन्नौ। तौ विज्ञानभूमिकाया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋतचितः द्वे अन्तर्दर्शनशक्ती, दक्षिणा च सव्या च, सम्भवतः अपरोक्षा सत्य-दृष्टिः सम्बोधिश्च । ज्ञानज्योतिषः प्रतीकभूतधेनुरूपेण तौ आत्मानं भौतिक-मनसो वाहने युङ्क्तः, ज्ञानशक्तेः प्रतीकभूताश्वरूपेण तौ आत्मानम् इन्द्रस्य, मुक्तविशुद्धमनसो रथे युञ्जाते ।'' (Hymns to the Mystic Fire, p. 311, footnote 2)

प्रस्तुतमन्त्रे औच्चैःश्रवसशब्देन ऋतचितः तृतीया शक्तिः श्रुतिनामिका अन्तःश्रवणान्तःप्रेरणास्वरूपा विवक्षिता इति विशदमेव ।

इन्द्रस्य सुस्रजत्वं सुसर्जकत्वं वा—पर्वतविधातृत्वम् अपां विगाहकत्वं च—पूर्वमन्त्रे प्रोक्तम् । अथ च ऋग्वेदस्य द्वितीयमण्डलस्य द्वादशे सूक्ते इन्द्रदेवताके 'येनेमा विश्वा च्यवना कृतानि', 'यो अन्तरिक्षं विममे वरीयः', 'यः सूर्यं य उषसं जजान' 'यो विश्वस्य प्रतिमानं बभूव' इत्यादिमन्त्रवर्णैः तस्य सुसर्जकत्वं सुस्पष्ट-मुदीरितमिति सर्वमवदातम् ।

अपि वा 'हर्योः' हरन्ति मन इति हरयः इन्द्रियाणि । जातावेकवचनप्रयोगेण हरिरिन्द्रियजातम्, हर्योरिन्द्रियजातयोः ज्ञानेन्द्रियकर्मेन्द्रियरूपयोः, ज्ञानेन्द्रियाणां कर्मेन्द्रियाणाञ्चेत्यर्थः । यद्वा, हरिशब्दः अश्ववाचित्वात् अत्र इन्द्रियाश्ववाचकत्वेन ग्राह्यः ।

'हरिर्वातार्कचन्द्रेन्द्रयमोपेन्द्रमरीचिषु ।
सिंहाश्वकपिभेकाहिशुकलोकान्तरेषु च ॥' इति विश्वः

अपि च हरी इन्द्रस्य वाजिनौ इति विश्रुतौ । इन्द्रियमपि इन्द्रस्येदम् यद्वा इन्द्रस्य लिङ्गम् इति व्युत्पत्त्या इन्द्राश्वहरिवत् इन्द्रस्य करणमेवेत्यतः हरिरित्यु-च्यते । तदेवं 'हर्योः' ज्ञानेन्द्रियजातस्य कर्मेन्द्रियजातस्य च 'पृष्ठं धावन्तं' 'पृष्ठे धावनप्रवणम्, इन्द्रियानुगमिन्द्रियदासम्, न तु इन्द्रियाश्वारोहिणमिन्द्रियस्वा-मिनम् 'औच्चैःश्रवसम्' उच्चैः उच्चार्यमाणमेव शृणोतीति उच्चैःश्रवाः । शृणोतेः सार्वधातुकोऽसुन् औणादिकः । उच्चैःश्रवा एव औच्चैःश्रवसः, स्वार्थेऽण्, तम्, उपदेशं प्रबोधनं वा प्रति बधिरायमाणं मनुष्यम् 'अब्रुवन्' अवोचन् ज्ञानिनो मनी-षिण इति शेषः । 'अश्व' श्वो न विद्यमान इति अश्वः तत्सम्बुद्धौ । हे क्षणभङ्गुर-जीवन मानव ! 'जैत्राय' इन्द्रियविजयाय 'स्वस्ति' कल्याणसाधनाय च 'सुस्रजम्' इन्द्रम्, 'आवह' शोभनदिव्यगुणमालाधारिणम् इन्द्रम् इन्द्रियाणां दिव्यमनसश्चा-धिष्ठातारम् इन्द्रदेवम् आवाहय आनय च स्वहृदयवेद्याम्, तत्प्रसादीकृतदिव्य-मनःशक्त्या इन्द्रियजातं विजित्य निजकल्याणसाधनार्थमिति भावः ।

युक्त्वा श्वेता औच्चैःश्रवसं हर्योर्युञ्जन्ति दक्षिणम् ।
पूर्वतमं स देवानां बिभ्रदिन्द्रं महीयते ॥१६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'श्वेताः' दिव्यसङ्कल्पस्य स्वकार्यसम्पादनक्षमाः पूर्णदृष्टिशक्तयः एव श्वेता अश्वाः। तथा चाहुः श्रीअरविन्दपादाः—

देवानां चक्षुः सुभगा वहन्ती श्वेतं नयन्ती सुदृशीकमश्वम्।
उषा अदर्शि रश्मिभिर्व्यक्ता चित्रामघा विश्वमनु प्रभूता॥
(ऋ० ७.७७.३)

"अस्मिन् मन्त्रे 'श्वेतोऽश्वः' पूर्णतया प्रतीकात्मक एवेति प्रतरां स्पष्टम्। ('श्वेतः अश्वः' इति वाक्प्रयोगोऽत्र अग्निदेवाय कृतः। अग्निर्हि द्रष्टृसङ्कल्पः, कविक्रतुः, दिव्यसङ्कल्पस्य स्वकार्यसम्पादनक्षमा पूर्णदृष्टिशक्तिरेव)।"

एवमेव 'श्वेतो वाजी जायते अग्रे अह्नाम्' (ऋ० ५.१.४) इत्यस्य व्याख्यायां तैरिदमुट्टङ्कितम्—'प्राणिकसङ्कल्पशक्तिः, प्राणवर्तिनी प्रजाज्वल्यमानकामना एकोऽश्वः सञ्जायते योऽस्मान् उपरि सर्वोच्चस्तरपर्यन्तं नयति, ईदृशः श्वेतोऽश्वः सम्पद्यते यः उषसामग्रे प्लुतगत्या धावति।'

'श्वेनाः युक्त्वा' पूर्णदृष्टिशक्तिस्वरूपान् श्वेतान् अश्वान् धुरि नियुज्य देवाः 'औच्चैःश्रवसम्' पूर्वमन्त्रोक्तं 'श्रुति' (अन्तःश्रवण) शक्तिरूपमश्वं 'हर्योः दक्षिणं युञ्जन्ति' पूर्वमन्त्रोक्त-अपरोक्षान्तर्दृष्टि-सम्बोधिस्वरूपाश्वयोः ऋतचितः शक्त्योः दक्षिणतः योजयन्ति। 'सः' औच्चैःश्रवसः 'श्रुति' शक्तिरूपोऽश्वः 'देवानां पूर्वतमं' देवानां प्रथमं प्रधानं च 'इन्द्रं' दिव्यमनोभूमिकाया दिवोऽधीश्वरं 'बिभ्रत्' धारयन् वहन् वा 'महीयते' पूज्यते, प्रशस्यते। इन्द्रस्य देवानां पूर्वतमत्वं हि 'यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत्' इत्यादिमन्त्रवर्णैः सुस्पष्टमाम्नातम्। इन्द्रो दृष्टि-श्रुति-स्मृति-शक्तिसमेतः साधकस्य चिद्भूमिमवतरति इति रहस्यार्थः।

ये त्वा श्वेता अजैश्रवसो हार्यो युञ्जन्ति दक्षिणम्।
पूर्वा नमस्य देवानां बिभ्रदिन्द्र महीयते॥

इति पाठान्तरे तु 'नमस्य इन्द्र' हे नमस्करणीय वन्दनीय देवराज इन्द्र 'ये' जितेन्द्रिया जनाः 'श्वेताः' शुभ्रकर्माणः 'अजैश्रवसः' अजय्ययशसः जितेन्द्रियत्वात् अजेया इति विश्रुताः 'हार्यः' आत्मनि प्रत्याहृतेन्द्रियाः, प्रत्याहारसाधनया व्यावृत्तचक्षुरादीन्द्रियाः, प्रत्यङ्मुखाः, पराञ्चि खानि व्यावर्त्य साक्षात्कृतप्रत्यगात्मानो धीराः 'दक्षिणं त्वा युञ्जन्ति' गुह्यदिव्यक्रियादक्षं, दिव्यबलशालिनं त्वां स्वात्मना सह योगविधिना युञ्जन्ति, त्वया सह योगयुक्ता भवन्ति, येन त्वमेव तेषां देहरथे युक्तः तं परिचालयेरिति। 'देवानां पूर्वाः' दिव्यगुणशालिनां देवोपमानां पुंसां प्रथमाः प्रधानाश्च ते 'बिभ्रत्' त्वां हृदि धारयन्तः 'महीयते' महीयन्ते पूज्यन्ते। 'बिभ्रत्', 'महीयते', इति उभयत्र बहुवचनार्थे व्यत्ययेनैकवचनम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्तम् १२९

अथ ऐतशप्रलापाः

१२९तमसूक्तादारभ्य १३२तमसूक्तपर्यन्तानां चतुर्णां सूक्तानां द्रष्टा ऋषिरेतशः। स च सार्थनामा वेदस्य अन्यऋषिवत्। एतशो नाम सूर्यस्य भास्वराश्वः, परमसत्यस्वरूपसूर्यस्य सत्यरश्मिः। 'सत्यं तदिन्द्रो दशभिर्दशग्वैः सूर्यं विवेद तमसि क्षियन्तम्' (ऋ० ३.३९.५) इत्यत्र 'तत् सत्यं सूर्यम्' इति पदानां सामानाधिकरण्यात् वेदे सूर्यः प्रधानतः परमसत्यस्य सूर्यः यस्य मूर्तं स्वरूपमयं द्युलोकगतो देदीप्यमानसूर्यदेवः। तस्य सत्यसूर्यस्य रश्मिभिः सम्पन्नतया यथार्थनामा एतश ऋषिः। एतशस्येमे ऐतशाः, ऐतशाश्च ते प्रलापाश्च प्रकृष्टा लापा उक्तयः सूक्तात्मिका इति ऐतशप्रलापाः। तेषु प्रदत्तं गुह्यज्ञानमत्र विव्रियमाणं तेषां महिमानं स्वत एव प्रकाशयिष्यति।

एता अश्वा आ प्लवन्ते ॥१॥

प्रतीपं प्राति सुत्वनम् ॥२॥

'एताः अश्वाः' इमा इन्द्रियवृत्तयः, 'इन्द्रियाणि हयानाहुः' (कठोप० १.३.४) इति इन्द्रियाणां हयत्वमश्वत्वं वा शास्त्रविदां समयः। अत्र अश्वशब्दस्य स्त्रियां प्रयोगात् इन्द्रियवृत्तयो विवक्षिताः। एता इन्द्रियवृत्तयो यदा इति अध्याहार्यम् 'आ प्लवन्ते' अध्यात्मस्नानं कुर्वन्ति, आत्मनि प्रत्यगात्मनि वा आ समन्ततः, सम्पूर्णतः स्नान्ति, तेन च स्वकीयसकलकलुषमपास्यन्ति, तदा तासु प्रत्येकम् इन्द्रियवृत्तिः 'प्रतीपं' विषयवर्त्मविरुद्धं यथा स्यात्तथा, विषयोपभोगविमुखा सतीत्यर्थः 'सुत्वनं' कृताध्यात्मस्नानं मनुष्यं 'प्राति' पाति, रक्षति, पालयति, पाते रेफोपजनश्छान्दसः। यद्वा प्राति पूरयति तं पुरुषं दिव्यज्ञानैश्वर्येण विषयानासक्तिसुखेन च, प्रापयति च तं पूर्णावस्थाम् इति भावः। 'सुत्वनम्' इत्यत्र 'षुञ् अभिषवे' (अभिषवः स्नानम्) इति धातोः 'भूते' इत्यधिकृत्य 'सुयजोर्ङ्वनिप्' (पा० ३.२.१०३) इति सूत्रेण भूतार्थे ङ्वनिप्। सुत्वनं स्नातम्, कृतस्नानमित्यर्थः।

अत्रेदमवधेयम्—रथस्वामिन आत्मनोऽस्मिन् बुद्धिसारथिके मनःप्रग्रहके देहरथे इन्द्रियाण्येव हयानाहुः (कठोप० १.३.३-४)। तेषामिन्द्रियाणां चित्तस्य च वृत्तयः 'पञ्चतय्यः क्लिष्टाक्लिष्टाः' (यो० द०, समाधिपादः ५)। तत्र क्लिष्टाः सवासनाः, सुमलिना वृत्तयः पुरुषं बहिर्मुखं कुर्वन्ति, अक्लिष्टाः, निर्वा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सनाः निर्मलाः वा तम् अन्तर्मुखं प्रत्यङ्मुखं वा विदधति, तच्च अत्र 'प्रतीपं प्राति सुत्वनम्' इति मन्त्रे 'प्रतीप'पदेन निरूपितम्। तथा चोक्तम्—'चित्त-नदीयमुभयतोवाहिनी वहति कल्याणाय वहति पापाय च' इति दिक्।

तासामेका हरिक्निका ॥३॥

हरिक्निके किमिच्छसि ॥४॥

साधुं पुत्रं हिरण्ययम् ॥५॥

'तासाम्' अमूषां कृताध्यात्मस्नानानाम् इन्द्रियवृत्तीनाम् 'एका' एकैका प्रत्येकमित्यर्थः 'हरिक्निका' हरति आकर्षति चित्तमिति हरिश्चित्तचौरो भगवान्, यद्वा हरति अपाकरोति पापतापादिकमिति हरिः परमेश्वरः तस्य क्निका प्रदीपिका स्वरूपप्रकाशिका भवति। तदा प्रत्येकमिन्द्रियं विषयेण सन्निकर्षे सत्यपि तस्मिन् परमरस-स्वरूपस्य हरेः रसमनुभवति न तु विषयास्वादं, प्रत्यगात्मनः चित्तवृत्तेर्भेदे सति विषयानुभवभेदस्य स्वाभाविकत्वात्। तथा चोक्तं गीतायां—'रसोऽप्यस्य परं दृष्ट्वा निवर्तते' इति। 'हरिक्लिका' इति पाठे तु प्रत्येकमिन्द्रियं हरेः कलिका, कला, तत्प्रकाशकः तदीयचित्कलाविशेषः सञ्जायते।

तां हरिक्निकां पृच्छति कृतस्नानो मनुष्यः—'हरिक्निके' हे हरिप्रकाशिके शुद्धसात्त्विक-इन्द्रियवृत्ते! 'किमिच्छसि' किमभिलषसि, किं ते काम्यम्?

सा उत्तरति—'साधुं हिरण्ययं पुत्रम्' साध्नोति योगसिद्धिं सम्पादयति, तया च सर्वार्थं साधयतीति तं सकलऋद्धिसिद्धिप्रदं हिरण्मयं चैत्यशिशुम्, सौवर्ण-ऋतचिन्मयम् अन्तरात्मशिशुम् इच्छामि जायमानमिति शेषः। अस्माकमन्तः-स्थितस्य अग्नेः सोमस्य च दिव्यहिरण्मयशिशुतया जायमानत्वञ्च बहुशः वर्ण्यते मन्त्रवर्णैः। तद्यथा

नाके सुपर्णमुपपप्तिवांसं गिरो वेनानामकृपन्त पूर्वीः।
शिशुं रिहन्ति मतयः पनिप्नतं हिरण्ययं शकुनं क्षामणि स्थाम्॥
(ऋ० ९.८५.११)

नक्तोषासा वर्णमामेम्याने धापयेते शिशुमेकं समीची।
द्यावाक्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन् द्रविणोदाम्॥
(ऋ० १.९६.५)

एष स्य मद्यो रसोऽवचष्टे दिवः शिशुः।
य इन्दुर्वारमाविशत्॥ (ऋ० ९.३८.५)

तमर्वन्तं न सानसिमरुषं न दिवः शिशुम्।
मर्मृज्यन्ते दिवेदिवे॥ (ऋ० ४.१५.६)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्त स्वसारो अभि मातरं शिशुं नवं जज्ञानं जेन्यं विपश्चितम् ।
अपां गन्धर्वं दिव्यं नृचक्षसं सोमं विश्वस्य भुवनस्य राजसे ॥
(ऋ० ९.८६.३६)

दिवः शिशुं सहसः सूनुमग्निं यज्ञस्य केतुमरुषं यजध्यै ।
(ऋ० ६.४९.२)

मर्मृज्यन्ते दिवः शिशुम् ।
(ऋ० ९.३३.५)

शिशुं जज्ञानं हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम् ।
(ऋ० ९.१०९.१२)

त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते ।
तव क्रतुभिरमृतत्वमायन् वैश्वानर यत् पित्रोरदीदेः ॥
(ऋ० ६.७.४)

इदं च श्रीअरविन्दपादैः दिव्यशिशोः हिरण्मयचैत्यशिशोर्वा जन्मेति कीर्तितं भूयो भूयो यद्विना साधनायाः प्रगतिः आकाशकुसुमायते इत्यलमतिपल्लवितेन ।

क्वाहतं परास्यः ॥६॥
यत्रामूस्तिस्रः शिंशपाः ॥७॥
परि त्रयः ॥८॥
पृदाकवः ॥९॥
शृङ्गं धमन्त आसते ॥१०॥

'परास्यः' पराः विषयाः, 'इन्द्रियेभ्यः परा ह्यर्थाः' (कठोप० १.३.१०) तेषु अस्यन्ति क्षिपन्ति इति ताः परास्यः, 'परासी'शब्दात् सम्बोधनबहुवचने रूपम् । हे बहिर्मुखेन्द्रियवृत्तयः! ता हि बहिः क्षिपन्ति पुरुषं विषयेषु, यद्वा हे बहिर्मुखचित्तवृत्तयः! ता हि बहिः क्षिपन्ति इन्द्रियाणि विषयेषु, युष्माभिः 'क्व' कुत्र, मानवसत्तायाः कस्मिन् भागे 'आहतम्' आघातः प्रहारो वा कृतोऽभूत् यदा यूयम् अस्नाताः कलुषिताश्च आस्त तदा इति भावः ।

ता उत्तरन्ति—'यत्र अमूः तिस्रः शिंशपाः' यत्र ते त्रयः शिंशपावृक्षाः ज्ञानेच्छाकृतिरूपाः प्ररूढा बद्धमूलाश्च सन्ति आत्मनः देहप्राणमनोमयभूमौ, 'त्रयः पृदाकवः शृङ्गं धमन्तः परि आसते' ते त्रयश्च तत्र पृदाकवः शक्तिशाल्यजगररूपाः अजमजन्मानमात्मानं निगिलन्त इव, पुरुषे शृङ्गं कामवेगं धमन्त उत्तेजयन्तः परि आसते, तं परिवृत्य तिष्ठन्ति सततम् ।

अयमाशयः—यावदिन्द्रियवृत्तयः अन्तरात्मनि अकृतस्नानाः कलुषिताश्च तावत् ताः तस्य ज्ञानेच्छाकृतिरूपाः तिस्रः मूलशक्तीः तथा आच्छादयन्ति यथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घनच्छायः शिंशपातरुरातपं प्रकाशं वा । बहिर्मुखेन्द्रियैराच्छादिते च आत्मज्ञाने आत्मनो, ज्ञानेच्छाकृतयः कलुषिताः सत्यः पृदाकुवत् कामाग्निं धमन्त्यः उद्दीपयन्त्यः विविधविषयवह्निं वर्धयन्त्यश्च आसते सततम् ।

शृङ्गं कामोद्रेकमृच्छत्यनेनेति शृङ्गार इति शृङ्गारशब्दव्युत्पत्तेः शृङ्गशब्दः कामोद्रेके प्रसिद्धः । आदृतश्चायं प्रेमातिरेककामोद्रेकार्थयोः आप्टेकोषकारैः । अत्र तु अयमुपलक्षणं सकलेन्द्रियविकाराणामुद्रेकस्य, शिखरवाचिशृङ्गशब्दस्य आवेगोद्रेकमात्रसूचकत्वात् ।

अयन्महा ते अर्वाहः ॥११॥
स इच्छकं स घाघते ॥१२॥
स घाघते गोमीद्या गोगतीरिति ॥१३॥

'ते' ते त्रयः ज्ञानेच्छाकृतिरूपाः शिंशपातरवः पृदाकवो वा 'अयन्महा' अयन्तं गतिशीलम् उद्योगिनं पुरुषं तु मंहयन्ति वर्द्धयन्ति महयन्ति पूजास्पदं च कुर्वन्ति । ते तम् 'अर्वाहः' अरम् अलं प्रकामं यथा स्यात्तथा वहन्ति नयन्ति प्रापयन्ति च परमलक्ष्यम् । ज्ञानेच्छाकृतीनामेव धर्मार्थकामवत् परमार्थस्यापि साधकत्वात् ।

अत्रायमभिसन्धिः—यो जनः सततं गतिशीलः, अनवरतं शुभचेष्टापरायणस्तिष्ठति तस्मिन् कामक्रोधलोभाद्या इन्द्रियविकाराः प्रवेशाय अवकाशमेव न लभन्ते तदीयमनसः सततव्यापृतत्वात् । उद्योगिनो नरस्य बहिर्मुखमपीन्द्रियमन्तर्मुखं भवति उत्तरोत्तरम् । अलसस्य अकर्मण्यपुरुषस्य मनस्येव विकाराः पदमादधते । इतरं सत्सङ्कल्पशुभकर्मपरायणं तु ज्ञानेच्छाकृतयो मानुषजीवनस्य परमपुरुषार्थं प्रापयन्ति अप्रतिहतवेगेन ।

'सः' सततसत्क्रियानिरतः, ज्ञानेच्छाकृतिभिः आत्मशक्तिभिः परमपुरुषार्थं प्रापितः, यद्वा पञ्चममन्त्रप्रोक्तः निर्मलसात्त्विकेन्द्रियवृत्तिजनितः 'साधुः पुत्रः हिरण्ययः' 'इच्छकं घाघते' इच्छति इन्द्रियविषयानभिलषतीति तं भोगकामनाकलुषितं विषयवासनाविलं पुमांसं 'घाघते' उपहसति । 'स' इति पदस्य द्विः प्रयोगेण घाघते इति पदमपि पुनरन्वेतव्यम् । 'स घाघते' अपहसति अवहसति च असौ तस्याज्ञानमयदशामित्याशयः ।

'या गोमीत्' यः गाः इन्द्रियाणि मीनाति हिनस्ति तेषां क्रियां चञ्चलतां च प्रतिहन्तीति यावत् स नियतेन्द्रियः, निगृहीतमनाः यद्वा पुरुषः 'गोमी इत् या' इति पदच्छेदः आस्थेयः, 'या गोमी इत्' गावः इन्द्रियाणि अस्य सन्तीति गोमी इन्द्रियाणां स्वामी, यः पूर्णतया वशीकृतेन्द्रियः आत्मवान् स इत् नूनं 'घाघते' तम् इन्द्रियविषयासक्तमुपहसति । कथमिव ? 'गोगतीरिति' अस्य विषयैषिणः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संसाररागिणः गवाम् इन्द्रियाणां गतीः चेष्टाश्चञ्चलताश्च पश्यत हे नरा इत्युक्त्वा अवहसति तम् ।

गोमी इत्यत्र गोशब्दात् 'ज्योत्स्नातमिस्रा०' (पा० ५.२.११४) इत्यादिना मिनिप्रत्ययो निपात्यते मत्वर्थे । या गोमी इत्यत्र यच्छब्दात् पुंलिङ्गप्रथमैकवचने व्यत्ययेन स्त्रीत्वम् । यद्वा, या गोगतीः या गोगतयः सन्ति ता घाघते इत्येवमन्वेतव्यम् । तथा सति गोगतीः इत्यत्र विभक्तिव्यत्ययश्छान्दसः ।

पुमां कुस्ते निमिच्छसि ।।१४।।

पल्प बद्ध वयो इति ।।१५।।

बद्ध वो अघा इति ।।१६।।

पूर्वमन्त्रोक्तः परिशुद्धजीवः प्रकृतिपाशबद्धं पुमांसं सम्बोध्य ब्रूते—'पुमान्' हे पुमन् ! विभक्तिव्यत्ययः, 'कुस्ते' प्रकृतेः संश्लेषणे आलिङ्गने वा 'निम् इच्छसि' निम्नां गतिमिच्छसि किम् ? कुतः अधोगन्तुमिच्छसि ?

अत्र च 'उत्क्रामातः पुरुष मावपत्थाः', 'उद्यानं ते पुरुष नावयानम्', 'उच्च तिष्ठ महते सौभगाय', 'आरोह तमसो ज्योतिः', 'मात्र तिष्ठ पराङ्मनाः' (अथर्व० ८.१.४, ८.१.६, २.६.२, ८.१.८, ८.१.९) इत्यादयः अथर्ववेदीयमन्त्रवर्णाः जीवस्य आवाहनोद्बोधनपरा द्रष्टव्याः ।

कुस्ते इत्यत्र 'कुस् संश्लेषणे' (दि.प.से.) इत्यतो नपुंसके भावे क्तः, इडभावश्छान्दसः ।

'पल्प' पललं मांसं, मांसादिपिण्डं देहमिति यावत् पाति रक्षतीति पल्पः तत्सम्बुद्धौ । पल्प, हे शरीरमात्रपोषणपरायण देहैकबुद्धे असुतृप् मानव ! 'बद्ध' देहबुद्धित्वात् प्रकृतिपाशबद्ध जीव ! 'वयः इति' त्वं तु पक्षी, हंसः, आत्मसुपर्णः असि इति निश्चितम् । आत्मव्योमनि विमुक्तं विहरणीयमासीत् हंसेन त्वया । कुतस्त्वं बन्धने पतितः ? प्रकृतिपञ्जरे भोगरज्जुबद्धत्वादेव बद्धविहगवत् न जानासि स्वतन्त्रं विहर्तुम् ।

जीवस्य देहेन्द्रियबन्धनपतितत्वञ्च एतया ऋचाऽभ्युक्तम्—

वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान् ।।
(ऋ० १०.७३.११, साम० ३१९)

पललशब्दे उपपदे पातेः कप्रत्ययः । वर्णलोपश्छान्दसः । 'बद्ध' हे देहेन्द्रियनिगडनिगडित प्रकृतिपञ्जरे वासनापाशविपाशित जीव! बद्धत्वादेव 'वः अघा इति' तव पापसन्ततिः पापलेपो वाऽस्ति इति विद्धि निश्चितम् ।
'वः' इत्यत्र व्यत्ययेन बहुवचनम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अजागार केविका ॥१७॥
अश्वस्य वारो गोशफद्यके ॥१८॥
श्येनीपती सा ॥१९॥
अनामयोपजिह्विका ॥२०॥

'अजागार' हे अजायाः प्रकृतेः आगार, गृहभूत, आश्रयभूत, प्रकृतये तद्रचितजगते च स्वहृदये वासप्रदायक जीव ! 'अजामेकां लोहितशुक्लकृष्णाम्' (श्वेताश्व० ४.५) इत्यादिश्रुतिभ्यः प्रकृतेरजात्वं संज्ञायते । इयं प्रकृतिस्तावत् 'केविका' सेविका । सकलजीवसेविका कुलटैषा प्रकृतिः प्रलोभयति जीवमात्रं निजमोहिन्या क्षणिकसंसारसुखसम्पादकसेवया च । अस्याः स्वामी अपि त्वं कुतः दासायसे अस्या इति ध्वनिः ।

'अश्वस्य वारः' अश्वस्येत्यत्र जातावेकवचनम्, हे अश्वानाम् इन्द्रियाणां वारक कुमार्गगमनान्निवारक ! हे अश्वारोहिन् ! 'आत्मानं रथिनं विद्धि' इति कठोपनिषच्छ्रुत्या (१.३.३) आत्मनः देहरथस्वामित्वप्रसिद्धेः, इन्द्रियाणां स्वामी सन्नपि त्वं 'गोशफद्यके' गवाम् इन्द्रियगवां शफैः खुरैः क्रियमाणे तव द्यके अवखण्डने, अवमर्दने विचूर्णने च वर्तसे रमसे वा इति शेषः । हा हन्त ! आश्चर्यमाश्चर्यम्, इन्द्रियाणामीशः, पशुपतिः सन्नपि तेषां पादतलप्रहारैः परिमर्द्यसे, पाशवप्रकृत्या परिभूयसे !

वारः इत्यत्र वारशब्दात् सम्बुद्धेः सोर्लुगभावश्छान्दसः । द्यके इत्यत्र 'दो अवखण्डने' (दि० प० अ०) इत्यतो यक् औणादिको बाहुलकात् । यगन्तात् स्वार्थे कः । छान्दसं रूपम् ।

'सा' प्रकृतिस्तावत् 'श्येनीपती' श्येनानां श्वेतानां शुभ्रोज्ज्वलानां चाकचक्योपहतलोचनानां भ्राजमानपदार्थानां पती स्वामिनी, श्यायते गच्छति शंसनीयतामिति श्येतः, स्तुतियोग्यः श्वेतो वर्णः । 'श्यैङ् गतौ सङ्घाते च' (भ्वा० आ० अ०) इत्यतः औणादिकः इतन् । स्त्रियां ङीपि, तत्सन्नियोगेन च तस्य नकारे श्येनी । 'शुक्ल-शुभ्र-शुचि-श्वेत-विशद-श्येत-पाण्डराः' इत्यमरः (१.१८) । यद्वा श्येनीपती वर्णसङ्घातवती, 'श्यै सङ्घाते', चित्रविचित्रवर्णानां पदार्थानां स्वामिनी, 'प्राश्नुवते एनां वर्णाः' इति हेतोः पृश्निः इति प्रसिद्धा प्रकृतिः । ईदृशैः स्वकीयैः पदार्थैः अस्मान् प्रलोभयन्तीयं 'हिरण्मयेन पात्रेण' इव प्रच्छादयति स्वीयं यथार्थस्वरूपम् अस्मदन्तरात्मनो बन्धनकारकम् । तस्मात् सावधान आस्स्व सततम् । मा भव अनया प्रलोभितः अस्या दास इति ध्वन्यार्थः ।

एषा 'अनामयोपजिह्विका' अनामयान् कामक्रोधादि-आधिरहितान् ऋषि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुनीनपि उप उपासद्य जिह्विका निजलोलुपजिह्वया स्पृशति, लेढि ग्रसते च, निगिलति तेषां दिव्यसम्पदं निर्विकारतासिद्धिं च । अतो दूरतस्त्यजैनां, मा स्पृश अस्याश्छायामपि, सुदूरमास्तां सेवेति सूक्तस्य हार्दम् ।

चतुर्वेदभाष्यकारैः श्रीजयदेवविद्यालङ्कारैरस्य सूक्तस्याध्यात्मिकोऽर्थोऽन्यथा (प्रकारान्तरेण) योजितः । तत्सम्मतः मन्त्रपाठोऽपि अनेकत्र शङ्करपाण्डुरङ्गीय-पाठतो भिन्नः । तत्कृतोऽर्थोऽत्र वेदस्वाध्यायिनां तत्त्वानुसन्धित्सूनामर्थे हिन्दीतः संस्कृतगिराऽनूद्य उपन्यस्यते—

१. 'एता अश्वाः' इमा भोगवृत्तयः 'आ प्लवन्ते' सर्वतोऽभिधावन्ति ।

२. 'प्राति सुत्वनम्' सुत्वनः तत्प्रेरकादात्मनः प्रतिकूलं (प्रतीपम्) तद्वि-परीतदिशि प्रयान्ति ।

३. 'तासामेका हरिक्निका' अमूषामेका हरेः सर्वहर्तुः आत्मनः क्निका सूक्ष्मकणिका सूक्ष्मदीप्तिरूपा, स्वर्णज्योतिःस्वरूपा, दीपशिखोपमा चित्कला वर्तते या आत्मनः इच्छाशक्तिरेव ।

४. 'हरिक्निके' हे आत्मनः कलाविशेष ! हे चित्कले ! 'किमिच्छसि' त्वं किमभिलषसि ?

५. अहं 'साधुं' सर्ववशीकारकं 'पुत्रं' नरकस्य त्रिविधतापात् त्रायकं 'हिरण्ययं' तेजोमयमात्मानम् इच्छामि ।

६. 'तं क्व आह' कस्त्वां तमुपदिशेत् ? 'स्यः परा' स तु परस्तात्, अति-दूरं वर्तमानः अवाङ्मनसगोचरः ।

७. स तत्र वर्तते 'यत्र अमूः तिस्रः शिशपाः' यत्र ताः तिस्रः तस्याः परम-सुप्तसत्तायाः पालिकाः तिस्रः अनादिशक्तयो विद्यन्ते ।

८. 'त्रयः परि' तास्तिस्रः सुदूरवर्तिन्यः ।

९. 'पृदाकवः' तास्तिस्रः सम्पूर्णसामर्थ्यसम्पन्नाः ।

१०. ताः 'शृङ्गं धमन्तः आसते' मूलकारणे समवेतास्तिष्ठन्ति ।

११. 'अयमिहागतो अर्वा'—'इह' अस्मिन् शरीरे 'अयम्' एष आत्मा 'अर्वा आगतः' रथे अश्व इव युक्तः ।

१२. 'स इच्छक्ना सं ज्ञायते'—'सः' स आत्मा अस्मिन् शरीरे 'शक्ना' दर्शन-श्रवण-भाषणादिशक्तिविशेषैः 'सं ज्ञायते इत्' सम्यग् ज्ञातुं शक्यते ।

१३. 'सं ज्ञायते गोमयाद् गोगतिरिव'—'इव' यथा गोमयात्' गवां समूहात्, गोसमूहं दृष्ट्वा इत्यर्थः 'गोगतिः' गवाम् अनन्यगतिरूपः आश्रयस्वरूपः गोपतिः व्रजो वाऽनुमीयते तथैव इन्द्रियोत्पन्नज्ञानादेव 'गोगतिः' इन्द्रियलब्धज्ञानस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनन्यगतिरनन्याश्रयः सम्यग् ज्ञायते ।

१४. 'पुंसां कुले किमिच्छसि'—हे आत्मन् ! 'पुंसां कुले' प्राणापानादीनां प्राणभेदानां समूहे, तन्मध्ये इत्यर्थः स्थितस्त्वं 'किमिच्छसि' किं कामयसे ?

१५. 'पक्वौ व्रीहियवा इति'—यथा कृषिकर्मणः परिश्रमात्परं कृषक इदं कामयते यत् क्षेत्रे सः 'पक्वौ व्रीहियवौ' प्राप्तपाकौ व्रीहियवौ प्राप्नुयात् तथैव अहमात्मापि अस्मिन् शरीरे प्राणानां मध्येऽवस्थितः 'पक्वौ व्रीहियवौ इति' स्वकर्मणां परिपक्वफलरूपेण व्रीहिं शक्तिवर्धकफलमभ्युदयरूपं त्रिविधताप-नाशसाधनं यवं चेत्येतद् द्वयमेव वाञ्छामि ।

१६. 'व्रीहियवा अघा इति'—हे आत्मन् ! त्वमस्मिन् शरीरायतने कर्मणां परिपाकेन, तत्फलस्वरूपमित्यर्थः 'व्रीहियवौ' व्रीहिं सुखरूपम् अभ्युदयरूपं च धान्यं, शरीरादात्मनः पृथग्भावरूपं यवं च, जन्ममरणे सुखदुःखे चेत्यर्थः 'अघाः' उपभुङ्क्षे ।

१७. 'अजगर इवाविकाः'—अहं कामये यत् 'अजगरः अविका इव' यथा अजगरः अनायासमल्पायासेनैव वा अजामेषादिक्षुद्रजीवान् भुङ्क्ते तथैव अहम् 'अ-जगरः' अभोक्ता एव सन् 'अविकाः' नानादेहेषु गमनागमनक्रियाः भुञ्जीय ।

१८. 'अश्वस्य वारो गोशफश्च ते'—हे आत्मन् ! 'अश्वस्य ते' भोक्तारं त्वामात्मानं 'वारः' विविधा वरणीयाः काम्यपदार्थाः 'गोशफः च' इन्द्रियैर्लब्धानि वाचा प्रवचनीयानि च नानाविधज्ञानानि प्राप्नुवन्ति ।

१९. 'श्येनपर्णी सा'—तव तु 'श्येनपर्णी' ज्ञानवतः आत्मनः परिपालिका 'सा' प्रसिद्धा परमा मोक्षपदवी अभिकाङ्क्षिता ।

२०. 'अनामयोपजिह्विका'—या मोक्षपदवी 'अनामया' सर्वविधरोगशोक-भयतापव्यथावेदनादि-विरहिता 'उपजिह्विका' रसनानिहितसरसधारेव अनवरतं रसप्रदा रसस्वरूपा च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्तम् १३०

को अर्य बहुलिमा इषूनि ॥१॥

'अर्य' हे प्रिय ! अर्यशब्दः प्रियवाचकोऽपि वर्तते वेदे इति 'मोनियर्-विलियम्स्'कोषकाराः। आप्टेकोषेऽपि अस्यार्थेषु 'प्रियः' इत्यन्यतमोऽर्थः परिगणितः। 'कः' को नाम, का सत्ता शक्तिर्वा 'बहुलिमा इषूनि' बहुलान् इषून् शरान् रोगशोकभयतापव्यथावेदनाचिन्ताविकलतादिकान् मानवहृदयवेधकान् क्षिपति अस्मासु इति शेषः। एभिर्बाणैर्मर्मणि विद्धो नरः प्रभो रौद्ररूपं स्मारं स्मारं पृच्छति इमं प्रश्नम्। दुःखैर्दग्धहृदय एव स्मरति आपदामपहर्तारं सुखसम्पदां प्रदातारमिति भावः।

को असिद्याः पयः ॥२॥

को अर्जुन्याः पयः ॥३॥

कः कार्ष्ण्याः पयः ॥४॥

'असिद्याः' असितायाः कृष्णशुक्लायाः चित्तवृत्तेः क्रियाया वा 'कः पयः' किं फलं भवति ? अथवा 'असिद्याः पयः कः' शुक्लकृष्णायाः चित्तवृत्तेः क्रियायाः वा फलं को ददातीति शेषः। असिद्याः इति पदे नञ् अल्पार्थकः, तृतीयमन्त्रे कार्ष्ण्याः पृथगुल्लेखात्। 'कः अर्जुन्याः पयः' शुक्लचित्तवृत्तेः शुक्लक्रियायाः वा किं फलम् ? को वा ददाति तस्याः फलम् ?

'कः कार्ष्ण्याः पयः' कृष्णचित्तवृत्तेः कृष्णक्रियाया वा किं फलम् ? को वा ददाति तस्याः फलम् ?

एतं पृच्छ कुहं पृच्छ ॥५॥

कुहाकं पक्वकं पृच्छ ॥६॥

हे अर्य ! हे प्रिय ! 'एतं पृच्छ' इमं प्रश्नं पृच्छ, अस्योत्तरं जिज्ञासस्व, कं पृच्छेयमिति जिज्ञासायामाह भगवान् वेदः 'कुहं पृच्छ' कुहयते विस्मापयते इति कुहः, 'कुह विस्मापने' (चु० आ० से०) इत्यतः पचाद्यच्, अदन्तत्वाद् गुणाभावः, स्वेन ज्ञानेन, अनुभवेन जीवनेन च योऽन्यान् विस्मापयते तं विश्वविस्मयावहजीवितं लोकोत्तरचरितं पुरुषं पृच्छ। 'पक्वकं कुहाकं पृच्छ' कुहयते विस्मयं कारयतीति कुहकः (उ० सू० २.३८), स एव कुहाकः, दीर्घश्छान्दसः। यद्वा कुह एव कुहकः। स्वार्थे कः। छान्दसे दीर्घे कुहाक इति रूपम्। पक्वकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पक्वधियं, परिणतप्रज्ञं, तप्ततनुं लोकविस्मयकरचरितं नरं पृच्छ इमं प्रश्नं, न तु यं कमपि अपरिपक्वबुद्धिम् ऐन्द्रजालिकोपमं पाखण्डिनं कुहाकम् ।

अस्य सूक्तस्य आद्यमन्त्रचतुष्के प्रयुक्तः 'कः' इति शब्दः श्लेषेण प्रजापतेरर्थमपि अभिधत्ते । तथा च चतुर्णामपि प्रश्नानामुत्तराणि प्रश्नेष्वेव प्रदत्तानि कः इति पदेन--

१. कः इत्यत्र किंशब्दः अनिर्ज्ञातस्वरूपेऽनिर्वचनीये देवे वर्तते । कः इति अनिर्ज्ञातस्वरूपो देवः प्रजापतिः । अपि वा, सर्वस्य हि सर्वनामसंज्ञा क्रियते, सर्वश्च प्रजापतिः, प्रजापतिश्च कः—पातञ्जलमहाभाष्यम् ।

२. यद्वा, सृष्टयर्थं कामयते इति कः । कामयतेर्डः । सृष्टिकामो वा सर्वकाम्यो वा । 'कः कमनो वा क्रमणो वा सुखो वा' (निरु० १०.२.२३.१४) ।

३. अथवा, कं सुखम् (निघ० ३.६) तद्रूपत्वात् प्रजापतिः क इत्युच्यते ।

४. अपि वा, इन्द्रेण पृष्टः प्रजापतिः मदीयं महत्त्वं तुभ्यं प्रदाय अहं कः कीदृशः स्यामित्युक्तवान् । स इन्द्रः प्रत्यूचे यदीदं ब्रवीषि अहं कः स्यामिति तदेव त्वं भवेति । अतः कारणात् क इति प्रजापतिराख्यायते ।

५. किं वा, करोति इति कः, जगतः कर्त्ता ।

६. उत वा, एक इत्यस्यादिवर्णलोपात् कः, एकोऽद्वितीय इत्यर्थः ।

७. अथवा, क्रामति सर्वत्र सञ्चरति इति कः, सर्वव्यापी देवः । क्रमेर्डः ।

तदेवम् एकोऽद्वितीयो जगतः कर्त्ता प्रजापतिरेव अस्मभ्यं शुक्लकृष्णतदुभयात्मकचित्तवृत्तीनां त्रिविधानां फलं ददाति स एव च क्षिपति अस्मासु कष्टक्लेशविपद्वेदनाबाणान् अस्मद्विकाससाधनार्थम् इति दिक् ।

यवा नो यति स्वभिः कुभिः ॥७॥
अकुप्यन्तः कुपायकुः ॥८॥
आमणको मणत्सकः ॥९॥
देव त्वप्रतिसूर्य ॥१०॥

हे देव ! 'यति स्वभिः कुभिः' स्वशब्दः क्षुद्रं स्वं क्षुद्रां निम्नाम् अहम्भावमयसत्तां तदीयस्वार्थांश्च आह कुशब्दश्च कुत्सितभावान्, कुत्सितपार्थिवविकारान् कामक्रोधादीन् । 'यति स्वभिः कुभिः' यति यावन्तोऽपि क्षुद्र'स्व'-भावाः निम्नस्वार्थाः, कुत्सिताः पार्थिवाः कामादिविकाराश्च सन्ति तेभ्यः सर्वेभ्यो 'नः यव' अस्मान् वियोजय, पृथक्कुरु, येन वयम् अविद्याः कार्ष्ण्याच्च फलैर्मुक्ताः स्यामेति भावः । 'यु मिश्रणे अमिश्रणे च' (अ० प० से०) । अत्र अमिश्रणं वियोजनं वा वर्तते । नः इति पदप्रयोगाच्च सामष्टिकीयं प्रार्थना, वैदिक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रार्थनाश्च प्रायेण समष्टिपराः, 'शन्नो अस्तु द्विपदे शं चतुष्पदे' इत्यादिषु शतशो मन्त्रवर्णेषु प्राणिमात्रकल्याणकामनाश्रवणात् ।

'अकुप्यन्तः' अक्रुध्यन्तः, क्रोधरहिताः स्मो वयं, क्रोधश्चात्रोपलक्षणं कामादीनां सर्वेषामन्तारिपूणाम् । तथा च 'काम एष क्रोध एष रजोगुणसमुद्भवः' इत्यस्य व्याख्यायां भगवत्पादशङ्कराचार्या आहुः—'स एष कामः प्रतिहतः केनचित् क्रोधत्वेन परिणमते । अतः क्रोधः अपि एष एव' (गीता ३.३७) इति कार्यकारणयोरभेदोपचारात् कार्ये कारणलक्षणया कारणे कार्यलक्षणया च क्रोधे एव षड्रिपूणामन्तर्भावः ।

अकुप्यन्तः कामक्रोधादिमुक्ताः स्मो वयम् । त्वं चासि 'कुपायकुः' कुपायानां रक्षणीयानाम्, कुः भूमिः, आश्रयः आधारो वा । अतः रक्ष उद्धर च अस्मान् शरणागतान् आर्तान् इति ध्वनिः ।

कुपायः कुप्यः रक्ष्यः इत्यर्थः । 'राजसूय-सूर्य-मृषोद्य-रुच्य-कुप्य-कृष्टपच्या-व्यथ्याः' (पा० ३.१.११४) इत्यनेन गुपेः क्यप्, आदेः ककारादेशश्च निपातितौ । कुप्य एव कुपायः, आकारोपजनश्छान्दसः । कुपयं गोपनीयमिति सायणः (ऋ० १.१४०.३) । यद्वा, कुपायः गोपाय्यः । वर्णव्यत्ययो वर्णलोपश्च छान्दसः ।

त्वम् 'आमणकः' आ ईषत् मन्दमन्दं मणसि, भणसि, ध्वनसि इति तथाभूतः, तद्ध्वनिद्वारा च मानयसि बोधं ज्ञानं च ददासि इति तथोक्तः, 'मन ज्ञाने' (दि० आ० अ०) 'मनु अवबोधने' (त० आ० से०) । अस्मदन्तरस्थः अन्तर्यामी त्वं निर्दिशसि नः कर्त्तव्यम् अन्तर्वाण्या, दिशसि नो वर्त्म पदे पदे अन्तरात्मनो मृदुमन्दस्वरेण । अन्तर्यामिनोऽस्या वाण्याः स्तुतिश्च एषु निगमेषु श्रूयते—

अन्तर्वाणीषु प्र चरा सुजीवसेऽनिन्द्यो वृजने सोम जागृहि ।
(ऋ० ९.८२.४)

यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ।
ब्रह्म तेन पुनीहि नः ॥ (ऋ० ९.६७.२३)

ईळानायावस्यवे यविष्ठ दूत नो गिरा ।
यजिष्ठ होतरा गहि ॥ (ऋ० २.६.६)

अन्तर्ह्यग्न ईयसे विद्वान् जन्मोभया कवे ।
दूतो जन्येव मित्र्यः ॥ (ऋ० २.६.७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अरुषो जनयन् गिरः सोमः पवत आयुषक् ।
इन्द्रं गच्छन् कविक्रतुः ॥ (ऋ० ९.२५.५)

तं त्वा हिन्वन्ति वेधसः पवमान गिरावृधम् ।
इन्दविन्द्राय मत्सरम् ॥ (ऋ० ९.२६.६)

स हि शर्धो न मारुतं तुविष्वणिः । (ऋ० १.१२७.६)

अयं भावः—'हे सोम अन्तर्वाणीषु सु जीवसे प्र चर', 'हे अग्ने ! ते अर्चिषि यत् पवित्रम् अन्तर् ब्रह्म आ विततं तेन नः पुनीहि', 'हे यविष्ठ दूत, हे यजिष्ठ होतः ! ईळानाय अवस्यवे गिरा नः आ गहि', 'अन्तर् हि ईयते अग्ने', 'सोमः गिरः जनयन् पवते', 'हे पवमान ! गिरावृधम् अस्मद्गिरा वर्धमानं, स्वगिरा च अस्मान् वर्धयमानं तं त्वा वेधसः हिन्वन्ति', 'सः अग्निर्हि मारुतं शर्धः न तुविस्वनिः' अस्ति, यथा मारुतं शर्धः प्राणशक्तयः अस्मासु नानाविध-कामनाऽऽवेगरवं जनयन्ति तथैव आत्माग्निरपि तत्तत्समयोपयुक्तम् अन्तर्ध्वनिं करोति प्राणशक्तीनां कोलाहलं शमयितुं, दर्शयितुं च ताभ्यः साधुपथम् । आत्माग्नेः साऽन्तर्वाणी, मार्गदर्शिका प्रेरिका च वागेव अत्र स्वनिशब्देन अभि-प्रेता । प्रज्वलतो भौतिकाग्नेः 'धू-धू' इति ध्वनिवत् आध्यात्मिकाग्नेर्यः प्रेरकोऽन्त-र्ध्वनिः तस्यैव सङ्केतकः 'स्वनि'शब्दः ।

तथा हि, असदाचरणप्रवृत्तेष्वस्मासु अस्मदन्तर्यामी परमेश्वरो भयशङ्का-लज्जादिभावान् समुत्पाद्य मृदुमन्द्रमङ्गलगिरा निर्दिशति नः सत्पथं सत्कर्तव्यञ्च ।

आमणकः सः 'मणत्सकः' मणन् अन्तर्ध्वनिं कुर्वन् सन् सः सकः शकः शक्ति-मपि ददाति, तदन्तर्ध्वन्यनुरूपाचरणसामर्थ्यमपि प्रसादीकरोति । आमणकः—आङ्पूर्वात् 'मण शब्दे' (भ्वा० प० से०) इति धातोः कर्तरि ण्वुल् । सकः—'शक्लृ शक्तौ' इत्यस्मात् अन्तर्भावितण्यर्थात् कर्तरि पचाद्यचि वर्णव्यत्ययेन शस्य सकारः ।

'देव' हे आमणक, मणत्सक देव ! 'त्व' त्वम् 'प्रतिसूर्य' सूर्येण प्रतिरूपितो भवसि, सूर्यस्तव प्रतिरूपकः, देदीप्यमानत्वात् स तव अप्रतिमतेजःपुञ्जं प्रति-रूपयति कियताप्यंशेन । यद्वा, नास्ति प्रतिद्वन्द्वी यस्य तथाभूतः सूर्यः अप्रति-सूर्यः 'देव तु अप्रतिसूर्य' हे देव ! त्वं तु अप्रतिसूर्यः असि, न प्रकाशितुं प्रभुः कोऽपि सूर्यः त्वत्पुरतः ।

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥
(मुण्डकोप० २.२.१०)

हे देव ! न केवलमन्तर्गिराऽनुगृह्णासि त्वमस्मान् अपि तु उद्भासयसि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मत्स्वान्तं तमस्स्तोमनिरासकसुदिव्यान्तर्भासा इत्याकूतम् ।

एनश्चिपङ्क्तिका हविः ॥११॥

प्रदुर्द्रुदो मघा प्रति ॥१२॥

'एनश्चिपङ्क्तिका' एनोभिः पापैः पापेष्टकाभिरिति यावत् चिता पङ्क्तिका पापकर्मश्रेणी पापाचारपरम्परा वा हविः जीवनयज्ञस्य आहुतिरस्ति, तां विना जीवनयज्ञानुष्ठानं नैव शक्यमिति मन्यमानान् 'मघा प्रति' मघवतः धनवतः, भोगविलासार्थम् ऐश्वर्यानुधाविनः भोगैश्वर्यप्रसक्तान् प्रति अभिलक्ष्य हे देव ! त्वं प्रदुद्रुं प्रबलं विद्रावणं ददासि, मुहुर्मुहुर्दुत्कारपूर्वकं प्रबलं विद्रावयसि तानिति भावः ।

परमतेजःपुञ्जस्वरूपोऽसौ अप्रतिसूर्यो देवो विजितषड्वर्गाणां शरणागतानामाश्रयः आन्तरदिव्यगिरा ज्ञानप्रदाता शक्तिवर्षिता च 'आत्मदा बलदाश्च' परं पापाचारपरायणानाम् अहर्निशमधर्म्यसाधनैर्धनसङ्ग्रहनिरतानां स एव विद्रावयिता विनाशयिता चेति तात्पर्यम् । मघा—मघमेषामस्तीति मघाः । अर्श-आद्यच् । द्वितीयाबहुवचनस्याकारः । प्रदुद्रुदः—प्रपूर्वकाद् द्रवतेः (भ्वा० प० अ०) यङ्लुगन्तात् क्विपि प्रदुद्रु इति साधु । तुगभावश्छान्दसः । प्रदुद्रुं ददातीति प्रदुद्रुदः । ददातेः कप्रत्ययः ।

शृङ्ग उत्पन्न ॥१३॥

मा त्वाभि सखा नो विदन् ॥१४॥

वशायाः पुत्रमा यन्ति ॥१५॥

हे 'उत्पन्न शृङ्ग' पूर्वमन्त्रद्वयप्रोक्तेषु पापपुरुषेषु उत्पन्न कामोद्रेक !

'नः सखा' 'यवा नो यति स्वभिः कुभिः', 'अकुप्यन्तः कुपायकुः' इत्यनयोर्मन्त्रयोः कीर्तितानां निरस्तसकलविकाराणां परास्तक्षुद्रस्वार्थानां नः अस्माकं सखायः 'त्वा मा अभि विदन्' त्वां नैव अभिजानीयुः परिचिनियुर्वा, को नाम कामावेगः इति तेषां परिचय एव न स्यात् शुकदेववत् स्त्रीपुम्भिदाऽतीतत्वात् यद्वा, त्वा मा अभि विदन् त्वा ते न प्राप्नुयुः, न स्यात्तेषां सम्पर्कस्त्वया सह कदापि, नित्यं निर्विकारा आसीरँस्ते इत्याशयः । 'यवा नो यति स्वभिः कुभिः' इत्येवं देवं प्रति प्रार्थितवन्तो वयं, भक्तवत्सलेन कुपायकुना तेन निर्विकारतां नीताः अकुप्यन्तः कृताश्च कथङ्कारं पुनः कुत्सितकामिजनसंसर्गमवाप्नुयामेति काकुध्वनिः ।

ईदृशाः जितात्मानः 'वशायाः' इन्द्रियाणि वशयति इति वशा तस्या विजितेन्द्रियायाः स्त्रियाः 'पुत्रम् आ यन्ति' पुत्रम् उपयान्ति तत्सङ्गार्थं ज्ञानलाभार्थ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ञ्च, यद्वा, तस्याः पुत्रत्वं प्राप्नुवन्ति पुनर्जन्मनि, पौर्वदेहिकं बुद्धिसंयोगम् उपलब्धुम् इति भावः ।

इरावेदुमयं दत ॥१६॥

अथो इयन्नियन्निति ॥१७॥

अथो इयन्निति ॥१८॥

अथो श्वा अस्थिरो भवन् ॥१६॥

उयं यकांशलोकका ॥२०॥

'इरावेदुमयं दत' इरायाः इलायाः, पृथिव्याः, अन्नमयभूमिकायाः अन्नमयकोशस्य वा वेदुः ज्ञानं तेन सम्पन्नं पुरुषं, चतुर्थ्यर्थे द्वितीया, पृथिव्याः पार्थिवपदार्थानाञ्च, संसारस्य सांसारिकद्रव्याणाञ्च ज्ञानेन सम्पन्नाय, आत्मनः पञ्चसु कोशेषु अन्नमयकोशमात्रज्ञानसमन्विताय देहात्मबुद्धये, अध्यात्मज्ञानशून्याय, प्राकृतिकज्ञानशालिने भोगवादिने चार्वाकाय दत दत्त इदं वक्ष्यमाणं ज्ञानं हे तज्ज्ञाः, पञ्चकोशज्ञा अन्नप्राणमनोविज्ञानानन्दमयपरमसत्स्वरूपपरमात्मतत्त्वविदः ।

तज्ज्ञानमाह – 'इयन्' पृथिवीम्, पार्थिवप्रकृतिमन्नमयभूमिकां वा उपगच्छन् मनुष्यः 'अथो इयन् इति' अथो अस्या भूमिकाया अनुभवानन्तरं द्वितीयवारं पुनरपि इमामुपसर्पन् 'अथो इयन् इति' अथ द्वितीयानुभवात् परमपि इमामुपाव्रजन्, अस्या आघातानन्नुभूयापि भूयो भूय इमामुपसीदन् मानुषः 'अथो अस्थिरः श्वा भवन्' अन्ते अस्थिरचित्तः शुनकः सञ्जायते । भुक्तोज्झितान्, दुःखमूलकत्वेन अनुभूतानपि संसारसुखभोगान् पुनः पुनः समीहमानः शिश्नोदरपरायणः पुमान् वान्तावलेही कामी सारमेय एव भवति ।

'उयम्' अहो बत ! 'यकांशलोकका' कुत्सितः यः इति यकः, यकांशे जीवनस्य यस्मिन् कुत्सिते अंशे ऐन्द्रियभोगस्वरूपे, यस्मिन् सांसारिकसुखभोगमार्गे लोकका इमे क्षुद्रपामरजनाः ग्रस्ताः सन्ति तं पश्यत तावत्, हे विवेकिनः !

अयमभिसन्धिः—आत्मनः शक्तिषु ज्ञानेच्छाकृतिषु कार्यकारणभावत्वात् योगानुभवात् परं पुनः पुनर्भोगेच्छा भोगप्राप्तेश्चेष्टा च दरीदृश्यते, कामोपभोगेन कामतृप्तेराकाशकुसुमोपमत्वात् । तथा चोक्तं मनुमहाराजेन—

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ (२.६४)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदेवं भोगैषिणो जन्ममरणचक्रात् संसारबन्धनाच्च मुक्तिरसाध्यैव ।

अथ सांसारिकविषयाणामस्थिरत्वाद् विषयैषिणश्चित्तवृत्तिः शुनकस्येव अस्थिरा सञ्जायते । अतस्तृष्णात्याग एव चित्तवृत्तीनां निरोधसंसिद्धेः, त्रिविध-तापात्यन्तनिवृत्तेर्भवबन्धमुक्तेश्च अनन्यसाधनम् इति सूक्तस्य रहस्यार्थः ।

इरा—इला रलयोरभेदात् । 'इला इत्यन्ननाम गोनाम वा' (निघ० २,७-२,११) इला अन्नं गौर्वा अस्यामस्तीत्यर्शआदित्वादच् । अन्नवती गोमती वा पृथिवीत्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्तम् १३१

आ मिनोनिति भद्यते ॥१॥
तस्य अनु निभञ्जनम् ॥२॥
वरुणो याति वस्वभिः ॥३॥

'आमिनोन् इति' अहम् आ समन्तात् पूर्णतया मिनोन् प्रक्षिप्तवान् प्रक्षिपामि वा प्रकृतिं, प्राकृतिकपदार्थान्, तज्जन्यसांसारिकसुखजातञ्च इत्येतत् यदा 'भद्यते' भण्यते, उच्यते इत्येषा सङ्कल्पवाग् यदा उच्चार्यते तदा 'तस्य' ईदृशसङ्कल्पकर्तुः 'अनु' सङ्कल्पमनु 'निभञ्जनम्' तदीयाऽज्ञानस्य तज्जन्यदुःखजातस्य च नितरां भञ्जनं विखण्डनं, विध्वंसनं भवति ।

'वरुणः' वरुणस्वरूपः परमेश्वरः 'वस्वभिः' स्ववसुभिः, निजैश्वर्यैः सह तं त्यक्तप्रकृतिसङ्गं, विधूतबाह्यवैभवं भक्तम् 'अनु याति' अनुव्रजति तस्य योगक्षेमवहनार्थमिति भावः । 'अनु' इति पदं द्वितीयमन्त्रादनुवर्तनीयं 'याति' इति पदेन सह अन्वेतव्यञ्च । यद्वा, तादृशं भक्तं वरुणदेवः याति उपगच्छति, प्राप्नोति तस्य योगक्षेमभारं स्वयं वोढुम् । तथा चाम्नातम् ऋग्वेदस्य सप्तममण्डलीयवरुणसूक्ते—

अयं सु तुभ्यं वरुण स्वधावो हृदि स्तोम उपश्रितश्चिदस्तु ।
शं नः क्षेमे शमु योगे नो अस्तु यूयं पात स्वस्तिभिः सदा नः ॥
(ऋ० ७.८६.८)

अथापि ऐन्द्रावरुणे सूक्ते —

उपो रयिर्देवजूतो न एतु प्र णः स्पार्हाभिरूतिभिस्तिरेतम् ।
(ऋ० ७.८४.३)

अस्मे इन्द्रावरुणा विश्ववारं रयिं धत्तं वसुमन्तं पुरुक्षुम् ।
प्र य आदित्यो अनृता मिनात्यमिता शूरो दयते वसूनि ॥
(ऋ० ७.८४.४)

अपि च द्वितीयमण्डलस्य वरुणसूक्ते—

तव व्रते सुभगासः स्याम स्वाध्यो वरुण तुष्टुवांसः ।
(ऋ० २.२८.२)

माहं राजन्नन्यकृतेन भोजम् । (ऋ० २.२८.९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एभिर्मन्त्रवर्णैः करुणावरुणालयस्य वरुणदेवस्य नित्याभियुक्तभक्तानां निखिल-भारवहत्वं विशदमुदीरितम् ।

पूर्वसूक्तद्वये पल्पस्य इरावेदुगयस्य च (२०.१२६.१४-१६,२०.१३०.१६-२०) वर्णनं कृतम् । स हि देहात्मबुद्धिः स्वकीयमन्नमयकोशमेव सर्वस्वं मन्यते । 'यथा पिण्डे तथा ब्रह्माण्डे' इति न्यायेन च असौ ब्रह्माण्डे अपि सर्वत्र अन्नतत्त्वं, जडप्रकृतिमेव पश्यति न तु तदन्तर्वासि, तज्जीवनभूतमात्मतत्त्वम् । स प्रकृतौ एव आसक्तः लिप्तश्च आस्ते सततम् ।

अथ प्रकृतसूक्ते संसारेऽनासक्तस्य, प्रकृतौ अलिप्तस्य पुरुषस्य वर्णनं क्रियते । स हि प्रकृतौ वर्तमानोऽपि तस्या मोहिन्या न विमोह्यते, तस्यै स्वान्तरे आश्रयं न दत्ते, कमलदलवत् संसाराम्भसा असंस्पृष्ट एव आस्ते, तस्य विषयरसो विनिवर्तते, यतो हि स प्रकृतौ तद्विषयेषु च सर्वत्र तं परमरसस्वरूपं पुरुषमेव पश्यति, विषयास्तस्य नीरसा भवन्ति, भगवति विन्यस्तसमस्तभारो वीतसकलचिन्तोऽसौ स्वयं नानुधावति विषयान्, भगवान् वरुण एव तमनुधावति स्वीयसर्वविधैश्वर्यैः तस्य भौतिकप्राणिकमानसिकाध्यात्मिकसंवर्धनार्थम् इति मन्त्रत्रयस्यैतस्य मर्म ।

आमिनोन्—आङ्पूर्वात् 'डुमिञ् प्रक्षेपणे' (स्वा० उ० अ०) इत्यस्मात् लङ्प्रथमपुरुषैकवचने छान्दसं रूपम् । भद्यते—भन्दतेः स्तुतिकर्मणः (निरु० ५.१.२) कर्मणि यक् । यद्यपि पाणिनीयैः 'भदि कल्याणे सुखे च' पठितः, तथापि चकारः पूर्वधातोः 'वदि अभिवादनस्तुत्योः' इत्यस्य स्तुत्यर्थं शब्दार्थं वा समुच्चिनोति इति नैरुक्ताः ।

शतं वा भारती शवः ॥४॥
शतमाश्वा हिरण्ययाः । शतं रथ्या हिरण्ययाः ।
शतं कुथा हिरण्ययाः । शतं निष्का हिरण्ययाः ॥५॥

'वा' अपि च, निपातानां नानार्थत्वात् वाशब्दोऽत्र चार्थे वर्तते, 'शतं भारती' शतशोऽन्तर्वाण्यः, 'शतं शवः' शतशः प्रकाशपूर्णशक्तयः तम् अनु यान्ति । 'अनु याति' इति पदे अनुवर्तेते यथायुक्तमन्वीयेते च ।

'शतं हिरण्ययाः अश्वाः आ' शतशः सौवर्णचिन्मय्यः सत्यचेतनात्मिकाः शक्तयः तम् आयान्ति उपगच्छन्ति । 'शतं हिरण्ययाः रथ्याः' शतशः विज्ञानचितः सक्रियाऽऽनन्दशक्तयः, 'शतं हिरण्ययाः कुथाः' ऋतचितः शतशः पावित्र्यशक्तयः, 'शतं हिरण्ययाः निष्काः' शतशः हिरण्यवर्णाः सत्यचिद्रश्मयः तम् आ यान्ति । 'आ याति' इति पदे पञ्चमे मन्त्रे चतुर्ष्वपि चरणेषु यथायुक्तमन्वीयेते ।

शवः—'वेदे बल-शक्तिसामर्थ्यानामर्थे बहवः शब्दा दृश्यन्ते । तेषु च प्रत्येकं स्वस्मिन् सूक्ष्ममर्थविशेषं धारयति । तत्र 'शवस्' इति पदं प्रायेण शक्त्या सह

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकाशस्य भावमपि बोधयति ।'—श्रीअरविन्दः (वेदरहस्यम्, पृ० २०)

एतदाधारेण अस्माभिः 'शवः' इति शब्दस्य 'प्रकाशपूर्णशक्तयः' इत्यर्थः कृतः ।

रथ्याः—रथशब्दो गतिशीलानन्दस्य प्रतीकम् इति उपपादितमस्माभिः (अथर्व० २०.१२७.२ मन्त्रस्य व्याख्यायाम्) । रथं वहन्तीति रथ्याः रथाश्वाः । 'तद्वहति रथयुगप्रासङ्गम्' (पा० ४.४.७६) इति सूत्रेण यत् । गतिशीलानन्दस्य वाहका अश्वाः, प्रापिकाः शक्तयः सक्रियानन्दशक्तयो वा ।

कुथाः—'अस्त्री कुशं कुथो दर्भः पवित्रम्' इत्यमरकोषप्रामाण्यात् कुथाः पवित्राणि । पूयतेऽनेनेति पवित्रमिति व्युत्पत्त्या च पवित्रापरपर्यायाः कुथाः पावित्र्यसंसाधकाः, पावित्र्यसाधनभूताः शक्तयः इत्यर्थः ।

निष्काः—स्वर्णमुद्राः । स्वर्णञ्च परमसत्यस्य विज्ञानमयसत्यस्य वा प्रतीकमित्यतः निष्काः सत्यचिद्रश्मयः ।

अहल कुश वर्तक ॥६॥
शफेन इव ओहते ॥७॥
आय वनेनती जनी ॥८॥

हे 'अहल' न कृष्टः हलेन इति अहलः तत्सम्बुद्धौ अहल, गुरोर्वाण्याः, विद्यायाः उपनयनादिसंस्काराणां च हलेन अकृष्ट, अशिक्षित, असंस्कृत, अप्राप्तद्वितीयजन्मन्, अदीक्षित, अद्विज ! 'कुश' कौ पृथिव्यां, पार्थिवपदार्थेष्वेव शेते इति तथाभूत, प्रकृतिग्रस्त, अजागरितात्मन् ! 'वर्तक' प्रकृतौ एव वर्तते, वर्तनं व्यवहारं च करोति इति तथाभूत, सांसारिकव्यवहारलिप्त जीव ! त्वादृशो जनः 'शफेन इव ओहते' पशोः खुरेण पादतलप्रहारेण छत्रक इव कीट इव वा आ समन्तात् अर्द्यते, मर्द्यते हिंस्यते च । अतो मा कुरु गर्वं स्वीयसांसारिकैश्वर्यस्य धनजनयौवनानां च ।

'आय' आगच्छ, 'जनी' जगज्जननी 'वनेनती' भक्तौ याच्ञायां च कृतायां नता भवति प्रणतस्य आर्तिहरणार्थम् कल्याणसाधनार्थञ्च । अतस्तामेव अशरणशरणस्वरूपां शरणं गच्छ, प्रार्थय च सत्यहृदयेन उद्धारार्थम् इति हार्दम् ।

ओहते—आङ्पूर्वात् 'उहिर् अर्दने' (भ्वा० प० से०) इत्यस्मात् कर्मणि लटि यगभावश्छान्दसः ।

वनेनती—वननमेव वनः । 'वन शब्दे सम्भक्तौ च' (भ्वा० प० से०), यद्वा, 'वनु याचने' (त० आ० से०) इत्यस्मात् घञर्थे कः । तदन्तात् सप्तम्येकवचनम् । वने नती नमनशीला इति सप्तमीतत्पुरुषः । असंज्ञायामपि सप्तम्या अलुक् छान्दसः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वनिष्ठा नाव गृह्यन्ति ॥९॥
इदं मह्यं मदूरिति ॥१०॥
ते वृक्षाः सह तिष्ठति ॥११॥
पाक बलिः ॥१२॥
शक बलिः ॥१३॥
अश्वत्थ खदिरो धवः ॥१४॥

'वनिष्ठाः' अतिशयेन सम्भजनकर्तारः, प्रभुभक्तेरनन्ययाचकाः 'न अव गृह्यन्ति' एतद् न अवबोधन्ति यद् 'इदं मह्यं मदूः इति' इदं जगद् मह्यं हर्षकारकमानन्ददायकं वा इति ।

अवपूर्वो ग्रहिरवरकोटिकं मिथ्याग्रहणमभिधत्ते । ऐकान्तिकाहैतुकभक्तियाचकास्तु न कदापि वस्तुस्वरूपमन्यथा गृह्णन्ति । मिथ्याग्रहमुक्तास्ते बाह्यक्षणिकसुखप्रदम् 'अनित्यमसुखम् इमं लोकं' यथातत्त्वं जानन्तः, यथार्थानन्ददायकं न मन्वाना अत्र भगवन्तमेव भजन्ते, न तु जागतिकवस्तुजातम् इति भावः ।

अस्मिन् तत्त्वबोधे च 'ते' प्रभुभक्ताः भक्तिमात्रभिक्षुकाः 'वृक्षाः' वृक्षवत् अचलास्तिष्ठन्ति । यतः स प्रभुः 'सह तिष्ठति' तैः सह सदा विराजति । स्वयमच्युतश्चासौ तानविचलान् करोति सत्यज्ञाने ।

ते भक्ताः स्वात्मानं संसारसुखेभ्यो न समर्पयन्तो भगवन्तं ब्रुवते—'पाक' हे परिणतप्रज्ञ ! अयं ममात्मा, मम सम्पूर्णसत्ता तुभ्यं 'बलिः' आहुतिरस्ति, तुभ्यं बलिरूपेण समर्पिता । 'शक' हे शक्तिशालिन् ! हे सर्वशक्तिमन् ! अयमात्मा तुभ्यं 'बलिः' बलिरूपेण समर्पितो मया । त्वम् 'अश्वत्थ' न श्वो भवति इति अश्वः अस्थिरः संसारः, 'उषा वा अश्वस्य मेध्यस्य शिरः' (बृह० १.१.१) इत्यत्र ब्रह्माण्डरूपस्याश्वस्य वर्णनमिति श्रीअरविन्दाः (Cent. Vol. 12, pp. 399-400), तस्मिन् तिष्ठतीति अश्वत्थः, विश्वगतो विश्वव्याप्तोऽसि । 'सुपां सुलुक्०' इत्यादिना सोर्लुक् । 'खदिरः' खदति खादति, भक्षयति, संहरति सर्वं जगदिति खदिरः जगत्प्रलयकर्ताऽसि । 'धवः' जगतां पतिः प्रभुर्वाऽसि । भक्ताः सकलजगतां कर्त्रे, धर्त्रे हर्त्रे च सर्वशक्तिमते भगवते सम्पूर्णात्मसमर्पणं कुर्वन्ति सर्वस्वं च समर्पयन्तीति भावः ।

वनिष्ठाः—वनति वनुते वा इति वनिता । वनतेर्वनोतेर्वा कर्तरि तृच् । वनितृणामतिशयेन वनितारः वनिष्ठाः । अतिशायने इष्ठनि 'तुरिष्ठेमेयस्सु' (पा० ६.४.१५४) इति तृज्लोपः ।

पाक—पाकेति प्रशस्यनाम (निघ० ३.८), 'पाकः पक्तव्यो भवति विपक्वप्रज्ञः आदित्यः' (निरु० ३.१२) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खदिरः—खदति हिनस्ति भक्षयति वेति खदिरः । 'खद स्थैर्यहिंसाभक्षणेषु' (भ्वा० प० से०) इत्यतः 'अजिरशिशिर०' (उ० १.५३) इत्यादिना किरच्-प्रत्ययो निपात्यते ।

अरदुपरम ॥१५॥

शयो हत इव ॥१६॥

व्याप पूरुषः ॥१७॥

अदूहमित्यां पूषकम् ॥१८॥

अत्यर्धर्च परस्वतः ॥१९॥

दौव हस्तिनो दृती ॥२०॥

वनिष्ठः, कृतपूर्णात्मसमर्पणो भक्तः संसारासक्तम् अहल-कुश-वर्तकम् उपदिशति—'अरत्' हे चञ्चल ! 'उपरम' उपरामवृत्ति धारय, उपरतो भव विषयाभिलाषात् सांसारिकव्यवहाराच्च ।

'शय इव' शयितः सुप्तो जन इव उपरम विषयेन्द्रियसंयोगात् आसवितमार्गाच्च । 'हत इव' मृतवत् पूर्णतयोपरम संसारात् । शयितस्यापि स्वप्ने मनोराज्यविजृम्भणे सङ्कल्पविकल्पसुखदुःखसंवेदनादिदर्शनात् हतस्य दृष्टान्तः समुपात्तो रजोगुणात् पूर्णोपरामसम्पादनार्थम् ।

हे अरत् ! चञ्चलस्वभाव, अशान्तचित्त, राजसपुरुष ! पश्य, 'पूरुषः' परमपुरुषः परमात्मा 'व्याप' व्याप्तोऽस्ति सम्पूर्णविश्वम्, ओतप्रोतो ब्रह्माण्ड-मण्डले ।

तस्य चिन्तनेन त्वम् अनुभविष्यसि यत् 'पूषकं' सर्वपोषकं, सकलजगत्संवर्धकं, पूषणं परमेश्वरम् एव अहम् 'इत्याम्' गतिम्, सकलचेष्टा अदोहम्, दुग्धवान्, स एव मम सर्वविधक्रियाणां मूलम्, तच्छक्त्यैव प्रवर्तन्ते मम निखिलचेष्टाः, जीवनस्य अखिलव्यापाराः ।

एतदनुभूय च 'परस्वतः' 'परः' इति संज्ञावतः, पर इति यस्यानन्यविषया संज्ञा तस्य परात्परस्य 'परमा परावत्' (ऋ० ४.५०.३), 'अव्यक्तात् पुरुषः परः, पुरुषान्न परं किञ्चित्' (कठोप० १.३.११), 'अति अर्ध ऋच' सातिशयम्, अर्धेन ऋद्धया, वृद्धया सह, ऋद्धं समृद्धं प्रवृद्धं च यथा स्यात्तथा ऋच अर्चनं स्तुतिं वा कुरु ।

तं स्तुवंश्च त्वं जानीहि—'हस्तिनः' हस्तवतः पुरुषार्थिनः 'द्वौव' द्वौ मार्गौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रेयः प्रेयश्चेति प्रथितौ 'हस्तिनः' हस्तवतः शिल्पिगणस्य स्वर्णकारलोहकारादेः 'दृती' चर्मपुटौ, भस्त्रापुटौ इव द्वे उपकरणे साधने वा भवतः, स च तयोरुपयोक्ता स्वामी। तद्यथा स्वर्णकारो लोहकारो वा हस्तेन दृती चालयन् स्वकार्यं साधयति, स्वर्णाद्याभूषणानि खड्गाद्यायुधोपकरणानि वा रचयति तथा पुरुषार्थी पुरुषः स्व-साधनभूतौ श्रेयःप्रेयोमार्गौ भस्त्रामिव समन्वयपूर्वकं प्रयुज्य धर्मार्थकाममोक्षान् पुरुषार्थान् सम्पादयति, श्रेयःप्रेयसोः सविवेकप्रयोगेण समताभ्यासेन च सिद्धिलाभं कुरुते ।

अरत्—'ऋ गतिप्रापणयोः' (भ्वा० प० अ०) इत्यतः शतृप्रत्ययः। शत्रन्तात् सम्बोधनैकवचने छान्दसं रूपम् ।

अर्ध—'ऋधु वृद्धौ' (दि० प० से०, स्वा० प० से०) इत्यतो घञि लघू-पधगुणे निष्पन्नात् अर्ध इति प्रातिपदिकात् परस्य तृतीयैकवचनस्य 'सुपां सुलुक्०' इत्यादिना लुक् ।

ऋच—'ऋच स्तुतौ' (तु० प० से०) इत्यतो लोण्मध्यमपुरुषैकवचने रूपम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्तम् १३२

आदलाबुकमेककम् ॥१॥

अलाबुकं निखातकम् ॥२॥

'आत्' अनन्तरं, पूर्वसूक्तप्रोक्तरीत्या प्रकृतिसङ्गपरित्याग-संसारव्यवहारोपराम-सम्पूर्णात्मसमर्पणस्वरूपाऽऽत्मसाधनायाः परमित्यर्थः, 'अलाबुकं' निरालम्बं, निराधारम् 'एककम्' एकमेवाद्वितीयं 'निखातकं' दृढनिखातशंकुवद् बद्धमूलम्, तत एव च 'अलाबुकं' स्वयम् आलम्बनिरपेक्षं सर्वेषामालम्बनञ्च ब्रह्म अत्यर्धर्चं सातिशयं समृद्धञ्च स्तुहि इति पूर्वसूक्तस्य नवदशमन्त्रेण (२०. १३१.१९) सह अन्वेतव्यम्। यद्वा, ईदृशं निराधारं, सर्वाधारमेकमेवाद्वितीयं ब्रह्म परिचिन्तयेति शेषः।

एककमितिपदेन ब्रह्मणः सजातीयविजातीयस्वगतभेदशून्यमद्वितीयत्वं, 'निखातकम् अलाबुकम्' इति पदाभ्याञ्च तस्य स्वयम् अमूलत्वम्, अकारणत्वं, सर्वमूलत्वं, सर्वकारणत्वम्, अविनाशित्वं, निराधारत्वं सर्वाधारत्वञ्च विवक्षितम्।

अलाबुकम्—न लम्बते इति अलाबु। 'लबि शब्देऽवस्रंसने च' (भ्वा० आ० से०) इत्यतो नञ्पूर्वात् [नञि] 'लम्बेर्नलोपश्च' (उ० १.९०) इत्यनेन विधीयमानो णित् ऊप्रत्ययोऽत्र बाहुलकाद् ह्रस्वो बोध्यः। नलोपे णित्त्वाद् वृद्धिः। अलाबु एव अलाबुकम्। स्वार्थे कन्।

कर्करिको निखातकः ॥३॥

तद्वात उन्मथायति ॥४॥

कुलायं कृणवादिति ॥५॥

स परमेश्वरः 'कर्करिकः' करोति जगद्रचयतीति तथाभूतः सकलब्रह्माण्डकर्ता, कर्तुमकर्तुमन्यथाकर्तुमीश्वरश्च। 'निखातकः' दृढनिखातः, अतिदृढः, अमूलत्वात् सर्वमूलत्वाच्च अविनाशीति यावत्।

'तद्' तद् ब्रह्म तं परमेश्वरं वा 'वातः' प्राणायामसाधनावशीकृतः प्राणः, बाह्यान्तरस्तम्भवृत्तिः बाह्याभ्यन्तरविषयाक्षेपी च चतुर्विधः प्राणायामः इत्यर्थः, 'उन्मथायति' उन्मथ्य प्रकाशयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्वा, वातः प्राणोऽस्यास्तीति वातः, वशीकृतप्राणः प्राणायामाभ्यासी साधकः. वातशब्दात् मत्वर्थे अर्शआद्यच् । तादृशो वातः प्राणायामाभ्यासी ब्रह्मजिज्ञासुः तद् उन्मथायति इति पूर्ववत् । सकृद् उन्मथितोऽसौ परमेश्वरो नित्यमस्मासु प्रकाशितस्तिष्ठेदित्येतदर्थं विधिमाह भगवान् वेदः—

तस्मै परमात्मने, तस्य नित्यनिवासार्थं साधकः 'कुलायं' नीडम्, आवासस्थानं हृदयमन्दिरं 'कृणवात् इति' सज्जीकुर्यात्, तत् सर्वथा विशुद्धं विधाय तद्वासयोग्यं प्रकल्पयेत् एव। इतिपदमत्र अवधारणे, हृदयमन्दिरस्य परिशोधनमपरिहार्यमिति भावः ।

परमात्मनो निवासस्थानस्य कुलायत्वकीर्तनात् तस्य पक्षिस्वरूपत्वमाक्षिप्यते । तथा चाहुर्मन्त्रवर्णाः—'द्वा सुपर्णा सयुजा सखाया···' (ऋ० १.१६४.२०, अथर्व० ९.९.२०), 'एकः सुपर्णः स समुद्रमा विवेश···' (ऋ० १०.११४.४), 'सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति' (ऋ० १०.११४.५), 'हंसः शुचिषद् वसुरन्तरिक्षसद्' (ऋ० ४.४०.५) । परमस्वतन्त्रसुपर्णरूपः परमहंसस्वरूपो वाऽसौ कदा सहसा प्रादुर्भविष्यत्यस्मासु इति न ज्ञायते केनापि । अतोऽस्माभिस्तस्य स्वागतार्थं हृदयमन्दिरं सदैव सज्जं, स्वच्छं सुविवृतञ्च स्थापनीयं येनासौ समागतोऽपि हृदयम् अपरिपूतं संवृतञ्च प्रेक्ष्य न प्रतिनिवर्तेत इति ।

कर्करिकः—करोति सर्वमित्यर्थे 'डुकृञ् करणे' (त० उ० अ०) इत्यतः 'आदृगमहनजनः किकिनौ लिट् च' (पा० ३.२.१) इति सूत्रेण ताच्छील्ये किः लिड्वद्भावश्च । गुणे, द्वित्वे हलादिशेषाभावः चुत्वाभावश्च छान्दसौ । कर्करिरेव कर्करिकः । स्वार्थे कन् ।

यद्वा करोतेः बाहुलकाद् औणादिके इकनि धातोः कर्करादेशः । अपि वा 'फर्फरीकादयश्च' (उ० ४.२१) इत्यत्र फर्फरीकादिगणे 'कर्करिक'शब्दोऽपि समावेश्यः । करोतेरिकन्प्रत्यये द्वित्वमभ्यासस्य रुक् च निपातनीये ।

उग्रं वनिषदाततम् ॥६॥

न वनिषदनाततम् ॥७॥

हृदये प्रादुर्भूतं च तम् 'उग्रम्' उद्गूर्णबलं, शक्तिशालिनम्, 'आततम्' आ समन्ततः ततं विस्तीर्णं, सर्वत्र व्याप्तं परमात्मानं भक्तः 'वनिषत्' संभजेत्, याचेत् सम्प्रार्थयेद् वा भगवतः सम्प्रार्थ्यं तत एव च समुपलभ्यं, सर्वानर्थनिवृत्तिपरमानन्दस्वरूपब्रह्मप्राप्तिलक्षणं दुर्लभं वस्तु परदुःखशमनञ्चेति शेषः । तथा चोक्तं भगवता भागवते—

न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत् ॥
(११.१४.१४)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न कामयेऽहं गतिमीश्वरात्परामष्टर्धियुक्तामपुनर्भवं वा ।
आर्ति प्रपद्येऽखिलदेहभाजामन्तःस्थितो येन भवन्त्यदुःखाः ॥

(९.२१.१२)

'अनाततम्' अव्यापकम्, ज्ञानबलैश्वर्यैः परिच्छिन्नं कमपि 'न वनिषत्' न कदापि भजेत् याचेद् वा, परिच्छिन्नस्य उपासनया सान्तानित्यफलस्यैव लाभात दुःखात्यन्तनिवृत्तेरसम्भवाच्च ।

अथवा, अनयोर्द्वयोर्मन्त्रयोरित्थमर्थयोजना कार्या—उग्रं सर्वशक्तिमन्तं भगवन्तम् आततं सुविस्तृतमपरिमितमपरिच्छिन्नं वस्त्वेव ब्रह्मानन्दादिकं प्रार्थयेत् न तु अनाततं परिमितं, परिच्छिन्नं सान्तमनित्यञ्च सांसारिकसुखसम्पदादिकं, स्वर्गादिदिव्यलोकभोगवैभवं वैदेह्यप्रकृतिलयत्वादिकमानुश्रविकमैश्वर्यं वा ।

अस्यां व्याख्यायाम् अध्याहार्यताजन्यदोषो निरस्तो भवति ।

वनिषत्—'वन सम्भक्तौ' (भ्वा० प० से०) इत्यतः, 'वनु याचने' (त० आ०से०) इत्यतो वा लेटि, तिपि 'सिब्बहुलं लेटि' (पा० ३.१.३४) इत्यनेन सिपि अडागमे, सिप आर्धधातुकत्वाद् इडागमे षत्वे च वनिषदिति रूपम् । तानादिकात् छान्दसे परस्मैपदे लेटः 'त'स्थाने तिबिति विशेषः ।

क एषां कर्करी लिखत् ॥८॥
क एषां दुन्दुभिं हनत् ॥९॥
यदीयं हनत् कथं हनत् ॥१०॥
देवी हनत् कुहनत् ॥११॥
पर्यागारं पुनः पुनः ॥१२॥

'एषाम्' एतेषां साधकानां 'कः कर्करी' कः क्रियाशीलः तं परमेश्वरं स्वहृदयपटे 'लिखत्' आलिखति, चित्रपटे इव तस्य स्थिरचित्रमङ्कयति चित्तपटले ? विरल एवेति भावः ।

यद्वा, 'एषाम्' एतेषां साधकानां 'कः' को नाम 'कर्करी' कर्करीं वीणां, दैवीं शरीरलक्षणां 'लिखत्' लिखति, स्पृशति वादयतीति यावत् ?

अयमाशयः- दुर्लभ एव स साधको य उपास्त्यर्थं शरीरवीणां वादयितुं वेत्ति । 'अथ खल्वियं दैवी वीणा भवति । तदनुकृतिरसौ मानुषी वीणा भवति' (श० ब्रा० ८.९) इति प्रतिपादयता ब्राह्मणकारेण शाङ्खायनेन शरीरलक्षणदिव्यवीणावादनार्थं सम्प्रेर्यते साधकः । 'लौकिकवीणाख्यवाद्यविशेषावयवादौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरीरशिरःप्रभृत्यवयवबुद्धिः' (ऐ० ब्रा० ३.२.५) इति ऐतरेयब्राह्मणवचनमपि अन्तर्वीणावादनं निर्दिशति प्रचोदयति च ब्रह्मप्राप्तये शरीरवीणोपासनार्थम्, वीणावादनोपलक्षितसङ्गीतस्य सच्चिदानन्दसम्प्राप्तेः सरलसरससमर्थसाधनत्व-स्मरणात् । तथा चाह याज्ञवल्क्यः—

वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ।
तालज्ञश्चाप्रयासेन मोक्षमार्गं स गच्छति ।। (या० स्मृ० ३.११५)
अतो गीतप्रपञ्चस्य श्रुत्यादेस्तत्त्वदर्शनात् ।
अपि स्यात् सच्चिदानन्दरूपिणः परमात्मनः ।।

अस्ति चान्यदपि आप्तवचनम्—

पूजात् कोटिगुणं ध्यानं ध्यानात् कोटिगुणो जपः ।
जपात् कोटिगुणं गानं गानात् परतरं नहि ।।

शरीरवीणोपासका विश्वकविरवीन्द्रनाथठक्कुरा अपि एवमाहुः स्वकीये जगद्वन्द्ये गीताञ्जलिकाव्ये—

'प्रभो ! स्वकीयेऽस्मिन् समागमे मामपि न्यमन्त्रयस्त्वं सम्मिलनार्थम् । तस्मिन् समारोहे वीणावादनं मम कर्त्तव्यमेवेति जानन् अहम् अवादयं तां निजयोग्यतानुसारेण, पृच्छामि चाधुना—अपि प्रविशेयमन्तः, प्रणमेयं च त्वां समौनम् ?' ('विश्राम'गीतात्)

'प्रिये ! नरीनृत्यते तव दिव्यलोको मम जीवने । उद्भवति झङ्कारो हृदय-वीणातः ।' ('उल्लास'गीतात्)

'सर्वशक्तिमान् परमात्मैव ममान्तरात्मा । स ममान्तस्तले अन्तर्हितः अनुप्राणयति च मां स्वकोमलस्पर्शेन । स एव च हर्षविषादयोरतन्त्रीभिर्झङ्कृतां करोति हृदयवीणाम् ।' ('अन्तर्ध्वनि'गीतात्)

विरल एव स उपासको य इमां शरीरवीणां वादयति, यावच्च न ईष्टे इमां वादयितुं तावत् लौकिकवीणायां शरीरावयवबुद्धिं कृत्वा तामेव वादयति उपास्तये, सङ्गीतसाधनया रसस्वरूपब्रह्मसाक्षात्कारसम्प्राप्तये च ।

अस्मिन् मन्त्रे 'लिखत्' इति पदे लिखतिः स्पर्शनार्थः । स्पर्शनं विना लेखनक्रियाया असाध्यत्वात् स्पृशतिक्रियाऽपि लिखतेरन्तर्निहितोऽर्थः । वीणायाः स्पर्शनं कोमलकरेण स्पर्शो वा वादने परिणमतीति वीणायाः स्पर्शनं वादनमेवेति पर्यवसितोऽर्थः । तथा च 'आप्टे'-'मोनियर् विलियम्स्'कोषकाराभ्यामपि लिखतेः स्पर्शनार्थोऽभ्युपेयते ।

'एषाम्' एतेषां साधकानां 'कः' कः खलु 'दुन्दुभि हनत्' हृदयाऽन्तर्ध्वन्यमान-स्वतःसन्नद्यमानदुन्दुभ्यादिवाद्यानामनाहतनादं शृणोति ? विरला एव योग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निष्णाता नीहारधूमार्कानिलानलादीनि (श्वेताश्व० २.११-१२) किङ्किणी-दुन्दुभिमृदङ्गनादप्रभृतीनि च ब्रह्माभिव्यक्तिपूर्वचिह्नान्यनुभवन्तीति भावः। तथा हि, 'श्रोत्राकाशयोः सम्बन्धसंयमाद् दिव्यं श्रोत्रम्।' 'ततः प्रातिभश्रावण-वेदनादर्शास्वादवार्ता जायन्ते।' (पातञ्जलयोगदर्शनम्, विभूतिपादः ४१,३६) इति योगसूत्रयोर्भाष्ये व्यासेन प्रोक्तम्—'श्रोत्राकाशयोः सम्बन्धे कृतसंयमस्य योगिनो दिव्यं श्रोत्रं प्रवर्तते।' 'श्रावणाद्दिव्यशब्दश्रवणम्' (जायते)।

योगाभ्यासलब्धं तद् दिव्यश्रोत्रमेव हृच्चक्रोद्भूतसूक्ष्माऽनाहतनादश्रवणक्षमं भवति। अत एव श्रीशङ्कराचार्याः योगतारावलौ प्राहुः—

सर्वचिन्ताः परित्यज्य सावधानेन चेतसा।
नाद एवानुसन्धेयो योगसाम्राज्यमिच्छता॥

नादबिन्दूपनिषद्यपि प्रणवब्रह्मयोगेन नादाविर्भावः परिकीर्तितः—

ब्रह्मप्रणवसन्धाने नादो ज्योतिर्मयः शिवः।
स्वयमाविर्भवेदात्मा मेघापायेंऽशुमानिव॥

अस्य नवममन्त्रस्यायमाधिभौतिकोऽर्थोऽपि द्रष्टव्यः—

'एषाम्' एतेषां साधकानां 'कः' को नाम 'दुन्दुभि हनत्' भगवत्स्तुतेः दुन्दुभि नादयति, सडिण्डिमघोषं भगवतः गुणधर्मस्वभावान् प्रचारयति प्रसारयति च संसारे? दुर्लभा एवेदृशा भगवद्भावप्रसारैकव्रता भागवतोत्तमभक्ता इत्यर्थः। वेदे तु एतादृग्भक्तस्य हृदयोद्गाराः शतशो दृश्यन्ते मन्त्रेषु। तद्यथा—

तुञ्जेतुञ्जे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः।
न विन्धे अस्य सुष्टुतिम्॥
(ऋ० १.७.७, अथर्व० २०.७०.३)

समेत विश्वे वचसा पतिं दिव एको विभूरतिथिर्जनानाम्।
स पूर्व्यो नूतनमाविवासत् तं वर्तनिरनु वावृत एकमित् पुरु॥
(अथर्व० ७.२१.१)

एतो न्विन्द्रं स्तवाम ईशानं वस्वः स्वराजम्।
न राधसा मर्धिषन्नः॥ (ऋ० ८.८१.४)

त्वामग्ने मनीषिणस्त्वां हिन्वन्ति चित्तिभिः।
त्वां वर्धन्तु नो गिरः॥ (ऋ० ८.४४.१९)

यस्येमे हिमवन्तो महि त्वा यस्य समुद्रं रसया सहाहुः।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम॥
(ऋ० १०.१२१.४, यजु० २५.१२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स दर्शतश्रीरतिथिर्गृहेगृहे वनेवने शिश्रिये तक्ववीरिव ।
जनंजनं जन्यो नातिमन्यते विश आ क्षेति विश्यो विशंविशम् ॥
(ऋ० १०.९१.२)

दुर्लभा ननु जगति भगवद्भक्तिगानगुञ्जका भक्तराजाः !

'यदि इयम्' योगनिष्णाता ब्रह्मवादिनी देवी भक्तसाधकमण्डली वा 'हनत्' अन्तर्दुन्दुभिं वादयति, नादब्रह्म शृणोति भगवतोऽनन्तकल्याणगुणगणं च गायति जनगणमध्ये सभेरीघोषं तर्हि सा 'कथं हनत्' केन विधिना तत् सर्वं सम्पादयति ? दुरूहो दुर्विज्ञेयो दुःसाध्यश्चासौ विधिरिति तात्पर्यम् ।

अग्रिमएकादशमन्त्रस्थं देवीपदमत्र अपकृष्यते । अस्मिन् मन्त्रे देवीनां योगाभ्याससाध्याऽनाहतनादश्रवण-भगवद्गुणकीर्तननिरूपणात् स्त्रीशूद्रौ नाधीयातामिति स्वार्थसाधकधूर्तोद्भावितमनार्षवचनं निराक्रियते, 'यथेमां वाचं कल्याणीमा वदानि जनेभ्यः', 'पञ्चजना मम होत्रं जुषध्वम्', 'समानं मन्त्रमभिमन्त्रये वः' इत्यादय ऋङ्मन्त्रवर्णाश्च स्मार्यन्ते सम्पुष्यन्ते च ।

'देवी' देवीव देवी इति लुप्तोपमा । साक्षाद्देवीप्रतिमेयं योगिनी ब्रह्मवादिनी च, यद्वा दिव्यगुणसमुपेता, भगवत्प्रोक्तया दैव्या सम्पदा सुसम्पन्ना सत्साधकततिः 'हनत्' तां शरीराख्यां दिव्यां वीणां वादयति अन्तर्वाद्यध्वनींश्च निशामयति चेत् तर्हि सा 'कुहनत्' 'कुह हनत्' कुत्र करोति तां हृद्वीणावादन-निशामनसाधनाम् ? न हि जनसंकुलप्रदेशे परं क्वचित् शान्तैकान्तस्थलविशेषे इति गूढार्थः ।

'उपह्वरे गिरीणां सङ्गमे च नदीनां धियो विप्रा अजायत ।'
'योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥'
'शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।'
'विविक्तदेशसेवित्वमरतिर्जनसंसदि ।'
(गीता ६.१०-११, १३-१०)

इत्यादिशास्त्रवचनप्रामाण्याद् गिरिगुहानदीतीरादावेव देहाख्यदिव्यवीणावादनसम्भवात् ।

अथवा, पूर्वोक्तां भगवद्गुणगाथां सडिण्डिमघोषं घोषयति घोषयेद् वा चेत् तर्हि 'कुहनत्' कुत्र घोषयति घोषयेद् वा इति प्रश्नः । दशमैकादशमन्त्रस्थप्रश्नयोरुत्तरम् अग्रिममन्त्रे प्रदत्तम् ।

'पर्यागारम्' आगारं स्वगृहं परि परितः सर्वतः, प्रतिगृहम्, गृहाद् गृहं गत्वेत्यर्थः 'पुनः पुनः' मुहुर्मुहुर्वारंवारं सा हरेर्गुणावलिं 'हनत्' निनादयति सदुन्दुभिवादनं सतूर्यघोषं वा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपास्यदेवस्य सर्वदा, सर्वत्र, सर्वतो गुणानुवर्णनं नामसङ्कीर्तनं च तस्मिन्स्तन्मयतासाधनार्थं, तस्य सर्वत्र प्रसारार्थञ्च सुलभं सरसं च साधनमिति सूचितमत्र पुनःपदद्विरुक्त्या ।

कर्करी—कर्करीशब्दात् परस्य द्वितीयैकवचनस्य अमः 'सुपां सुलुक्०' (पा० ७.१.३९) इत्यादिना लुक्, पूर्वापरयोः पूर्वसवर्णदीर्घो वा ।

लिखत्—लिखतेर्लेटि तिपि अडागमे इकारलोपे च रूपम् ।

हनत्—हन्तेर्लेटि तिपि अडागमे इकारलोपे च रूपम् ।

कुहनत्—अस्य स्थाने क्वचित् 'कुह हनत्' इति पाठान्तरम् । तस्यैवायं सङ्क्षेप इति उन्नेयम् ।

त्रीण्युष्ट्रस्य नामानि ॥१३॥
हिरण्य इत्येके अब्रवीत् ॥१४॥
द्वौ वा ये शिशवः ॥१५॥
नीलशिखण्डवाहनः ॥१६॥

'उष्ट्रस्य' ओषति दहति समूलामविद्यामिति उष्ट्रस्तस्य, समूलाविद्याविदाहकस्य, यद्वा उषः दाहाद् आध्यात्मिकाधिभौतिकाधिदैविकत्रितापात् त्रायते इति तस्य दुःखदावानलादशेषविश्वपरित्राणपरायणस्य परमेश्वरस्य 'त्रीणि नामानि' त्रिसंख्यकानि नामधेयानि सन्ति ।

'हिरण्यः' हिरण्यगर्भ इत्यस्य सङ्क्षेपोऽयं शब्दः, यथा देवदत्तस्य देव इति, तस्य परमेश्वरस्य त्रिषु नामसु हिरण्यः हिरण्यगर्भ इत्येकं नाम 'इति एके अब्रवीत्' इति केचिद् ज्ञानिनः आहुः ।

'हिरण्यगर्भः समवर्तताग्रे' (ऋ० १०.१२१.१) इति मन्त्रे स्वयं भगवान् अनेनैव नाम्ना आह आत्मानम् । हिरण्यानि सूर्यचन्द्रनक्षत्रादीनि हिरण्मयानि ज्योतिष्पिण्डानि गर्भे यस्य स हिरण्यगर्भः ।

तथा हि, सिसृक्षुः स्वयम्भूर्भगवान् अपः सृष्ट्वा तासु बीजमवासृजत् । तद् बीजं हैमाण्डं हिरण्मयमण्डं वाऽभवद् यदाधुनिकविज्ञानपरिभाषायां Nebulae अथवा नीहारिकापुञ्जः प्रोच्यते । ईदृशस्य तस्य हिरण्मयाण्डस्य अधिष्ठाता एव हिरण्यगर्भः इति दिक् ।

'ये शिशवः' ये शिशूपमाः बालबुद्धयोऽपरिपक्वप्रज्ञाश्चिन्तनाक्षमाश्च ते 'द्वौ वा' द्वे अन्ये नामधेये अपि आहुः । 'वा'ऽत्र समुच्चये, चार्थे अप्यर्थे वा ।

के ते द्वे इति जिज्ञासायामाह भगवान् वेदः—'नीलशिखण्डवाहनः' नि नितराम् ईरयति गमयति गतिमत् करोतीति नीरो रजोगुणः, स एव नीलः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रलयोरभेदात्, यद्वा, नि नितराम् एलयति प्रेरयतीति नीलो रजोगुणः तस्य शिखां ज्वालां डाययति उत्प्रेरयतीति नीलशिखण्डः रजोज्वालासमुज्जृम्भकः, स चासौ वाहनश्चेति नीलशिखण्डवाहनः। वां गतिं, रजःप्रेरितां क्रियां हन्ति, हिनस्ति, नाशयति, अवसाययति इति वाहनस्तमोगुणस्तत्प्रधानः संहारको रुद्रो वा।

इदमाकूतम्—सृष्टेः प्राक् स्वयम्भूर्भगवान् सूर्यचन्द्रनक्षत्रादिदेदीप्यमानज्योतिष्पिण्डगर्भः, परमज्योतिर्मयः, सत्त्वगुणप्रधानो हिरण्यगर्भो भवति। अथ सिसृक्षासमाविष्टः स्वयम्भूर्भगवान् जङ्गम्यमानजगज्जननाय प्रकृतिपरमाणुषु प्रस्पन्दं सृजन् रजोगुणस्वरूपः, नीलस्य रजोगुणस्य शिखायाः ज्वालायाः डायकः समुज्जृम्भकः सञ्जायते। स एव च सृष्टेः सन्ध्याकाले तां सञ्जिहीर्षुः रजोगुणस्य वां गतिं निघ्नन् निरुन्धन् वा वाहनस्तमोगुणप्रधानः सम्पद्यते।

तत्र हिरण्यगर्भत्वं तावत् परमात्मनः स्वाभाविको गुणः तस्य सत्त्वप्रधानज्योतिःस्वरूपत्वात्। अत एव ज्ञानिनस्तं तथा साक्षात्कुर्वन्तः हिरण्य इत्याहुः। अथ रजोगुणस्तमोगुणश्च तस्य औपाधिकौ गुणौ। अमीमांसकाः, मन्दमानसाः, शिशुकल्पाः पुरुषास्तम् एतदवरगुणद्वयोपहितं नीलशिखण्डं वाहनञ्चापि आह्वयन्ति इति रहस्यम्।

उष्ट्रस्य—ओषति दहति इति उष्ट्रः। 'उष दाहे' (भ्वा० प० से०) इत्यतः औणादिकः ष्ट्रन्, स च कित् (उ० ४.१६३)। कित्त्वाद् गुणाभावः। उष्ट्र इति प्रातिपदिकात् षष्ठ्येकवचने रूपम्। यद्वा, ओषणं दहनमेव उट्। 'उष दाहे' इत्यतो भावे क्विप्। उषः दाहात् त्रायते इति उष्ट्रः। 'उष'शब्दे उपपदे 'त्रै'धातोः 'क'प्रत्ययः।

अब्रवीत्—ब्रवीतेर्लङ्प्रथमपुरुषबहुवचनविवक्षायां व्यत्ययेनैकवचनं छान्दसम्।

नीलशिखण्डवाहनः—नितराम् ईरयति एलयति वा इति नीलः। निपूर्वात् 'ईर गतौ' (भ्वा० प० से०) इत्यतो णिजन्तात् यद्वा 'इल प्रेरणे' (चु० उ० से०) इत्यतः पचाद्यच्। नीलस्य शिखा नीलशिखा। तां डाययति इत्यर्थे सोपपदात् 'डीङ् विहायसा गतौ' (भ्वा० आ० से०, दि० आ० से०) इत्यस्माद् धातोर्णिजन्तात् 'ट'प्रत्ययः औणादिको बाहुलकात्। छान्दसं रूपम्। वां गतिं हन्ति इति वाहनः। क्विबन्ते वाशब्दे उपपदे हन्तेः पचाद्यच्। नीलशिखण्डश्चासौ वाहनश्चेति कर्मधारयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्तम् १३३

१-६ अथर्वा ऋषिः । कुमारी देवता । १-३,५ निचृदनुष्टुप्, ४,६ अनुष्टुप् ।

विततौ किरणौ द्वौ तावा पिनष्टि पूरुषः ।
न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥१॥

'द्वौ किरणौ' द्वौ विक्षेपकौ गुणौ, भावौ वृत्तिविशेषौ वा रजस्तमोऽभिधानौ, नीलशिखण्डवाहनः इति पदेन पूर्वसूक्तान्ते निर्दिष्टौ रजोगुणतमोगुणौ 'विततौ' व्यापकतया प्रसृतौ सर्वत्र,

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभिर्गुणैः ॥
(गीता १८.४०)

इति शास्त्रवचनात् । 'तौ' गुणौ 'पूरुषः' परमपुरुषः परमेश्वरः 'आ पिनष्टि' समन्ततः सञ्चूर्णयति, स्वकीयसत्त्वप्रधानस्वरूपसाक्षात्कारसम्प्रदानार्थं त्रिगुणातीतस्वरूपोपलब्धिसोपानसंरचनार्थञ्चेति भावः । परमात्मदर्शनेन राजसतामसवृत्ती सम्पिष्टे भवतः, समूलं विनश्यत इत्यर्थः । 'कुमारि' हे कुमारि ! पूर्वसूक्तस्य दशमैकादशमन्त्रयोः 'इयं', 'देवी' इति पदाभ्यां प्रकीर्तिता योगिनी ब्रह्मवादिनी च अत्र कुमारि इति पदेन सम्बोधिता ब्रह्मचारिणीत्वात्, हे ब्रह्मचारिणि ! 'तत्' तद् ब्रह्म 'न वै तथा' न खलु तथाविधं तादृशं वा 'यथा कुमारि मन्यसे' यथाविधं यादृशं वा हे कुमारि त्वं तच्चिन्तयसि, विभावयसि आकलयसि वा । कुमारिशब्दस्यावृत्तिरुच्यमानं प्रति पुनर्ध्यानाकर्षणाय । दुर्विज्ञेयं खलु ब्रह्म ।

'न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः ...'
यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥
(केनोप० १.३,५)

इत्यादिशास्त्रवाक्यैर्ब्रह्मणो वाङ्मनसागोचरत्वकीर्तनात् ।

हे कुमारि ब्रह्मचारिणि ! ब्रह्मवादिनि देवि ! त्वया पर्यागारं (सू० १३२. १२) प्रतिगृहं सङ्कीर्तनादिसाधनैः सम्प्रसार्यमाणं सगुणब्रह्म केवलं तद्रूपमेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नास्ति यद्रूपं त्वं घोषयसि गेहे गेहे इति हार्दम् ।

अस्य मन्त्रस्य पूर्वार्धं 'किरणौ' इति पदस्य लक्ष्यार्थभेदेन स्वस्वप्रतिभाबलेन बहुधा व्याचक्षते वेदविदो विपश्चितः । तद्यथा—

'द्वौ किरणौ' तमस्स्तोमापसारकरश्मिवत् संसारासक्तिनिरासकौ, चित्तवृत्तिनिरोधकौ अभ्यासवैराग्यस्वरूपौ द्वौ किरणौ 'विततौ' व्यापकप्रभावौ स्तः । 'पूरुषः' योगसाधकः 'तौ आ पिनष्टि' ते द्वे साधने सर्वात्मना अनुशीलयति, सततं समनुसरति ।

अथवा, 'द्वौ किरणौ' अन्धकारविद्रावककिरणवद् इन्द्रियदोषविद्रावकौ श्वासप्रश्वासौ 'विततौ' व्यापकप्रभावौ स्तः । 'पूरुषः' प्राणायामी साधकः 'तौ आ पिनष्टि' रेचक-पूरक-कुम्भक-बाह्याभ्यन्तराक्षेपप्रक्रियया तौ पूर्णतया पिनष्टि निरुणद्धि, वशीकरोति मनोनिग्रहायेति भावः ।

अपि वा, 'द्वौ किरणौ' मनोबलात्मबलरूपौ विघ्नबाधाविद्रावकौ द्वौ किरणौ 'विततौ' सुविस्तृतप्रभावौ । 'पूरुषः तौ आ पिनष्टि' अध्यात्मसाधनापरः पुमान् तौ पुनः पुनः प्रयुनक्ति सिद्धिलाभायेत्यर्थः ।

किरणौ—किरति विक्षिपत्यन्धकारमिति किरणः । 'कॄ विक्षेपे' (तु० प० से०) इत्यतः औणादिके क्युप्रत्यये (उ० २.८२) योरनादेशे ॠत इत्वे किरण इति प्रातिपदिकं निष्पद्यते । तस्मात् प्रथमाद्विवचने रूपम् ।

मातुष्टे किरणौ द्वौ निवृत्तः पुरुषानृते ।
न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥२॥

'द्वौ किरणौ—ते अनृते' तौ द्वौ विक्षेपकौ पूर्वमन्त्रोक्तौ रजोगुणतमोगुणौ, यद्वा, ते प्रसिद्धे अनृते अनृतमार्गप्रवर्तके सत्यमार्गान्निवर्तके च रजस्तमसी, 'किरणौ' इति उद्देश्यं कर्तृपदम्, 'अनृते' इति उद्देश्यस्य स्वरूपवर्णनपरं समानाधिकरणपदम्, साक्षादसत्यस्वरूपे ते रजस्तमसी इति भावः, 'मातुः पुरुषः' माति निर्माति प्रमाति च सर्वं जगदिति माता, अशेषविश्वस्य विधाता विज्ञाता च परमपुरुषः, तस्य प्रसादात् इति शेषः 'निवृत्तः' निवर्तेते ।

रजस्तमसोर्निवृत्तिः सत्त्वे स्थितिश्च त्रिगुणात्मकापराप्रकृतेरधीश्वरस्य परमपुरुषस्य प्रसादेनैव साध्ये, नान्यथेति सारसर्वस्वम् । उत्तरार्धं पूर्ववत् ।

अथ केचित् 'पुरुषानृते' इति संहितापाठस्य 'पुरुषान् ऋते' इति पदपाठं स्वीकुर्वाणा इत्थं व्याचक्षते[1] पूर्वार्द्धम्—

'मातुः ते' जगन्मातुस्तव प्रसादात् 'ऋते' ऋतः सत्यस्वरूपो गुरुः, ऋतं

---

१. तेषां व्याख्यातॄणां व्याख्याऽस्माभिर्न साकल्येन समुपात्ता, परं परिवर्तिताऽत्र तत्राऽऽध्यात्मिकार्यनिबद्धदृष्टिभिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यमयं शास्त्रम्, ऋतश्च ऋतञ्चेति ऋते, 'नपुंसकमनपुंसकेन' (पा० १.२.६९) इति नपुंसकैकशेषः, 'द्वौ किरणौ' संसारासक्तिनिरासकौ विवेकविरागौ च 'पुरुषान्' साधकान् 'निवृत्तः' नि नितरामत्यन्तं निवर्तयतः सांसारिकसुखभोगात् यद्वा नि नितान्तं वर्तयतः दीपयतः, तेजस्विनं कुरुतः ।

निपूर्वाद् 'वृतु भाषायां दीप्तौ च' (चु० उ० से०, भ्वा० प० से०) इत्यतो लट्प्रथमपुरुषद्विवचने, छान्दसे विकरणव्यत्यये रूपम् ।

अपि वा, 'द्वौ किरणौ' मनोबलात्मबलस्वरूपौ द्वौ रश्मी 'पुरुषान्' साधकान् पुंसः 'ऋते' सत्ये 'निवृत्तः' प्रदीपयतः । शिष्टं समानम् । अस्यां व्याख्यायां

तत्सवितुर्वरं रूपं ज्योतिः परस्य धीमहि ।
यन्नः सत्येन दीपयेत् ॥

इति महर्षि-श्रीअरविन्ददृष्टगायत्र्या अन्तिमचरणस्यार्थः परिपुष्यते ।

मातुः—मातेर्मिमीतेर्वा तृजन्तात् षष्ठ्येकवचने रूपम् ।

निवृत्तः—निपूर्वाद् 'वृतु वर्तने' (भ्वा० आ० से०) इत्यतः लट्प्रथमपुरुषद्विवचने छान्दसे पदव्यत्यये विकरणव्यत्यये च रूपम् ।

पुरुष—पुरुषशब्दात् परस्य षष्ठ्येकवचनस्य सुपां सुलुगिति लुक् ।

निगृह्य कर्णकौ द्वौ निरायच्छसि मध्यमे ।
न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥३॥

हे कुमारि ! त्वं 'द्वौ कर्णकौ' नावः कर्णाविव, केनिपाताविव जीवननौकायाः द्वौ कर्णौ केनिपातौ वा रजोगुणतमोगुणौ 'निगृह्य' नियम्य, वशीकृत्य 'मध्यमे' मध्यावस्थायां, सन्तुलितावस्थायां, साम्यावस्थायां 'निरायच्छसि' निर्निःशेषेण आ समन्ततश्च नियन्त्रितौ स्थापयसि जीवनव्यापारेषु ।

अयमभिसन्धिः—यथा नौकाम् ऋजुदिशायां सरलसरणौ वा सारयितुं तस्याः कर्णौ प्रान्ताभ्यामपवार्य पुनः पुनः मध्यदेशमानीयेते, स्ववशीकृत्य च तथैव स्थाप्येते तथैव जीवननावः सम्यक् सञ्चालनार्थं सुरक्षणार्थञ्च रजस्तमसोर्नियन्त्रणं साम्यावस्थायां सत्त्वगुणवशे वा स्थापनम् अत्यावश्यकम् । अयं भावश्च 'कर्णकौ' इति पदे लुप्तोपमास्वीकारेण समर्प्यते ।

अथवा, हे कुमारि ! त्वं 'द्वौ कर्णकौ' बाह्यान्तरे द्विविधे करणे, दशेन्द्रियाणि मनश्चेत्यर्थः 'निगृह्य' निरुध्य प्रत्याहृत्य 'मध्यमे' स्वसत्ताया मध्यदेशे हृदयकेन्द्रे 'निरायच्छसि' नियन्त्रिते स्थापयसि, अनेन इन्द्रियप्रत्याहारेण धारणाध्यानसमाधियोग्यतां सम्पाद्य आत्मपरमात्मसाक्षात्कारसम्प्राप्तये इत्यर्थः इति केचित् ।

अपि वा, 'द्वौ कर्णकौ' अष्टसु योगाङ्गेषु यमनियमासनप्राणायामप्रत्याहार-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपाः पञ्च बहिरङ्गयोगहेतवः बाह्यं करणम् धारणाध्यानसमाधयस्त्रयोऽन्तरङ्ग-योगहेतवश्च आन्तरं करणम्, द्वे अपि करणे 'निगृह्य' स्वायत्तीकृत्य, सुसम्पाद्येति यावत्, 'मध्यमे' भुवनान्तःस्थिते, ब्रह्माण्डहृदयस्वरूपे परमेश्वरे 'निरायच्छसि' निःशेषेण मनो नियच्छसि तत्सन्दर्शनार्थमित्येके । उत्तरार्धं पूर्वं गतम् ।

कर्णकौ—किरति विक्षिपति नौकां यथाभिमतदिशि इति कर्णः केनिपातो नौदण्डविशेषः । किरतेः नप्रत्यय औणादिकः (उ० ३.१०) । ऋवर्णस्य गुणे नस्य मूर्धन्यः, कर्ण एव कर्णकः । स्वार्थे कन् । 'कर्णः श्रोत्रमरित्रं च' इति दुर्गः । कर्णधारस्तु नाविकः इत्यमरः (१.१२) ।

यद्वा, क्रियतेऽनेनेति करणं साधकतमः साधनविशेषः । करोतेः करणे ल्युट् । करणकम्, स्वार्थे कन् । करणकशब्दस्य रेफगतावर्णलोपेन लिङ्गव्यत्ययेन च कर्णकौ इति रूपं छन्दसि ।

उत्तानायै शयानायै तिष्ठन्ती वाव गूहसि ।
न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥४॥

मन्त्रस्य उत्तरार्द्धे 'तत्' इनि पदेन लिङ्गातीतम् अनिर्वाच्यं ब्रह्म विवक्षितम्, यद् वेदे—

न नूनमस्ति नो श्वः कस्तद् वेद यदद्भुतम् । (ऋ० १.१७०.१)
वेनस्तत् पश्यन्निहितं गुहा सद् । (यजु० ३२.८)
वेनस्तत् पश्यत् परमं गुहा यद् । (अथर्व० २.१.१)
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास ।
(ऋ० १०.१२९.२)
दश शता सह तस्थुस्तदेकम् । (ऋ० ५.६२.१)
तदेवाग्निस्तदादित्यस्तद् वायुस्तदु चन्द्रमाः ।
तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः ॥ (यजु० ३२.१)

इत्यादिभिर्मन्त्रवर्णैः शतशो निर्दिष्टम् । प्रकृतमन्त्रे पूर्वार्द्धे 'उत्तानायै शयानायै तिष्ठन्ती' इति त्रिभिः स्त्रीलिङ्गपदैः तस्यैव शक्तिः, ब्रह्मशक्तिर्विवक्षिता ।

हे ब्रह्मशक्ते ! 'उत्तानायै शयानायै तिष्ठन्ती वा', उत्तानायै शयानायै इत्युभयत्र प्रथमार्थे चतुर्थी व्यत्ययेन, उत्ताना ऊर्ध्वं तता, ऊर्ध्वमुखी स्थिता, उत्थिता जाग्रती वा, शयाना सुप्ता वा, तिष्ठन्ती स्थाणुवत् अचलं स्थिता वा—ब्रह्मण आसु तिसृष्वप्यवस्थासु जाग्रत्स्वप्नसुषुप्त्याख्यासु त्व 'अवम् गूहसि' प्रकृतिं सर्वतः समालिङ्गसि प्रेम्णा, तस्यामोतप्रोता तिष्ठसि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'वाव गूहसि' इति पदपाठे तु निश्चितमेव आलिङ्गसि इति शब्दार्थः। प्रकृतिं सृष्टिं च अनुग्रहीतुं, ताभ्यां सानुग्रहमाश्रयप्रदानार्थं तयोरालिङ्गनं तव ध्रुवो नियम इति भावः।

अपि वा, 'उत्तानायै शयानायै' इत्युभयत्र क्रियार्थोपपदे स्थानिनि तुमन्ते च अप्रयुज्यमाने 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' (पा० २.३.१४) इत्यनेन तुमन्तस्य कर्मस्थाने (द्वितीयास्थाने) चतुर्थी। 'उत्तानायै शयानायै' उत्तानां शयानां वा प्रकृतिमनुग्रहीतुमित्यर्थः।

हे ब्रह्मशक्ते! 'तिष्ठन्ती' स्थाणुवत् सुस्थिरमवस्थिता त्वम् 'उत्तानायै' उत्तानां प्रकृतिम्, सर्गादौ स्वप्रभुप्रदत्तप्रस्पन्देन सञ्जातत्रिगुणवैषम्या, सर्जनाय उत्तानाम्, उत्ताताम्, उत्थितां, समुद्यतां, सक्रियां प्रकृतिं, किंवा 'शयानायै' शयानां प्रकृतिम्, प्रलयकाले सत्त्वरजस्तमसां साम्यावस्थायां प्रसुप्तां प्रकृतिम्—उभयविधामपि प्रकृतिमुपकर्तुमनुग्रहीतुं वा 'वाव गूहसि' सुनिश्चितमेव समालिङ्गसि सृष्टिस्थितिसंहृतिस्वरूपस्वप्रयोजनसिद्धौ दत्तदृष्टिरिति गूढाभिसन्धिः।

श्लक्ष्णायां श्लक्ष्णिकायां श्लक्ष्णमेवाव गूहसि।
न वै कुमारि तत्तथा यथा कुमारि मन्यसे॥५॥

हे 'तत्'पदवाच्य ब्रह्मन्, परमात्मन्, तच्छक्ते वा! त्वं 'श्लक्ष्णायाम्' मनोहारिण्यां 'श्लक्ष्णिकायां' मृदुलायां, ब्रह्मजिज्ञासोराध्यात्मिकप्रकृतौ अध्यात्मप्रवणचित्तवृत्तौ वा 'श्लक्ष्णम् एव' मृदुलमनोहरमधुरभावनिवहं हरिभक्तिसर्वभूतहितरतिप्रभृतिम् एव, एवेत्यवधारणे, ईदृशभागवतभावानेव नान्यानिति भावः 'अव गूहसि' अव विशुद्धतयाऽविमिश्रतया गोपयसि, सुरक्षसि तस्य हृद्गुहायामिति भावः।

अवेत्युपसर्गोऽवगमाऽवमानाऽवधारणाऽलम्बनाऽवदानाऽवहननाऽवकल्पनाऽवतरणाऽवगाहनव्यापनाभिभवेषु वर्तते इति आप्टेकोषकाराः। अत्रायमवदातताद्योतको द्रष्टव्यः।

अपि वा, हे कुमारि! ब्रह्मवादिनि, ब्रह्मचारिणि देवि! 'श्लक्ष्णायाम्' जीवात्मपरमात्मनोराश्लेषसम्पादनसमर्थायाम्, तयोः सायुज्यसाधिकायां 'श्लक्ष्णिकायाम्' मनोहरायां ब्रह्मविद्यायां, विषयसप्तमी, तद्विषये इत्यर्थः, 'श्लक्ष्णम् एव' मृदुलमधुरभावम्, अनुरागं ब्रह्मैषणाब्रह्मजिज्ञासाद्यपरनामधेयम् एव ऐकान्तिकतया 'अव गूहसि' निजहृदयगुहायां गोपयसि, श्रवणमनननिदिध्यासनसंज्ञकसाधनानि संसेवसे रहसीति रहस्यार्थः इति केचित्।

अस्यां व्याख्यायां कुमारीपदं ब्रह्मोद्वाह्य-जीवपत्नीसङ्केतकं सम्भवति गुह्यप्रतीकात्मकभाषया। तथा हि, एष्वेव कुन्तापसूक्तेषु प्रथमे (१२७तमे) सूक्ते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टमनवममन्त्रयोः 'पतिर्वदति जायया', 'जाया पतिं वि पृच्छति' इति चरणयोः प्रकृतिपुरुषयोर्जीवपत्नीजगत्पत्योर्वा दम्पत्योरिव संवादः सुस्पष्टं सूचित इत्यवोचाम वयमनयोर्व्याख्याने । सन्ति चान्येऽपि मन्त्रवर्णा यत्र जीवेश्वरयोर्भार्याभर्तृभावः सुविशदं कीर्तितः । तद्यथा—

अच्छा म इन्द्रं मतयः स्वर्विदः ···

परि ष्वजन्ते जनयो यथा पतिम्···। (ऋ० १०.४३.१)

यन्मन्युर्जायामवहत् सङ्कल्पस्य गृहादधि ।
क आसं जन्याः के वराः क उ ज्येष्ठवरोऽभवत् ।। (अथर्व० ११.८.१)

अथर्ववेदस्यैकादशकाण्डस्य अष्टमे सूक्ते प्रलयात्परं जगदुत्पत्तेर्वर्णनं प्रकृतेः परमेश्वरस्य च विवाहरूपकेण कृतम् । तत्र जायतेऽस्यां सर्वं जगदिति जाया, सिसृक्षाविषयापन्ना पारमेश्वरी शक्तिः परा प्रकृतिरिति यावत् । सा परा प्रकृतिः परमेश्वरस्य भार्या, स च तस्याः वरः पतिर्वेति अभिधावृत्त्याऽभिहितं प्रथममन्त्रे । जीवश्च पराप्रकृतेरंश एवेति स्वयं भगवता—

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ।।

इति भगवद्गीतायां (७.५) प्रोक्तत्वात् परमेश्वरः तस्या जीवलक्षणपत्न्या अपि पतिरिति सर्वं चतुरस्रम् । एवमेव—

पतिर्बभूथासमो जनानाम् । (ऋ० ६.३६.४)

पतिरिव जायामभि नो न्येतु । (ऋ० १०. १४९.४)

मर्यायेव कन्या शश्वचै ते । (ऋ० ३.३३.१०) ।

इत्यादयो मन्त्रवर्णा अपि जीवस्य भार्याभावाभिपोषका द्रष्टव्याः ।

अथ श्रीरामानन्दाचार्या अपि 'श्रीवैष्णवमताब्जभास्कर'ग्रन्थे प्राहुः—

पितापुत्रसम्बन्धो जगत्कारणवाचिना ।
रक्ष्यरक्षकभावश्च रेण रक्षकवाचिना ।।
शेषशेषित्वसम्बन्धश्चतुर्थ्या लुप्तयोच्यते ।
भार्याभर्तृत्वसम्बन्धोऽप्यनाहार्यत्ववाचिना ।।
अक्षरेणापि विज्ञेयो मध्यस्थेन महामते ।
स्वस्वामिभावसम्बन्धो मकारेणाथ कथ्यते ।।

इत्यलमतिप्रपञ्चेन ।

श्लक्ष्णायाम्—१. श्लिष्यतीति श्लक्ष्णा सुकुमारा तस्याम् । 'श्लिष आलिङ्गने' (दि० प० अ०) इत्यस्माद् धातोः 'श्लिषेरच्चोपधायाः' (उ० ३.१९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति सूत्रेण क्स्नप्रत्यये उपधाया अद्भावे च 'षढोः कः सि' (पा० ८.२.४१) इत्यनेन कत्वे, षत्वे णत्वे च कृते, स्त्रीत्वविवक्षायां टापि, टाबन्तात् सप्तम्येकवचने रूपम् ।

२. श्लेषयति सङ्गमयति इति श्लक्ष्णा इत्यर्थविवक्षायामपि णिजन्तात् श्लिष्यतेः क्स्नप्रत्यये 'णेरनिटि' इति णिलोपं कृत्वा उपर्युक्तप्रक्रियैवास्थेया ।

अव श्लक्ष्णमिव भ्रंशदन्तर्लोममति ह्रदे ।
न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥६॥

हे ब्रह्मशक्ते ! त्वम् 'अन्तर्लोममति ह्रदे' अन्तर् अभ्यन्तरे लोमानि लोमोपमशैवाल-जालादिमलानि सन्ति अस्मिन् अतिशयेनेति अन्तर्लोममान्, तथाभूते ह्रदे जलाशये, लक्षणया मलविक्षेपावरणादिविविधान्तर्विकारकलुषिते ह्रदवद् गभीरे हृदये अपि, इवेत्युत्प्रेक्षायाम्, मन्ये, 'श्लक्ष्णम् अवभ्रंशत्' मृदुलमनोहरमधुभाव समवायं पातितवती, निक्षिप्तवती तस्य गहनतले, गभीरगर्ते वा इति अवोपसर्गस्य विशेषस्वारस्यम् ।

इदमाकूतम्—हे ब्रह्मशक्ते ! रागद्वेषादिदूषिते बहुविधान्तर्मलाविलितेऽपि हृदये यत् त्वं मृदुमधुरभावा प्रीतिभक्तिप्रभृतीन् गभीरतले बीजवद् गुप्तसुप्तानिव स्थापयसि तत् खलु प्राप्तकालं प्रस्फुटितास्ते मलविक्षेपावरणान्यपवार्य कामक्रोधादिविकारान् विधूय च ब्रह्मसाक्षात्काराय हृदयं प्रस्तुवन्त्विति । तदेवं त्वदुप्ते प्रीतिभक्तिबीजे यथाकालमङ्कुरिते, तेन च हृदये निर्विकारतां नीते, वृत्तिविक्षेपविरहिते स्फटिकशुभ्रे निरावरणे च सति, अपास्तशैवालजाले स्वच्छाच्छसरोवरे सूर्य इव सूर्यकोटिसमप्रभः परमेश्वरः प्रतिभासते प्रस्फुटम् । परमानुकम्पा किल तवैषाऽज्ञानग्रस्तेऽपि जीवे भक्तिप्रभृतिमधुरभावनिगूहनरूपा इति सारमर्म ।

भ्रंशत्—'भ्रंशु अवस्रंसने' (भ्वा० आ० से०) इत्यतो लेटि प्रथमपुरुषैकवचने व्यत्ययेन परस्मैपदे तिपि, अडागमे इकारलोपे च रूपम् ।

अन्तर्लोममति—'लोमन्'शब्दस्यावर्णोपधत्वात् 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः' (पा० ८.२.९) इत्यनेन प्राप्तस्य मतोर्वकारस्य यवादेराकृतिगणत्वादभावो बोध्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्तम् १३४

१-६ अथर्वा ऋषिः । प्रजापतिर्देवता । १,३,५-६ निचृत्साम्नी पङ्क्तिः, २ साम्नी पङ्क्तिः, ४ विराट्साम्नी पङ्क्तिः ।

इहेत्थ प्रागपागुदगधराग्—अरालागुदभर्त्सथ ॥१॥

'इह' अत्र, अस्मिन् जीवनपथे, कुन्तापसूक्तसङ्केतितदिव्यजीवनसोपान-परम्परात्मके सकलेन्द्रियप्रभुत्वप्राप्तिपूर्वकं परमपुरुषार्थसम्पादके योगमार्गे 'एत्थ' एत, आगच्छत ! के आमन्त्रिता आगमनाय ? 'प्राग् अपाग् उदग् अधराग् अरालाक्' प्राची, अपाची, उदीची, अधराची इतिनामिकासु पूर्वपश्चिमोत्तर-दक्षिणदिशासु निवसन्तः सर्वेऽपि मानवाः ! आयात यूयम् इति भगवतस्तदीय-वेदवाण्याश्च आमन्त्रणं सर्वान् प्रति ।

अपि च, अरान् आलाति समन्ततः आदत्ते इति अरालं चक्रं तद्वत् अञ्चन्ति गच्छन्ति सर्वतोऽपि इति अरालाञ्चः, विभक्तेर्लुकि अरालाक्, अत्र, तत्र, सर्वत्र, सर्वाशासु गतिं कुर्वन्तो नराः ! एत, एत यूयं सर्वेऽपि अस्मिन् वर्त्मनि । सेवध्व-मेतद् 'उद् अभर्त्सथ' उन्नता उत्कृष्टा उदात्ता भूत्वा, उद् जीवनस्य उच्चस्तरे आसीनाश्च भर्त्सयध्वम् अभिभवत, तिरस्कुरुत पराभवत च कामक्रोधादिरिपून् क्षुद्रान् 'स्व'भावान् सकलान् कुत्सितभावांश्च—'यवा नो यतिस्वभिः कुभिः' (अथर्व० २०.१३०.७ कुन्तापसूक्तम्) इति तात्पर्यम् ।

इहेत्थ—इह एत्थ इति पदपाठोऽभ्युपेतोऽस्माभिः । संहितापाठे वृद्ध्यभाव-श्छान्दसः ।

एत्थ—आङ्पूर्वादितेर्लोण्मध्यमपुरुषबहुवचने छान्दसं रूपम् । 'थ'प्रत्ययस्य तादेशाऽभावः, ततः पूर्वं तकारागमश्च छान्दसौ ।

प्राग् अपाग् उदग् अधराग्—प्राची, अपाची, उदीची, अधराची इत्येभ्यो दिक्शब्देभ्यः सप्तम्यन्तेभ्यः स्वार्थे अस्तातिप्रत्ययः (पा० ५.३.२७), तस्य 'अञ्चेर्लुक्' (पा० ५.३.३०) इति लुक् । ततः 'लुक्तद्धितलुकि' (पा० १.२.४९) इति सूत्रेण ङीपो लुकि इमानि रूपाणि भवन्ति ।

अरालाक्—अरान् आलाति आदत्ते इति अरालम् । अरशब्दे उपपदे आङ्-पूर्वाद् 'ला आदाने दाने च' (अ० प० अ०) इत्यतः कप्रत्यये अरालशब्दा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निष्पद्यते । ततः अरालवद् अञ्चतीति अर्थे अरालशब्दे उपपदे अञ्चतेः क्विन् (पा० ३.२ ५९) । क्विन्नन्तात् अरालाच् इति प्रातिपदिकात् प्रथमाबहुवचने छान्दसे विभक्तिलुकि रूपम् ।

उदभर्त्सथ—उदुपसृष्टात् 'भर्त्सं तर्जने' (चु० आ० से०) इत्यस्माल्लोडर्थे लङ् छान्दसः । परस्मैपदं, थप्रत्ययस्य तादेशाभावश्च छान्दसे ।

इहेत्थ प्रागपागुदगधराग्—वत्साः पुरुषन्त आसते ॥२॥

'इहेत्थ प्रागपागुदगधराग्' इति प्रथममन्त्रांशोऽस्य सूक्तस्य शेषमन्त्राणामादौ आवर्त्यमानः सम्पूर्णमेव प्रथममन्त्रं गुञ्जयति पुनः पुनः तद्गताह्वानमुपोद्बलयितुम् । तेन सह च एकोऽन्यो लघुचरणो योजित एष्ववशिष्टमन्त्रेषु प्रथममन्त्रभावमुपबृंहयितुम् । अतः प्रथममन्त्रस्य सम्पूर्णभावं मनसि निधाय नूतनांशोऽनुशीलनीयो निवेशनीयश्च हृदयपटले ।

दिग्दिगन्तवासिषु पञ्चजनेषु ये केऽपि रिपुषड्वर्गं विजित्यात्मसाम्राज्यं विन्दन्ते तेषां 'वत्साः' शिशवस्तनया अपि 'पुरुषन्तः' पुरुषवद् आचरन्तः, पुरुषीभवन्तो वा, पूर्वपुरुषैः प्रदर्शितमिन्द्रियविजयात्मकं बृहत्तमप्रतिमपौरुषं प्रकाशयन्त इति यावत् 'आसते' तिष्ठन्त्यविरतम् इति भावः । तथा हि,

परायतीनामन्वेति पाथ आयतीनां प्रथमा शश्वतीनाम् ।
व्युच्छन्ती जीवमुदीरयन्त्युषा मृतं कं चन बोधयन्ती ॥
(ऋ० १.११३.८)

पितुर्न पुत्राः क्रतुं जुषन्त श्रोषन्ये अस्य शासं तुरासः ।
वि राय और्णोद् दुरः पुरुक्षुः पिपेश नाकं स्तृभिर्दमूनाः ॥
(ऋ० १.६८.५)

अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमम् ।
अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे ॥

इत्यादिमन्त्रेषु अग्निदेवो दाशुषे हविर्दात्रे पितुरनुरूपपौरुषशालिनं, श्रुतिज्ञानसम्पन्नम्, अन्तर्वाणीश्रवणशक्तिसमन्वितं, सत्तमं सूनुं सम्प्रदत्ते इति प्रोक्तम् । ईदृशमन्त्राधारेण महर्षि-श्रीअरविन्दपादाः प्राहुः—"वैदिककवयोऽस्माकमाध्यात्मिकारोहणस्य गीतं गायन्ति । तदारोहणं च प्राचीनपुरुषैः, मानवपितृभिः, सम्पादितचरम् । एषां महनीयपूर्वजानामात्मा चाद्यापि स्वसन्ततेः साहाय्यं संविधत्ते, यतो नूतनोषसः पुरातनोषसां पुनरावृत्तिं प्रकुर्वन्ति, भाव्युषोभिः सह सङ्गमनार्थं च पुरो नमन्ति ताः प्रति स्वप्रभारूपेण—कण्व-कुत्सात्रि-कक्षीवत्-गोतम-शुनःशेपादयः ऋषयः केषाञ्चिदाध्यात्मिकविजयविशेषाणां निदर्शनभूताः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेषाममी विजया मानवजातेरनुभूतौ सततपुनरावृत्तिप्रवणाः।" (Hymns to the Mystic Fire, Foreword, p. xxxv)

एतदेव च समाम्नातमुपनिषत्स्वपि—'नास्याब्रह्मवित्कुले भवति' (मुण्डकोप० ३.२.९, माण्डू० १०)। इन्द्रियविजयश्च महासाम्राज्यविजय इत्युक्तं योगशिखोपनिषदि—

इन्द्रियाणि मनो बुद्धिः कामक्रोधादिकं जितम्।
तेनैव विजितं सर्वं नासौ केनापि बाध्यते॥ (१.३९)

अयं विजयो हि वरिष्ठा वीरता परमोच्चपौरुषं वेति उदीरितं महात्मबुद्धचरितरचयित्रा कविकुलचूडामणिनाऽश्वघोषेण—

तथा हि वीराः पुरुषा न ते मता
जयन्ति ये साश्वरथद्विपान् नरान्।
यथा मता वीरतरा मनीषिणो
जयन्ति लोलानि षडिन्द्रियाणि ये॥

इत्यलमतिविस्तरेण।

पुरुषन्तः—पुरुष इवाचरति इति पुरुषति। आचारक्विबन्तात् 'पुरुष' इति नामधातोः शतरि प्रथमाबहुवचने रूपम्। यद्वा, अपुरुषाः पुरुषा भवन्ति इति पुरुषन्ति इत्यर्थे अभूततद्भावे छान्दसे क्विपि पूर्ववद् रूपं निष्पाद्यम्।

इहेत्थ प्रागपागुदगधराग्—स्थालीपाको वि लीयते॥३॥
इहेत्थ प्रागपागुदगधराग्—स वै पृथु लीयते॥४॥

एत एत अन्तर्वैरिवर्गविजिगीषवः, सत्पौरुषशालिसन्ततिस्पृहयालवो मानवसत्तमाः! समादृतेषु युष्माभिरेषु कुन्तापसूक्तसन्दृब्धाऽऽध्यात्मिकविचारेषु समाचरितेषु च बहिरन्तर्जीवने 'स्थालीपाकः' स्थाल्यां पचनपात्रविशेषे पिठरे हव्यार्थं यवस्य तण्डुलस्य वा दुग्धे पाकः पचनं नाम गृहस्थधर्मभूतः कर्मकाण्डीयक्रियाविशेषः[1], तदुपलक्षितोऽखिलोऽपि कर्मकाण्डः 'वि लीयते' विलीनः पूर्णतया विलुप्तो वा भवति अनपेक्षितत्वादिति शेषः, समुदिते आत्मज्ञाने कर्मश्रद्धायाः परित्यागस्य स्वाभाविकत्वात्, कर्मश्रद्धा तु राजसी इति प्राज्ञवचनाच्च। तथा हि तैत्तिरीयोपनिषद्भाष्ये १.११.१ श्रुतेर्व्याख्याने श्रीमद्भगवत्पादशङ्कराचार्यैः 'प्राग् ब्रह्मात्मप्रतिबोधान्नियमेनानुष्ठेयानि श्रौतस्मार्तकर्माणि' इति आत्म-

१. स्थालीपाकक्रियया सिद्धं हविष्यमपि स्थालीपाक इति प्रोच्यते। विस्तरार्थं शतपथब्राह्मण गृह्यसूत्राणि च द्रष्टव्यानि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परमात्मज्ञानात् परं याज्ञिकक्रियाकाण्डस्यापरिहार्यत्वानभ्युपगमात्

'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा।'
'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते।'
(गीता० ४.३७,३३)

इत्यादिवचनैः स्वयं भगवतापि ज्ञाने सर्वकर्मणां पर्यवसानप्रतिपादनाच्च आत्मज्ञानिनः सर्वभूतहितप्रेरितकर्मातिरिक्तकार्याणामितिकर्तव्यतासमाप्तेः। तथा चोक्तम्—

ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः।
नैवास्ति किञ्चित्कर्तव्यमस्ति चेन्न स तत्त्ववित्॥
(जाबालदर्शनोप० १.२३)

अस्य मन्त्रस्य गूढार्थोऽन्यथापि विवरीतुं शक्यः—

इदमखिलं प्राकृतिकं जगत् जीवश्च 'स्थालीपाकः' अनलोपरिनिहितस्थाल्यामन्नवत् कालाग्निना परिपच्येते स्वयमेव च 'वि लीयते' नानाप्रकारैर्विलीयेते। यथा अश्वत्थस्य पत्त्राणि वृक्षे स्वयमेव परिपाकं पीतिमानं च प्राप्य पतन्ति विशीर्यन्ते च, तथैव जीवाः ब्रह्मस्वरूपेऽश्वत्थे परिपाकमेत्य स्वयमेव मुक्ता भवन्ति तस्मिन्नेव च लीयन्ते। एवमेव अयं संसारोऽपि प्रलयकाले स्वत एव कारणे विलीयते इति चतुर्वेदभाष्यकारा जयदेवविद्यालङ्काराः। प्रथमचरणो व्याख्यातचरः।

'सः' स्थालीपाकोपलक्षितोऽनलपप्रपञ्चः कर्मकाण्डीयक्रियाकलापः 'वै' नूनमेव 'पृथु लीयते' पृथु यथा स्यात् तथा, स्वपृथुलांशतो, भूयिष्ठभागतः, भूयस्त्वेनेत्यर्थः, विलुप्यते—निष्कामध्यानोपासनादिकर्मणा तदाऽपि शिष्यमाणत्वात् बन्धाजनकत्वाच्च, काम्यकर्मणां न्यासस्यैव संन्यासत्वात् (गीता १८.२), कामात्मनां पुंसां नश्वरस्वर्गसुखप्राप्तिनिमित्तक-क्रियाविशेषबहुलकर्मणामेव ध्यानसमाधिबाधकत्वाच्च (गीता २.४३-४४)। प्रथमपादः पूर्ववत्।

इहेत्थ प्रागपागुदगधराग्—श्राष्टे लाहणि लीशाथी ॥५॥

हे 'लाहणि' लातानाम् आत्तानां परमेश्वरात् प्राप्तानाम् इन्द्रियमनोबुद्ध्यादिशक्तीनां हननकारिन्, विनाशकारिन्! 'ते' तव 'लीशाथी' परमात्मनि लयप्राप्तेर्जगत्प्रपञ्चं प्रति प्रसुप्तवद् अवस्थितेश्च शक्तिः सामर्थ्यं वा 'आः' आसीत् अस्ति च भगवतः सम्प्राप्तम्। न प्रयुक्तं न वा सम्यगुपयुक्तं तत् त्वयेति काकूक्तिः। शिष्टं पूर्ववत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयमाशयः—भगवता देहेन्द्रियमनोबुद्ध्यादिकरणानि प्रदत्तानि देहधारिणे जीवात्मने येनासौ तेषां सदुपयोगं विधाय, धर्मार्थकाममोक्षस्वरूपं चतुर्विधपुरुषार्थं स्वयं सम्पाद्य अन्येभ्यः प्रदर्शयेत् तत्प्राप्तिसत्पथं, नयेच्च तान् तस्मिन् अग्रणीरिव ।

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ।।

(गीता० २.६९)

इति भगवद्वचनानुसारेण शान्तो दान्तः, प्रयतः संयतश्चात्मदर्शी मुनिरसौ संसारप्रपञ्चं प्रति प्रसुप्तवद् व्यवहरेत्, जीवन्मुक्त इव च जगद्व्यापारान् प्रकुर्वाणोऽपि भगवल्लीन इवावतिष्ठेत । अस्त्येषा महाशक्तिर्गर्भिता मानवात्मनि, सम्प्रयोज्या सा न तु व्यर्थतां नेया विनाश्या वा, एवञ्च दुर्लभं मानवजन्म साफल्यमुपनेयम् इति ।

आष्टे—आः (आस्)+ते । अस्तेर्लङ्प्रथमपुरुषैकवचने 'बहुलं छन्दसि' (पा० ७.३.९७) इति बाहुलकाद् ईडागमाभावे संयोगान्तलोपः । 'आस्' इति पदस्य 'ते' इत्यनेन सह सन्धौ व्यत्ययेन सस्य षत्वे ष्टुत्वम् ।

लाहणि—'ला आदाने दाने च' (अ० प० अ०) इत्यतो भावे क्विप् । ततो लां हन्तीत्यर्थे हन्तेर्बाहुलकादौणादिकः इः नस्य णत्वञ्च । 'लाहणि' इति प्रातिपदिकात् 'सुपां सुलुक्०' इत्यादिना सम्बुद्धेर्लुक् ।

लीशाथी—'लीङ् श्लेषणे' (दि० आ० अ०) इत्यतो भावे क्विपि 'ली' इति प्रातिपदिकम् । 'शीङ् स्वप्ने' (अ० आ० से०) इत्यस्मादौणादिकः थक् बाहुलकात्, धातोराकारोऽन्तादेशः । स्त्रियां ङीप् ।

इहेत्थ प्रागपागुदगधराग्—अक्षिलली पुच्छिलीयते ।।६।।

एत एत, हे मानुषाः, सकलदिग्भ्यः, देहेन्द्रियादिकरणानि संयम्य तेषां सदुपयोगं विधातुं साफल्यं च साधयितुम्, यतो हि 'अक्षिलली' अक्षेषु इन्द्रियेषु लेलयीति पुनः पुनर्भृशं लीनो दृढ़सक्तो भवति, तान्यतिशयेन आश्लिष्यतीति अक्षिलली नरः, इन्द्रियाण्येव निजयथार्थस्वरूपं मत्वा तदाराधननिरतः, शिश्नोदरपरायणः, देहबुद्धिः, देहेन्द्रियाकारवृत्तिः पुरुषः 'पुच्छिलीयते' पुच्छवान् पशुरिव भवति, तद्वद् व्यवहर्तुमारभते इति यावत् ।

अपि वा, 'अक्षिलली' अक्षं सर्वव्यापि ब्रह्म पुनः पुनर्भृशं लाति आदत्ते इति अक्षिलली ब्रह्मविद्या 'पुच्छिलीयते' प्रसीदति स्वोपासकस्य, श्रवणमननादिसाधनैरभ्यस्यमानेति भावः, प्रसादयति च तमभीप्सितब्रह्मसाक्षात्कारेणेति केचित् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अक्ष्लली—अश्नुते व्याप्नोति विषयान् स्ववृत्त्या संयोगेन वेति अक्षमिन्द्रियम्। 'अशू व्याप्तौ सङ्घाते च' (स्वा० आ० वे०) इत्यत औणादिकः सप्रत्ययः (उ० ३.६५)। अक्षेषु इन्द्रियेषु लेलयीति लेलेति वेत्यर्थे 'लीङ् श्लेषणे' (दि० आ० अ०) इत्यस्माद् यङ्लुगन्ताद् अक्षोपपदात् क्विप्। क्विबन्तात् प्रथमैकवचने सुब्लुक्। 'अक्ष'शब्दस्याकारलोपश्छान्दसः।

यद्वा, अक्षति अक्ष्णोति वेति अक्षम्। 'अक्षू व्याप्तौ' (भ्वा०, स्वा० प० वे०) इत्यतः कर्तरि क्विप् पचाद्यच् वा। क्विपि तु संयोगादिलोपाभावश्छान्दसः। अक्षं व्यापकं ब्रह्मतत्त्वं लाति आदत्ते इति अक्ष्लली। अक्षशब्दे उपपदे 'ला आदाने' इत्यत औणादिक इलच् बाहुलकात्। तदन्ताद् ङीप्।

पुच्छिलीयते—पुच्छमस्यास्तीति पुच्छिलः। पुच्छशब्दात् छन्दसि मत्वर्थीय इलच् बाहुलकात्। तदन्ताद् भवत्यर्थे बाहुलकाद् 'भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः' (पा० ३.१.१२) इति क्यङ्। क्यङन्तात् प्रथमपुरुषैकवचने लकारस्थाकारस्य ईकारश्छान्दसः।

अपि वा, शब्दकल्पद्रुमे पठितात् प्रसादार्थकात् पुच्छधातोः औणादिक इलच्। तदन्तात् स्त्रियां ङीपि पुच्छिलीति साधु। तस्माद् भवत्यर्थे बाहुलकात् क्यङ् पूर्ववत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्तम् १३५

१-१३ अथर्वा ऋषिः । प्रजापतिरिन्द्रश्च देवते । १, ५-६ स्वराडार्ष्यनुष्टुप्, २ भुरिगनुष्टुप्, ३ आर्षी पङ्क्तिः, ४ आर्ष्युष्णिक्, ७ भुरिगार्षी त्रिष्टुप्, ८ भुरिग् गायत्री, ९ विराडार्षी पङ्क्तिः, १०,१२-१३ अनुष्टुप्, ११ निचृदार्ष्यनुष्टुप् ।

अस्मिन् सूक्ते त्रयोदश मन्त्राः । ते च सर्वेऽपि महाभारतस्य क्लिष्टकूटश्लोकवत् कूटमन्त्राः । यथा महाभारतस्य—

काकुदीकं शुकं नाकमक्षिसन्तर्जनं तथा ।
सन्तानं नर्तनं घोरमास्यमोदकमष्टकम् ॥

एतैर्विद्धाः सर्व एव मरणं यान्ति मानवाः ।
उन्मत्ताश्च विचेष्टन्ते नष्टसंज्ञा विचेतसः ॥

(उद्योग० ९४.३८-३९)

इत्यनयोः कूटश्लोकयोर्व्याख्या शुक-काकुदीकादिशब्दानां प्रतीकात्मकार्थबोधेनैव कर्तुं शक्या तथैव वेदस्यैषां कूटमन्त्राणामपि ।

पण्डितप्रकाण्डसर्वज्ञनारायण इमान् शुकादीन् अष्ट शब्दान् मानसिकविकाराणां प्रतीकानि मन्यमानो महाभारतटीकाकारं कविवरं देवबोधं प्रमाणत्वेन उद्धरति—

कामक्रोधौ मोहलोभौ मदमानौ तथैव च ।
मात्सर्याहङ्कृती चैव क्रमादेत उदाहृताः ॥ इति

अथ च वेदो लोकोत्तरकाव्यसुषमाविभूषितं, परमोदात्तं दिव्यकाव्यम्, ईश्वरीयकाव्यं यद्विषये स्वयं भगवता वेदेनैवमाम्नातम्—

देवस्य पश्य काव्यं न ममार न जीर्यति ।

(अथर्व० १०.८.३२)

नैकविधा किल अस्यालौकिककाव्यस्य वर्णनशैली । विश्वस्य काव्यसाहित्ये या अपि शैल्योऽद्यत्वे समुपलभ्यन्ते—कथा-कथानक-गीतनाटक-संवाद-सुभाषित-कूटोक्ति-प्रहेलिका-प्रवल्हिका-प्रश्नोत्तरीप्रभृतयः तासां सर्वासामप्युत्सो वेद एव तस्य निखिलविद्याज्ञानविज्ञाननिधानत्वात् सकलकलाकलापबीजत्वाच्च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकृतसूक्ते प्रहेलिकानां गूढार्थसङ्केतकाः केचन शब्दा अपि उपन्यस्ता मन्त्रवर्णेषु अत्र तत्र । तदाधारेण इह मन्त्रार्थाय प्रयासो विधीयते ।

भुगित्यभिगतः शलित्यपक्रान्तः फलित्यभिष्ठितः ।
दुन्दुभिमाहननाभ्यां जरितरोथामो दैव ॥१॥

अयं जीवात्मा 'भुक्' भुङ्क्ते इति भुक्, भोक्ता वर्तते 'इति' इत्यनेन रूपेणैव असौ 'अभिगतः' इमं देहमभिलक्ष्य अत्र प्राप्त आगतो वा । असौ 'शल्' शलति शरीरात् शरीरान्तरं गच्छति इति तथाविधः, देहदेहान्तरगामी वर्तते 'इति' इत्यतः, अस्माद्धेतोरेव, शरीरे जीर्णशीर्णे सति स्वयमेव 'अपक्रान्तः' अपक्रामति निर्गच्छति तस्माद् देहाद् देहान्तरं धारयितुमित्यर्थः ।

असौ 'फल्' फलति, विशीर्यते, द्विधा विभज्यते इति फल् द्विधाविभजनशीलो वर्तते । 'इति' इत्येवं, द्विधा विभक्तो भूत्वेत्यर्थः 'अभिष्ठितः' इमं देहमभिलक्ष्य स्थितः, ब्रह्मरन्ध्राद् ऊर्ध्वं जीवात्मरूपेण, हृत्केन्द्रे च जीवात्मस्फुलिङ्गभूतप्रत्यगात्मपेरूण द्विधा अवस्थित इति भावः ।

तदेवं मन्त्रस्य पूर्वार्धो व्याख्यातः । अस्मिन् त्रीणि कूटवाक्यानि । 'भुगित्यभिगत इति त्रीणि पदानि सर्वाणि यथा निशान्तम् ।' 'श्वा जरितरोथामो दैव, पर्णशफो जरितरोथामो दैव, गोशफो जरितरोथामो दैवेति प्रतिगरा वीमे देवा आक्रंसतेत्यनुष्टुप् ।' इति आश्वलायनश्रौतसूत्रानुसारतः (आ० श्रौ० सू० ८.३.२२-२३) एषां त्रयाणां होतृपठितशस्त्राणाम् होत्रा उच्चारितानां स्तुतिमन्त्राणां, तदीयकूटवाक्यानां गूढार्थनिर्देशका अध्वर्योस्त्रयः प्रतिगरास्तावत् क्रमेण 'श्वा', 'पर्णशफः(शदः)', 'गोशफः' इति । दृष्टान्ताः खल्विमे यैरध्वर्युर्दार्ष्टान्तिकस्य जीवस्य देहं प्रति अभिगमनम्, इतोऽपक्रमणम् अत्राभिष्ठानञ्च विवृणोति ।

तथा हि, यथा श्वा पिण्डदेन पिण्डे दर्शिते भुक् भुक् इति ध्वनिं कुर्वन्, बुक्कन् भषन् वा धावं धावं झटिति तमुपयाति तथैव भोक्ता जीवो भोगलालसया देहमभिगच्छति ।

मन्त्रस्यास्य पूर्वार्द्धे प्रयुक्ताः 'भुक्, शल्, फल्' इति शब्दा यौगिका ध्वन्यनुकरणात्मकाश्च । यौगिकार्थेन सह ते श्लेषेण ध्वन्यनुकरणद्योत्यं भावं 'झटिति, सहसा, तत्क्षणम्' इत्येवं रूपमपि बोधयन्ति इत्यवधेयं सुधीभिः ।

यथा च पर्णशदः, पर्णच्छदः पक्षी नीडं परित्यज्य, प्रपतत्पर्णस्वनोपमं शल् इति ध्वनिं कुर्वन् चटिति उड्डयते स्वैरं विचरितुं तथैव जीवहंसः सहसा शरीरान्निष्क्रामति आत्माकाशे स्वतन्त्रं विहर्तुम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा च गोशफः, गोखुरः 'फल्' इत्येवं शब्दायमानो मध्यभागे विदीर्णोऽपि भूमौ स्थैर्येण पतति तिष्ठति च तथा एकोऽपि जीवात्मा 'फल् इति' फलनं कार्यनिष्पादनमेव फल्, फलतेर्भावे क्विप्, कार्यसिद्धये इत्यर्थः, द्विधा विभवतः स्वकीयेन भूयसांशेन ब्रह्मरन्ध्रस्योपरि देहाद् बहिः स्थितो व्यष्टिसत्ताया विकासमधितिष्ठति तन्मार्गदर्शकतया, हृच्चक्रे च स्वस्फुलिङ्गभूतप्रत्यगात्मतयाऽवस्थितो जन्मजन्मान्तरलब्धानुभवैरुत्तरोत्तरं विकासं साधयति स्वकीयं ब्रह्मसायुज्यलाभार्थमिति दिक्।

अथवा इमानि त्रीणि वाक्यानि परमात्मपरकतया योजयितुं पार्याणि।

परमेश्वरः 'भुक्' भुनक्ति, पालयति, परिरक्षतीति भुक्, प्राणिमात्रस्य पाता पालयिता च वर्तते 'इति' इत्येवम्, अनेन रूपेणैव सः 'अभिगतः' अभितः सर्वतो गतो व्याप्तः, देशकालवस्तुपरिच्छेदवर्जितः, सजातीयविजातीयस्वगतभेदशून्यश्चासौ एक एवाद्वितीयस्त्रिलोकीपरिपालकत्वेन विश्वमपि विश्वं परिव्याप्य अवस्थित इति तात्पर्यम्।

स परमेश्वरः 'शल्' शीघ्रगामी, अनन्यसाधारणवेगवत्तममरुतोऽपि द्रुतगतिगर्वखर्वयिता (केनोप० ३.१०), अनन्यसाधारणगतिशाली 'इति' इत्यस्माद् हेतोः 'अपक्रान्तः' सर्वानपि अतिक्रम्य, सर्वेभ्यः पूर्वं गन्तव्यप्रदेशं प्राप्तो भवति सदा, देशपरिच्छेदशून्यत्वात्, सर्वव्यापकत्वात्, अत्र तत्र सर्वत्र पूर्वमेवोपस्थितत्वात् स सर्वान् धावतोऽपि सर्वदाऽतिशेत इव गत्या इत्याकूतम्। तथा च कीर्तितं शुक्लयजुर्वेदे—'तद्धावतोऽन्यानत्येति तिष्ठत्' इति (४०.४)।

असौ 'फल्' फालयति, निष्पादयति, संसाधयति स्वीयसृष्टिलीलाप्रयोजनमिति फल्, स्वस्य अपरेषाञ्च सर्वेषां सर्वार्थसाधकोऽस्ति 'इति' इति हेतोरेव सः 'अभिष्ठितः' सर्वानभिमुखीभूय प्रत्यगात्मतयाऽवस्थितोऽस्ति सर्वान्तर्वासी, 'प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः'(यजु० ३२.४, श्वेताश्व० २.१६), 'प्रत्यङ्मुखस्तिष्ठति विश्वतोमुखः (महाना० २.१), 'प्रत्यगेकरसं पूर्णमनन्तं सर्वतोमुखम्' (अध्यात्मो० ६१), 'प्रत्यगभिन्नं ब्रह्म' (पैङ्गलोप० २.१०), 'प्रत्यगात्मानमज्ञानमायाशक्तेश्च साक्षिणम्' (कठरुद्रोप० १५), 'प्रत्यगात्मा परं ज्योतिर्मार्या सा तु महत्तमः' (पाशुपतब्रह्मोप० २१), 'प्रत्यगानन्दरूपात्मा मूर्ध्नि स्थाने परे पदे' (त्रिशिखिब्राह्मणोप० २.६), 'प्रत्यगानन्दं ब्रह्मपुरुषं प्रणवस्वरूपम्' (नारायणोप० ४) इत्यादिश्रुतिप्रामाण्यात्।

यद्वा, स परमेश्वरः 'फल्' फलति, विशीर्यते, द्विधा विभज्यते इति फल्, द्विधा विभजनशीलो वर्तते, 'इति' इत्यतः स एकाकारोऽपि प्रजापतिरात्मानं स्त्रीपुरुषात्मना द्वेधा विभज्य द्विमूर्तिर्भूत्वा 'अभिष्ठितः' अवस्थितोऽत्र अस्म-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दभिमुखम्। तथा चोक्तं बृहदारण्यकोपनिषदि—'स हैतावानास यथा स्त्रीपुमाँसौ सम्परिष्वक्तौ स इममेवात्मानं द्वेधाऽपातयत् ततः पतिश्च पत्नी चाभवताम्।'

'दैव' देवो देवताऽस्येति दैवस्तत्सम्बुद्धौ, हे परमदेवोपासक! 'जरितः' हे स्तोतः, भगवद्गुणगायक! 'आहननाभ्याम्' आहननदण्डाभ्यां वाद्यवादनसाधनाभ्यां 'दुन्दुभिं' ढक्काविशेषम् 'आ उथामः' समन्तात् उत्थापयामः, उत्तोलयामो वादनार्थम्, वादयामश्च तमुच्चैः जीवात्मपरमात्मनोरिदं पूर्ववर्णितं स्वरूपं सडिण्डिमघोषं सङ्कीर्तयितुमित्यर्थः, तारस्वरेण समुद्घोष्यमिदं संशीतिलेशेनाप्यसंस्पृष्टं शब्दब्रह्मणा वेदभगवतोपदिष्टम् आत्मपरमात्मस्वरूपमिति तात्पर्यम्।

भुक्—भुङ्क्ते भुनक्ति वा इति भुक्, 'भुज पालनाभ्यवहारयोः' (रु० उ० अ०) इत्यतः कर्तरि क्विप्। तदन्तात् प्रथमैकवचने रूपम्।

शल्—शलतीति शल्। 'शल गतौ' (भ्वा० प० से०) इत्यतः कर्तरि क्विपि तदन्तात् प्रथमैकवचनम्।

फल्—फलतीति फल्। 'ञिफला विशरणे' (भ्वा० प० से०) इत्यतः कर्तरि क्विपि तदन्तात् प्रथमैकवचनम्।

यद्वा, फालयति निष्पादयतीति फल्। 'फल निष्पत्तौ' (भ्वा० प० से०) इत्यस्माण्ण्यन्तात् कर्तरि क्विपि, 'णेरनिटि' इति णिलोपे, प्रथमैकवचने रूपम्।

जरितः—जरिता इति पदं स्तोतृनामसु पठितं निघण्टौ (३.१६.२), जरते इति च अर्चतिकर्मसु पठितं तत्रैव (३.१४.७)। अर्चतिकर्मणो नैरुक्ताद् 'जृ' धातोः तृचि सम्बोधनैकवचने रूपम्।

यद्वा, 'गॄ शब्दे' (क्र्या० प० से०) इत्यस्माद्, अर्चतिकर्मणो नैरुक्ताद् (३.१४.६) गृणातेर्वा तृचि गकारस्य छान्दसे चुत्वे रूपम्।

उथामः—उदुपसृष्टात् तिष्ठतेरन्तर्भावितण्यर्थात् लडुत्तमपुरुषबहुवचने रूपम्।

कोशबिले रजनि ग्रन्थेर्दानमुपानहि पादम्।
उत्तराञ्जनीमां जन्यामुत्तरां जनीं वर्त्मभ्याम्॥२॥

'भुक्', 'शल्', 'फल्' इति गूढातिगूढसूक्ष्मातिसूक्ष्मसुसंक्षिप्तसूत्रैरात्मपरमात्मनोः स्वरूपं संनिरूप्य अस्मिन् मन्त्रे तयोः साक्षात्कारसाधनमाह भगवान् वेदः—

प्रभुदर्शनाभिलाषिभिः 'कोशबिले' कोशस्य हृत्कोशस्य बिले गुहायां 'रजनि' रजन्यां, रात्रौ 'ग्रन्थेः दानम्' अविद्याग्रन्थेरवखण्डनं, भेदनं छेदनं च कर्तव्यमिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शेषः। ब्रह्मसाक्षात्काराय निशायां, निशीथे ध्यानाभ्यासो विधेय इति योगविदां समयः। ततश्च सततयोगाभ्यासेन छिन्नबन्धने मोहमायाशून्ये च हृदये एव केन्द्रितां कुर्यात् पुमान् स्वाम् अन्नप्राणमनोमयीं समस्तबाह्यसत्तां, सुरक्षेत् तां तत्र कामक्रोधादिकण्टकेभ्यो योगमार्गान्तिरायेभ्यः। कथमिवेत्याकाङ्क्षायां दृष्टान्तमाह—'उपानहि पादम्' यथा चर्मपदत्राणे पादं चरणं सुरक्षति नरः कण्टकादिभ्योऽध्वबाधाभ्य इति लुप्तसाधर्म्यवाचको दृष्टान्तः।

अयमभिसन्धिः—तमोमोह-महामोह-तामिस्रान्धतामिस्ररूपपञ्चपर्वात्मिकाया देहात्मबुद्धिलक्षणाया अविद्यायाः (विष्णुपु० १.५.५) आवरणे अविदारिते ब्रह्मसाक्षात्कारस्याशा आकाशकुसुमकामनासंकाशा एव। अविद्यायाः पञ्चकञ्चुकापवारणार्थञ्च 'या निशा सर्वभूतानां तस्यां जागर्ति संयमी' (गीता २.६९) इति गीतानिर्दिष्टदिशा निशायामपि योगनिष्ठेन भाव्यं ब्रह्मदिदृक्षुणा मुमुक्षुणा।

यदा च दीर्घकालनैरन्तर्यसत्कारासेवितेन दृढप्रतिष्ठेन योगाभ्यासेन विदारितपञ्चपरिच्छेदकावरणे अपास्तसमस्तमोहमाये स्फटिकशुभ्रे पारदर्शके तस्य हृदयेऽर्धरात्रे ब्रह्मप्रतिबिम्बं प्रकाशते तदीयदिव्यचक्षुस्समक्षं तदा तस्य समस्तमपि विश्वं ब्रह्मसाक्षात्कारसुधारससिक्तस्वान्तस्य सुधाद्रवैः सम्पूरितं प्रतिभाति। तथा चोक्तं योगवासिष्ठे—

> पूर्णे मनसि सम्पूर्णं जगत् सर्वं सुधाद्रवैः।
> उपानद्गूढपादस्य यथा चर्मावृतैव भूः॥

योगिवरवसिष्ठस्य योगानुभववर्णनपरस्यास्य श्लोकस्य उत्तरार्धेन प्रकृतमन्त्रस्य 'उपानहि पादम्' इति दृष्टान्तस्याशयः प्रस्फुटीभवति। यथा धृतचर्मपदत्रस्य नरस्य कण्टकादिभ्यस्त्राणार्थं भुवश्चर्मणाऽऽच्छादनं पिष्टपेषणमात्रं तथैव छिन्नमायापाशे हृदये देहेन्द्रियप्राणमनसाम् अविद्यापाशाः सममेव संछिन्ना भवन्ति। ततः परं देहादीनि हृदयकेन्द्रे प्रतिष्ठितानि, पार्थिवबन्धनमुक्तानि प्रेरणापरवशानि च सम्पद्यन्ते इति रहस्यम्।

अथ मन्त्रस्योत्तरार्धम्

'उत्तराम्' उत्कृष्टां 'जनीमां' जनीं जन्म माति मिमीते वा इति तां, जन्मनो जीवनस्य वा निर्माणकर्त्रीं, दुर्लभमानवजन्मसाफल्यसम्पादिकाम् 'उत्तरां जनीम्' उत्कृष्टां जननीं जननीवत् कल्याणकारिणीं, भवभयहारिणीं, परममुन्मङ्गलसाधिनीं 'जन्यां' जनी पत्नी जीवस्वरूपा ताम् परमात्मानं पतिं वृणोतीति तथाभूतां ब्रह्मविद्यां, जीवब्रह्मणोर्दम्पत्योः परस्परमिलनसाधिकाम्, अविद्याऽऽवरणनिवारणेन तयोस्तादात्म्यसाधनामोघसाधनस्वरूपां 'वर्त्मभ्यां' ज्ञानमार्गेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्ममार्गेण वा, प्रवृत्तिमार्गेण निवृत्तिमार्गेण वा, शक्तिमार्गेण भक्तिमार्गेण वा प्रातिस्विकप्रकृत्यनुरूपेण सम्पादयेत् पुमानिति शेषः ।

उत्तरार्धमिदम् आश्वलायनश्रौतसूत्रपाठानुसारेण व्याख्यातम् । 'उत्तमां जनिमां जन्यानुत्तमां जनीन् वर्त्मन् यात्' इति सांहितिकपाठे तु उत्तमाम् उत्कृष्टतमाम्, जनिमां=जनीमाम्, जन्या=जन्याम्, द्वितीयैकवचनस्य लुक्, अनुत्तमाम्, नास्ति उत्तमा यस्यास्तथाभूतामतुलनीयां सर्वश्रेष्ठां चिद्भूमिकाम् अनुत्तमं परमं पदं वा, जनीन्=जनीम्, मकारस्य नकारश्छान्दसः, वर्त्मन्= वर्त्मभ्याम्, विभक्तिलुक् छान्दसः, यात्=यातु, गच्छतु पुमान् । भावार्थे नास्ति भेदः ।

रजनि—'रजनि'शब्दात् परस्य सप्तम्येकवचनस्य लुक् छान्दसः ।

दानम्—'दो अवखण्डने' (दि० प० अ०) इत्यतो भावे ल्युटि रूपम् ।

जनीमाम्—जनीं जननं जन्म वा माति मिमीते वा इति ताम् । जनेरौणादिक इण् (उ० ४.१३१), 'जनिवध्योश्च' (पा० ७.३.३५) इति वृद्ध्यभावः । 'बह्वादिभ्यश्च' (पा० ४.१.४५) इत्यत्र बह्वादिगणे 'कृदिकारादक्तिनः' इति पाठात् पाक्षिको ङीष् । ततो जनीशब्दे उपपदे मातेर्मिमीतेर्वा कः । तदन्तात् स्त्रियां टापि द्वितीयैकवचने रूपम् ।

जन्याम्—जायतेऽस्यामिति जनी वधूः । जनेरधिकरणे औणादिक इण् (उ० ४.१३१) । तदन्तात् स्त्रियां 'कृदिकारादक्तिनः' (पा० ४.१.४५, गणपाठः) इति ङीष् । ततो 'जनीं वहति' इत्यर्थे 'संज्ञायां जन्याः' (पा० ४.४.८२) इत्यनेन यत् । तदन्ताद् द्वितीयैकवचनम् ।

अथ ग्राजिज्ञासेन्यानां षट् प्रवादाः

अलाबूनि पृषातकान्यश्वत्थपलाशं विप्रुट् पिपीलिका वटश्चमसः ।
श्वा पर्णशदो गोशफो जरितरा वदामो दैव ॥३॥

ब्रह्मविद्यया विद्राविताऽविद्यान्धकारो जीवन्मुक्तो नरः कथमासीत व्यवहरेद्वा बाह्यजगतीति कतिपयरूपकैर्निरूपितमस्मिन् मन्त्रे सूत्रशैल्या—

'अलाबूनि' जले तुम्बीफलानीव न निमज्जेत् संसारार्णवे, न जातु आसजेत् भोग्यविषयजाते, पुष्करपलाशवत् अस्पृष्टस्तिष्ठेत् संसाराम्भसा, नौकेव सन्तरेत् संसारसागरे अनिमग्नोऽपारविषयपारावारे । 'पृषातकानि' पृषन्ति दधिमिश्रघृतबिन्दवो वा ये अन्यत्र 'पृषदाज्यम्' इति पदेन प्रकीर्तिता मन्त्रवर्णैः (ऋ० १०.९०.८, यजु० ३१.६) । दधि घृतञ्चात्र प्रतीकात्मके न तु बाह्ये स्थूलद्रव्ये । ऋचां रहस्यार्थे गावस्तावच्चिद्रश्मयः, 'ऋतम्भरा'-प्रज्ञायास्तत्तद्भूमिकासु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिफलिताश्चित्प्रभाविशेषा एवेति निश्चप्रचम्, प्रागवोचाम चैतत् प्रमाणपुरस्सरम्। चिद्रश्मिगोर्विकारभूते दधिघृते अपि चिद्भूमिकाविशेषयोश्चिज्ज्योतिर्विशेषवाचके। तत्र घृतन्तावच्छुद्धा, निर्मला विचारवैशद्यलक्षणा मनश्चेतना या श्रीअरविन्दपादैः Clear Mental Consciousness or Purified Mental Intelligence इति पारिभाषिकपदैरुपवर्णिता, दधि च धारणात्मिका सूक्ष्मा प्रज्ञा या श्रीअरविन्दस्य Illumined Mind ज्योतिर्मयमनश्चेतनाकोटिमाटीकते।

ब्रह्मविद्याविद्योतितान्तःकरणः साधकप्रवरः पृषातकानि चेतनायास्तत्तद्भूमिकासु अनुभूयमानाश्चित्प्रभाः सेवेत सततम्, विहरेद् उच्चचिद्व्योम्नि, नावतरेत् सङ्कल्पविकल्पात्मकस्थूलमनश्चेतनाम् इति भावः।

यद्वा, पृषातकानि नाम पयोदधिमिश्राः सोमाः (सोमासो दध्याशिरः, ऋ० १.५.५), प्रज्ञाप्रकाशसूक्ष्मबुद्धिमिश्रिताः सोमसंज्ञकसम्मदरसबिन्दवः, तान् देवताभ्यः समर्पयन्, सोमरसग्रहणेन तदन्तःप्रादुर्भूतैर्देवैः सह च तान् स्वयमास्वादयन्नासीत साधकसत्तम इति रहस्यम्।

एवं देवेभ्योऽन्तर्हव्यं समर्पयन् साधकः कालेन परिपक्वप्रज्ञो ब्रह्मणि लीयते। कथमिवेत्याह—'अश्वत्थपलाशम्' यथा अश्वत्थस्य बोधिसत्त्वस्य बोधिद्रुमस्य वा पिप्पलस्य पलाशं पर्णं पूर्णपरिपाकमेत्य स्वोद्गमभुवः संस्पर्शमाप्तुं स्वयमेव पतति तनुवृन्तत्वात्, तथैव सिद्धयोगी अपि वृन्तोपमस्य संसारबन्धनस्य प्रतनुतमत्वाद् अनायासं स्वमूलोत्से ब्रह्मणि लयं, तेन सह सायुज्यं तादात्म्यं वाऽऽसादयति जीवनकाल एव।

ननु अविद्याया अनादित्वे नित्यत्वाद् ईदृशसिद्धस्याविद्या कथं विलीयते इत्यत्राह—'विप्रुट्', यथा कमलदलादौ स्थितो जलबिन्दुः कराङ्गुलिस्पर्शमात्रेण बिन्दुत्वं विजहद् विलीयते तथैव ब्रह्मज्ञानस्पर्शमात्रे जीवबिन्दुर्ब्रह्मसिन्धौ विलीनः पृथगहमात्मकसत्तां विजहाति, ब्रह्माकारो भवति।

ब्रह्मणाद्वैतं प्राप्यापि स परार्थपरोऽवतिष्ठते इत्यत्र दृष्टान्तद्वयमाह—'पिपीलिका वटः', यथा पिपीलिकावृक्षो वटवृक्षश्च असङ्ख्यपक्षिभ्य आश्रयं सम्प्रदत्तः, पथिकानाञ्च छायाप्रदानेनोपकुरुतः, यथा च न्यग्रोधापरपर्यायो न्यग्रोही वटः स्वशाखातन्तुभिर्भुवं संस्पृशन्, नूतनमूलानि जनयन्, नवनवाङ्कुरात्मना विराड्विस्तारं कुर्वाणः प्राणिनां महानाश्रयो भवति, स्वसजातीयाऽश्वत्थोदुम्बरमधूकाख्यक्षीरवृक्षवच्च प्रतरामुपकरोति पुंसाम्, तथैव परमार्थविदपि सर्वभूतहितभावनया प्रेरितः परमोच्चचिद्भूमिकायाः 'दिवः' भुवमवतीर्य सज्ज्ञानप्रसारेण, स्वानुरूपशिष्यपरम्पराविस्तारेण, सर्वमङ्गलसाधकसंस्थासंस्थापनेन श्वः श्रेयसं सन्तनोति सर्वेषाम्। 'अश्वत्थपलाशम्' इत्यनेन पूर्वोक्तदृष्टान्तते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बोधिसत्त्व-बोधिद्रुमाभिधाऽश्वत्थवृक्षवत् तस्य पावनज्ञानप्रदानप्रवणत्वं परम-बोधिसत्त्वमहात्मबुद्धवच्च बोधिलाभात् परमपि जीवमात्रकल्याणकामनया निर्वाणमनादृत्य लोकसङ्ग्रहव्रतित्वं ध्वन्यते ।

तस्यैवंविधस्य लोकसङ्ग्रहिसिद्धस्य शरीरं देवेभ्यस्तस्मै च स्वस्मै 'चमसः' सोमपानसाधनभूतं पात्रं स्यात्, देवेच्छावशवर्तिदेवस्वीकार्यपरिपूतहव्यस्वरूपं च स्यात् । तथा चाम्नातं मन्त्रवर्णैः—

इममग्ने चमसं मा वि जिह्वरः प्रियो देवानामुत सोम्यानाम् ।
एष यश्चमसो देवपानस्तस्मिन् देवा अमृता मादयन्ते ।।
(ऋ० १०.१६.८)

शच्या कर्त चमसं देवपानम् । (ऋ० १.१६१.५)

आगन्नृभूणामिह रत्नधेयमभूत् सोमस्य सुषुतस्य पीतिः ।
सुकृत्यया यत् स्वपस्यया चँ एकं विचक्र चमसं चतुर्धा ।।
(ऋ० ४.३५.२)

चमसं ये देवपानम् । (ऋ० १.१६१.५)

त्यं चिच्चमसमसुरस्य भक्षणमेकं सन्तमकृणुता चतुर्वयम् ।
(ऋ० १.११०.३)

इत्यादिभिः । उत्तरार्धं व्याख्यातचरम् (२०.१३५.१) । अस्मिन् मन्त्रे 'जरितरोथामो दैव' इत्यस्य पादस्य स्थाने 'जरितरावदामो दैव' इति पाठः समादृतः श्रीजयदेवविद्यालङ्कारैः चतुर्वेदभाष्यकारैः । अन्यत्रापि सर्वत्र वैकल्पिकतया अयं समुपात्तः । 'ओथामः' इति पाठे स्वीक्रियमाणेऽपि अस्य पदस्यार्थः 'आ वदामः' इत्येव तेषां सम्मतः । उपयुक्ततरः खलु 'आ वदाम' इति पाठोऽर्थसङ्गतये ।

'दैव जरितः' हे परमदेवाराधक भक्ताग्रणीः ! त्वन्मनोगतजिज्ञासानां समाधानम् 'आ वदामः' अवोचाम वयम् अलाबूनि इत्यादिदृष्टान्तैः ।

'पिपीलिका वटः' इत्यस्य गूढसूत्रस्यापरोऽप्यभिप्रायः सम्बोभवीति । ननु चित्स्वरूपं निष्क्रियमसङ्गम्, प्रकृतिसङ्गम् अकामयमानमपि ब्रह्म जडा प्रकृतिः कथं बलादाश्लिष्यति इति चोदनायामाह भगवान् वेदः—'पिपीलिका वटः', यथा क्षुद्रकीटिका पिपीलिका अनिच्छन्तमपि वटबीजमाश्लिष्यति तस्मिन् सुदृढं संसजति चेति ।

पृषातकानि—पर्षणमेव पृषा । 'पृषु सेचनहिंसा-संक्लेशनेषु' (भ्वा०प०से०) इत्यतः कः । तदन्तात्टापि पृषा इति रूपम् । 'अति बन्धने' (भ्वा० प० से०) इत्यत औणादिकः क्वुन् (उ० २.३८), तस्य कित्त्वान्नुमो नलोपः । वोरकादेशः ।

पृषया सेचनेन अतकानि सम्बद्धानि इति पृषातकानि पृषन्ति बिन्दवो वा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्वा, पृषत् एव पृषत्कम् । स्वार्थे कः । तदेव पृषातकम् । छान्दसो वर्णविकारो वर्णागमश्च । पृषातकशब्दाद् द्वितीयाबहुवचने रूपम् ।

विप्रुट्—विगता प्रुट् दाहोऽस्या इति । 'प्रुषु दाहे' (भ्वा० प० से०) इत्यतो भावे क्विपि तदन्तस्य 'विगत'-शब्देन सह 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' इति वार्तिकेन प्रादिबहुव्रीहिः, गतशब्दस्य वैकल्पिको लोपश्च ।

पिपीलिका—१. अपि नूनमेव पीलति अवरुणद्धि आतपं छायादानेनेति अपिपीलिका छायाबहुलतरुविशेषः । अपिपूर्वात् 'पील प्रतिष्टम्भे' (भ्वा० प० से०) इत्यतो ण्वुल् । वोरकादेशः । स्त्रियां टाप् । अत इत्वम् । उपसर्गस्याकारलोपश्छान्दसः । २. पुनः पुनर्भृशं वा पेलति (पेपेल्यते) गतिमती भवति इति पिपीली पिपीलिका वा क्षुद्रकीटिका । 'पिपीलिका पेलतेर्गतिकर्मणः' इति निरुक्तम् (७.३.१३) । 'पेलृ गतौ' (भ्वा० प० से०) इत्यतो यङ्लुगन्तात् किः । उपधाया ईकारः । स्वार्थे कः, टाप् ।

चमसः—चम्यते भक्ष्यते उपभुज्यतेऽत्र सोमरसः इति चमसः देवानां सोमपानपात्रं शरीराख्यम् । 'चमु भक्षणे' (स्वा० प० से०, छान्दसः) इत्यतोऽधिकरणेऽसुन् औणादिकः (उणा० ४.१६०) ।

वीमे देवा अक्रंसताध्वर्यो क्षिप्रं प्रचर ।
सुसत्यमिद् गवामस्यसि प्रखुदसि ।।४।।

अध्वर्युं प्रति सम्बोधितोऽयं मन्त्रः । अध्वर्युश्चात्र न हि मानुषः पुरोहितः किन्तु दैव्यः, देवानामेव यज्ञस्य प्रधानपुरोहितत्वात्, मानुषपुरोहितानां च तत्तद्देवप्रतिनिधिमात्रत्वात्, तत्तद्देवशक्त्यैव च यज्ञकार्यनिर्वहणक्षमत्वात् । तथा हि—

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ।। (ऋ० १.१.१)

इति ऋग्वेदस्य माधुच्छन्दसे आदिममन्त्रे अग्निदेव एव होता, ऋत्विक् पुरोहितश्चेति कीर्तितम् ।

त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः ।
विश्वा विद्वाँ आर्त्विज्या धीर पुष्यस्यग्ने सख्ये मा रिषामा वयं तव ।।
(ऋ० १.९४.६)

इति मन्त्रे अग्निरेव विश्वानि आर्त्विज्यानि वेत्ति पुष्यति चेति आम्नातम् । अथ द्वितीयमण्डलस्य पञ्चमसूक्ते अयमेव भावो विवृत्य सन्दृब्धः । तत्र अग्निः प्रथम-द्वितीय-चतुर्थ-पञ्चम-सप्तममन्त्रेषु क्रमेण होता, पोता, प्रशास्ता, नेष्टा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋत्विक् चेति कीर्तितः। अथ ऐतरेयिणोऽप्यामनन्ति—'अग्निर्वै देवानां होता' (ऐ० ब्रा० ३.१४), 'यो ह वै त्रीन् पुरोहितान् त्रीन् पुरोधातॄन् वेद स ब्राह्मणः पुरोहितः' (ऐ० ब्रा० ८.२७) इति। देवानां यज्ञेषु होतृनामकऋत्विगग्निरेव, वस्तुतो देवा एव यज्ञस्य पुरोहिताः,[1] यश्च ब्राह्मणेषु देवानां पौरोहित्यं वेद तस्यैव तत्प्रतिनिधितया पौरोहित्येऽधिकार इति। [अत एव याज्ञिकाः अग्नि-वाय्वादित्य-ब्रह्मणस्पतीन् (बृहस्पतीन्) एव क्रमेण होत्रध्वर्यूद्गातृब्रह्माख्यान् पुरोहितान् प्रतिपद्यन्ते। विस्तरार्थम् ऋग्वेदस्य १.६४.६ ऋचः सायणीय-व्याख्यानम्—'मानुषो होताऽमुख्यः। तदपेक्षयास्य मुख्यत्वम्...बृहस्पतिर्देवानां ब्रह्मा...' इत्यादिकं द्रष्टव्यम्।

तदेवं निखिलयज्ञक्रियानिर्वाहको यजनकुशलो यजिष्ठोऽध्वर्युर्वैश्वयज्ञे तावद् देवो मातरिश्वा वायुर्वा, वैश्वप्राणेनैव सर्वक्रियाणां साध्यत्वात्, व्यष्टेः (साधकस्य) अन्तर्यज्ञे तु स प्राणदेव इति विवेकः। तथा च—

आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः।
अन्तः पवित्र उपरि श्रीणानो३ऽयं शुक्रो अयामि ते॥
वेत्यध्वर्युः पथिभी रजिष्ठैः प्रति हव्यानि वीतये।
अधा नियुत्व उभयस्य नः पिब शुचि सोमं गवाशिरम्॥

(ऋ० ८.१०१.९-१०)

इति वायुदेवताकऋग्द्वये मातरिश्वा वायुरध्वर्युत्वेनावाहितः। अथ—

होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शंस्ता सुविप्रः।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वम्॥

(ऋ० १.१६२.५)

इति अश्वदेवताके मन्त्रे च प्राणदेवः, मातरिश्वनो वायोरस्मदन्तःस्थः प्रतिनिधिः प्राणमयपुरुष आवाहितः।

इमं प्राणदेवं प्रति सम्बोधितोऽयं मन्त्रः (अथर्व० २०.१३५.४) सम्प्रति व्याख्यायते—

'अध्वर्यो' अध्वरं जीवनयज्ञं साधनायज्ञं वा कामयतेऽनुष्ठीयमानं निर्वर्त्य-मानञ्चेति अध्वर्युस्तत्सम्बुद्धौ, हे जीवनयज्ञानुष्ठानपरिपूर्तिकामिन् प्राणदेव, प्राणमयपुरुष, प्राणमयात्मन्![2] 'इमे देवा वि अक्रंसत' अग्निवायुसूर्यादिदेवानां

---

१. देवा यज्ञस्य पुरोहिता इति सातत्येन समाम्नातं मन्त्रेषु, अनेकसन्दर्भेषु च प्रत्यक्षमेव काचिद् अमानुषी सत्ता शक्तिर्वा यज्ञमधितिष्ठति। बाह्येलङ्कारे यत् पुरोहितस्य व्यक्तित्व-मस्ति तदेव अन्तःक्रियासु कामपि अमानुषीं सत्तां शक्तिं वा, अस्मद्व्यक्तित्वस्य किमपि तत्त्वं वा सङ्केतयति। —श्रीअरविन्दः (वेदरहस्य, पूर्वार्द्ध, पृ० ८०-८१)

२. स वा एष पुरुषोऽन्नरसमयः।...तस्माद्वा एतस्मादन्नरसमयाद् अन्योऽन्तर आत्मा प्राणमयः। तेनैष पूर्णः। (तै० उ० २.१.२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिनिधिभूता वाग्घ्राणचक्षुरादय इन्द्रियस्वरूपा इमे प्रसिद्धा देवाः (ऐ० उ० २.४) विक्रान्तवन्तः, 'इहेत्थ प्रागपागुदगधराग् अरालागुदभर्त्सथ' इत्यादिपूर्वसूक्त-(२०.१३४) मन्त्रोक्तविधिना षड्रिपुवर्गविजये विक्रमं प्रदर्शितवन्तः, अशेष-विषयविकारान् विजित्य च 'अजैष्माद्यासनामा चाभूमानागसो वयम्' (ऋ० १०.१६४.५) इत्येवं सर्वविधदुरितदुःस्वप्नविजयघोषं कृतवन्तः, अतस्त्वं 'क्षिप्रं प्रचर' द्रुतं प्रयाहि पुरतः, कुरु प्रगतिं प्रखरवेगेन । त्वं 'गवाम्' इन्द्रिय-गवां 'सुसत्यम् इत् असि' अतिशयेन यथार्थं सत्यम् असि नूनम् । तथा च प्रश्नोपनिषदि प्राणप्राधान्यप्रतिपादकाख्यायिकान्ते 'प्राणे सर्वं प्रतिष्ठितम्', 'तुभ्यं प्राण प्रजास्त्विमा बलिं हरन्ति यः प्राणैः प्रतितिष्ठसि' (प्रश्नोप० २.६-७) इत्यादिवचनैः प्राणस्य सर्वाश्रयत्वं, सर्वात्मत्वं, सर्वशरीरेषु प्राणैश्चक्षुरादिभिः सह तदाधारत्वेन अवस्थानात् इन्द्रियाणामपि 'प्राण'पदवाच्यत्वं प्रोच्य, 'ऋषीणां चरितं सत्यमथर्वाङ्गिरसामसि' (प्रश्नोप० २.८) इति वचनेन भगवतो वेदस्य प्रकृतमन्त्रवत् प्राण एव ऋषीणां चक्षुरादीनामिन्द्रियाणां सत्यं चरितं यथार्थं चेष्टितं देहधारणाद्युपकारस्वरूपमस्तीति सुस्पष्टं समुदीरितम् ।

त्वं 'प्रखुदसि' प्रखूर्दने, प्रकूर्दने, तज्जनिते प्रकृष्टे सुखे आनन्दे वेत्यर्थः 'असि' वर्तसे, वशीकृतस्वस्वविषयाणां, प्राप्तप्रभुत्वानां, विजयशालिनामिन्द्रियाणा-मीशत्वाद् इति भावः । विजितेन्द्रियः प्राणमयात्मा, श्रीचैतन्यमहाप्रभु-श्रीराम-कृष्णपरमहंसवत् हर्षोन्मादमयं भावसमाधिं प्राप्य गायति, नृत्यति कूर्दते च आत्मविजयोन्मादे इति सङ्केतितं प्रखुदसि इति पदेन । तथा चोक्तं भागवते—

वाग् गद्गदा द्रवते यस्य चित्तं
रुदत्यभीक्ष्णं हसति क्वचिच्च ।
विलज्ज उद्गायति नृत्यते च
मद्भक्तियुक्तो भुवनं पुनाति ।।

अयमभिसन्धिः—'इन्द्रियाणां मनो नाथो मनोनाथस्तु मारुतः । मारुतस्य लयो नाथः' (वराहोपनिषद् २.८०) इति योगानुभवानुसारेण विजितेन्द्रियस्य पुरुषस्य प्राणः सहजमेव मनोवागगोचरे आत्मनि समाहितः सन्नवर्णनीयमानन्दं लभते । तथा चोक्तम् उपनिषत्कारैः—

इन्द्रियग्राहनिर्मुक्तनिर्धनी निर्मलामृते ।
अमनस्के ह्रदे स्नातः परामृतमुपाश्नुते ।।

(अमनस्कोप० २.८६)

इन्द्रियबिलेऽविवशः प्रणवाख्यं प्रणेतारं भारूपं (यः पश्यति) सोऽपि... विशोको भवति । (मै० उ० ६.२५)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च ।
अहिंसया च भूतानाममृतत्वाय कल्पते ।।
(ना० प० उ० ३.४५)

एतदेव च गीतं भगवद्गीतायामपि—

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ।। (गीता० २.६४)

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ।। (गीता ५.२३)

वाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ।। (गीता ५.२१)

इत्—निपातोऽयमत्रावधारणार्थकः ।

गवाम्—गच्छत्यनेन विषयमिति गौरिन्द्रियम् । गमेर्डोरौणादिकः (उणा० २.६८) । तदन्तात् षष्ठीबहुवचनम् ।

प्रखुदसि—प्रपूर्वात् 'खुर्द क्रीडायाम्' (भ्वा० आ० से०) इत्यत औणादिकोऽसिः । रलोपः । 'प्रखुदस्' इति प्रातिपदिकात् सप्तम्येकवचने रूपम् ।

विशेषविवरणम्

गवाम्—'गौः पशुरिन्द्रियं सुखं किरणो वज्रं चन्द्रमा भूमिर्वाणी जलं वा, इति स्वामिदयानन्दाः (उणादिकोषस्य वैदिकलौकिककोषाभिधव्याख्यायाम्) ।

गौर्नादित्ये बलीवर्दे किरणक्रतुभेदयोः ।
नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु ।। इति केशवः ।

स्वर्गेषु-पशु-वाग्-वज्र-दिङ्-नेत्र-घृणि-भू-जले ।
लक्ष्यदृष्टचा स्त्रियां पुंसि गौः ...।। इत्यमरः (३.२५)

प्रखुदसि—क्रीडावाचकः खूर्दतिरत्र क्रीडार्थो रमिरिव रमणार्थक आनन्दार्थको वा ज्ञेयः, क्रीडनस्य रमणस्य वा आनन्दैकप्रयोजनत्वात् । क्रीडनेन कारणेन लक्षणया कार्यमानन्दो लक्ष्यते ।

पत्नी यद् दृश्यते पत्नी यक्ष्यमाणा जरितरोथामो दैव ।
होता विष्ट्वीमेन जरितरोथामो दैव ।।५।।

'पत्नी' ब्रह्मोद्वाह्या जीवलक्षणा भार्या (द्रष्टव्यम्—२०.१२७. ८-६, २०.१३३.५, २०.१३५.२), 'यत्' यदा 'यक्ष्यमाणा' मनसा हृदयेन च वृतं स्वपतिं यष्टुं सङ्गन्तुं, तेन सह सायुज्यमैक्यं तादात्म्यं वाऽधिगन्तुं कामयमाना 'दृश्यते' अवलोक्यते, तदेति शेषः, सा 'पत्नी' पाति रक्षति स्वयथार्थस्वरूपमिति सा तथाभूता सम्पद्यते इति शेषः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'देव जरितः' हे परमदेवोपासक स्तोतः ! इदं पूर्वोक्तं सत्यं वयम् 'आ उथामः' आ समन्ताद् उद्घोषयामः, अत्र तत्र सर्वत्र प्रसारयामः । 'आ वदामः' इति पाठे तु वयमस्य समन्ततः प्रवदनं प्रवचनं वा कुर्म इत्यर्थो बोध्यः ।

अथ स 'होता' जीवपत्न्याः प्रीणयिता, प्रियकर्त्ता परमेश्वरो वध्वाः सङ्गमनस्पृहां, सायुज्याभीप्सां सन्निभाल्य 'ईम् एन' एनां स्ववधूम्, ईम् इति पदपूरणो निपातः, 'विष्ट्वी' प्रविश्य व्याप्य वा तिष्ठति । इदं सत्यमपि वयं 'देव जरितर् आ उथामः' समन्ताद् उद्घोषयाम इति गतम् ।

इदमाकूतम्—माययाऽविद्यया ब्रह्मणा वियुक्तो जीवस्तद्वियोगव्याकुलो भूयोऽपि ब्रह्मसंयोगमभीप्सुर्भगवदनुग्रहेण हरिभक्तिरससिक्तं भागवतगुरुमुपसन्नस्तत्प्रेरणया हरिं प्रति सम्यङ्मसृणितस्वान्तः, ममत्वातिशयेनाङ्कितस्तस्मिन् पतिबुद्धिं विधाय स्वात्मानं तत्पत्नीं मन्यमानस्तस्मिन् गोपीभक्तिमातिष्ठते । तदेवं सा जीवपत्नी सर्वानपि हृद्भावान् काम-स्नेह-सौहृद-प्रणयादीन् नित्यं तस्मिन् पतिदेवे हरावेव विदधती (धारयन्ती) तेन सह नित्यसङ्गमशाश्वतैक्यलाभार्थं तं पतिदेवतात्वेन पूजयति, तस्मै आत्मदानं च करोति । प्रकृतमन्त्रगतं 'यक्ष्यमाणा' इति पदं 'यज देवपूजा-सङ्गतिकरणदानेषु' इत्यस्माद् धातोर्व्युत्पन्नत्वाद् ब्रह्मणा सह सङ्गतिकरणाय तस्य देववद् यजनं, पूजनं, तस्मै दानम् आत्मसर्वस्वार्पणं च साधनत्वेन निर्दिशति ।

जीवपत्न्या अनेन यजनेन प्रीतस्तत्पतिर्होता परमेश्वरः जीवस्य पत्नीभाव प्रीत्या प्रतिगृह्य तं प्रीणयति । 'हु दानादनयोः' (आदाने चेत्येके, प्रीणनेऽपि) इत्यस्माद् धातोर्व्युत्पन्नः एतन्मन्त्रगतो 'होता' इति शब्दः परमेश्वरेण जीवपत्न्याः प्रीतिभावप्रतिग्रहं तत्प्रतिफलस्वरूपं च तस्याः प्रीणनं निरूपयति । 'विष्ट्वी'-पदसूचितेन जीवे ब्रह्मणः प्रवेशेन परिव्याप्त्या च 'यक्ष्यमाणा' इति पदे भविष्यद्वाचि'स्य'प्रत्ययेन सूचितायाः पत्न्याः नित्यसङ्गमशाश्वतसायुज्यस्पृहायाः परिपूर्तिर्ध्वन्यते,

जाते समरसानन्दे द्वैतमप्यमृतोपमम् ।
मित्रयोरिव दम्पत्योर्जीवात्मपरमात्मनोः ।।

इति गोपिकोपलभ्यस्थितेर्लाभात् ।

विष्ट्वी—'विष्लृ व्याप्तौ' (जु० उ० अ०) इत्यस्मात् 'विश प्रवेशने' (तु० प० अ०) इत्यस्माद् वा परस्य क्त्वाप्रत्ययस्य 'स्नात्व्यादयश्च' (पा० ७.१.४९) इत्यनेन ईकारान्तादेशः ।

एन—एनाम् । वर्णलोपश्छान्दसः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आदित्या ह जरितरङ्गिरोभ्यो दक्षिणामनयन् ।
तां ह जरितः प्रत्यायंस्तामु ह जरितः प्रत्यायन् ।।६।।

'आदित्या ह' परात्परस्य पुरुषस्य अखण्डानन्तचिच्छक्तेर्देवमातुरदितेः पुत्रा देवा हि 'जरितर् अङ्गिरोभ्यः' स्तोतृभ्योऽङ्गारोपमदिव्यचिज्ज्वालोपेततपस्वि-साधकेभ्यः 'दक्षिणाम्' सदसद्विवेचनविचक्षणां सहजस्फुरितविवेकशक्तिमय-चेतनाम् 'अनयन्' प्रापयन्, तेषां तपःसाधनादिना सम्प्रीता इति शेषः । 'तां ह' तां विवेकचेतनां खलु 'जरितः' ते पूर्वोक्ताः जरितारोऽङ्गिरसः प्रदीप्ताऽन्तरग्नयो भक्तसाधकाः 'प्रति आयन्' प्रत्यक्षमुपलब्धवन्तः, प्रतीतवन्तः, तस्याः स्वान्तः-समुदितचेतनायाः साक्षात् प्रतीतिमनुभूतिं वाऽकुर्वन्, 'ताम् उ ह जरितः प्रति आयन्' तां ते जरितारः निश्चितमेव साक्षादन्वभवन् इति द्विरुक्तिरनुभवस्य दाढर्य-स्थैर्य-याथार्थ्यद्योतनार्था ।

अयमाशयः—वेदे अङ्गिरसो देवा मनुष्याश्चेत्युभयथाऽपि निर्दिष्टा :—

वीळु चिद् दृळहा पितरो न उक्थैरद्रिं रुजन्नङ्गिरसो रवेण ।
चक्रुर्दिवो बृहतो गातुमस्मे अहः स्वर्विविदुः केतुमुस्राः ।।
(ऋ० १.७१.२)

अस्माकमत्र पितरो मनुष्या अभि प्रसेदुर्ऋतमाशुषाणाः ।
(ऋ० ४.१.१३)

दृळहं नरो वचसा दैव्येन व्रजं गोमन्तमुशिजो वि वव्रुः ।
(ऋ० ४.१.१५)

इत्यादिष्वनेकमन्त्रेषु अङ्गिरस ऋषयो मनुष्याः पूर्वे पितरश्च कीर्तिताः ।

आध्यात्मिकेऽर्थे दिव्यचेतनाया अङ्गारभास्वरा जाज्वल्यमानशक्तिर्दिव्य-ज्योतिषो देदीप्यमानतेजो वा 'अङ्गिरः'पदेन द्योत्यते । तदेवं पदमिदमग्नेरेव गुणधर्मनिरूपकं नामान्तरम् । अत्र दिव्यचितो ज्योतिर्विशेषेण विशिष्टाः साधक-सत्तमा एव अनेन पदेनाभिप्रेताः ।

दक्षिणा नाम ऋतचितः पञ्चसु शक्तिषु इळा-मही-सरस्वती-सरमा-दक्षिणा-भिधासु पञ्चसु देवीष्वन्यतमा । तत्र याऽन्तर्बोधशक्त्या अस्मदात्मनः समक्षं साध्वसाधु-सत्यासत्य-तमःप्रकाश-ऋजुजिह्मादीनि विविच्य दर्शयितु दक्षतमा सैव दक्षिणा नाम सत्यचिज्ज्योतिस्समुदयद्योतिन्या उषसो विभूतिविशेषः ।

'दक्षिणा' इति पदं 'दक्ष्'धातोर्व्युत्पन्नम् । अस्मादेव निष्पन्नं 'दक्ष'पदं वेदे सर्वत्र बलविशेषार्थे दृश्यते । 'दक्ष'पदप्रयोगस्थलपरीक्षणेन च दिव्यधीदाक्ष्यं, दिव्यधिषणासाध्यं विवेककौशलमेव अस्यार्थः पर्यवसीयते । एवंविधदिव्यधी-वैदग्ध्यवती विवेकचितिरेव दक्षिणा इति दिक् । 'विवेकख्यातिरविप्लवा हानो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पायः,' 'योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः' (पा० यो० द० २.२६.२८) इति सूत्रद्वयसमाम्नाता विवेकख्यातिरस्या दक्षिणाया अन्यतमपरिणतिः।

इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे।
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम्॥
(ऋ० २.२१.६)

इत्यस्याम् ऋचि 'दक्षस्य', 'चित्तिम्' इति पदाभ्यामियं विवेकचित्तिरेव दिव्यवैश्वप्रज्ञाधिपतिं दिवस्पतिं सम्प्रार्थिता प्रार्थ्यद्रविणेषु प्राथम्येन, प्राधान्येन परमवरणीयत्वेन चेत्यलमतिपल्लवितेन।

जरितरङ्गिरोभ्यः—जरितारोश्च तेऽङ्गिरसश्चेति जरितरङ्गिरसस्तेभ्यः। द्वन्द्वः। ऋकारस्य गुणश्छान्दसः।

जरितः—जरितृशब्दात् परस्य प्रथमाबहुवचनस्य छान्दसे लुकि रूपम्।

तां ह जरितर्नः प्रत्यगृभ्णंस्तामु ह जरितर्नः प्रत्यगृभ्णः।
अहा नेत सन्नविचेतनानि जज्ञा नेत सन्नपुरोगवासः॥७॥

'तां ह' तां दक्षिणां ननु 'जरितः' जरितारोऽङ्गिरसः पूर्वमन्त्रोक्ताः 'नः' अस्मभ्यं मानवजीवेभ्यः मनुष्यमात्रहितार्थं 'प्रत्यगृभ्णन्' प्रतिगृह्णन्ति, स्वीकुर्वन्ति। 'ताम् उ ह जरितः नः प्रत्यगृभ्णः' तां ते जरितारो गरितार उपदेष्टारो भक्ता निश्चयेनैव अस्मभ्यं जीवेभ्यः, सर्वभूतहितार्थं प्रतिगृह्णन्ति, स्वीकुर्वन्ति इति द्विरुक्तिर्वीप्सार्थाऽऽदरार्था प्रकृतार्थदार्ढ्यगमनार्था च।

हे मनुष्याः! 'जज्ञाः' अतिशयेन ज्ञानवान्, परमज्ञानी पूर्वोक्तो जरिताऽङ्गिराः 'सन्' अस्ति चेद् वः सुलभः, सूपायनः सुखमुपसद्यो वा तर्हि 'अहा' दिनानि 'अविचेतनानि' विशालविवेकचेतनाशून्यानि 'न इत' न गमयत, न यापयत। 'सन्' विद्यमानश्चेद् एवंविधो ज्ञानी, वः सुप्राप्यस्तर्हि 'अपुरोगवासः' पुरोगामिरहिताः, अग्रणीशून्याः 'न इत' न गच्छत अपरिमितापायान्तरायसंकुले संसारपथे इत्यर्थः।

अयमभिप्रायः—सुसमिद्धाग्नयो बाह्यान्तरतेजसा समुद्भासमानाः, सम्प्राप्तदक्षिणादेवीप्रसादाः, सहजविवेकचिद्भूमिकाधिरूढाः, सदसतोः प्रकृतिपुरुषयोश्च विवेकख्यात्या लोकविख्याता भक्तवराः परमप्रभुणा प्रसादीकृतां स्मार्तविवेकप्रज्ञात्मकचेतनां तथागताऽमिताभमहात्मबुद्धस्य सम्बोधिवत् मानवमङ्गलार्थमेवाङ्गीकुर्वन्ति।

अथ यस्य पुंस एवंविधो भक्तविबुधो भगवदनुग्रहेण सुलभो भवेत् स समित्पाणिस्तमुपगम्य तत्प्रसादसमुपलब्धविवेकख्यात्या स्वीयदिनानि जीवनकालो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पलक्षणाणि विशालविवेकविशिष्टचैतन्यघन्यानि कुर्यात् तमेव च ब्रह्मनिष्ठं श्रोत्रियं पुरोगवं, पथिकृतं सत्पथप्रदर्शकञ्च प्रतिपद्य तद्वत् परमप्राज्ञः 'जज्ञाः' सम्पद्येत इति रहस्यम् ।

पूर्वमन्त्रव्याख्यान्ते उद्धृतमन्त्रस्य 'इन्द्र श्रेष्ठानि द्रविणानि धेहि...' इत्यादिकस्य अन्तिमपदद्वयं 'सुदिनत्वमह्नाम्' इत्येतद् विवेकचिज्ज्योतिषः—दक्षस्य चित्तेः चरमपरिणतिर्जीवनदिवसानां सुभगत्वं, सफलत्वं सुफलत्वञ्चैवेति समुद्घोषयति ।

प्रत्यगृभ्णन्—प्रतिपूर्वकाद् गृह्णातेर्लट्प्रथमपुरुषबहुवचने वक्तव्ये लकारव्यत्ययश्छान्दसः । 'हृग्रहोर्भश्छन्दसि' इति वार्तिकेन हस्य भः ।

प्रत्यगृभ्णः—प्रत्युपसृष्टाद् ग्रहेर्लट्प्रथमपुरुषबहुवचनविवक्षायां कालपुरुषवचनव्यत्ययश्छान्दसः, हस्य भः पूर्ववत् ।

अहा—अहानि । 'अहन्' इति शब्दात् परस्य शसः शेः 'शेश्छन्दसि बहुलम्' (पा० ६.१.७०) इति सूत्रेण लोपः । प्रत्ययलक्षणेन 'सर्वनामस्थाने चासम्बुद्धौ' (पा० ६.४.८) इति उपधादीर्घः । नलोपः ।

जज्ञाः—जानातेर्यङ्लुगन्तात् क्विपि, तदन्तात् प्रथमैकवचने छान्दसं रूपम् ।

अपुरोगवासः—नास्ति पुरोगवः (पुरोगः, पुरोगामी अग्रणीर्वा) येषां ते इति बहुव्रीहिः । 'आज्जसेरसुक्' (पा० ७.१.५०) इत्यनेन जसेरसुगागमश्छान्दसः ।

उत श्वेत आशुपत्वा उतो पद्याभिर्यविष्ठः ।
उतेमाशु मानं पिपर्ति ॥८॥

'उत' अपि च, स पूर्वमन्त्रोक्तो जज्ञाः परमज्ञानी 'श्वेतः' श्वेतवर्णद्योतितशुचिताशुभ्रतासुभूषितः, यद्वा, सूर्यस्य रश्मिस्वरूप-एतशाख्य-भास्वराश्ववत् परमसत्यस्वरूपसूर्यस्य शुभ्रोज्ज्वलसत्यरश्मिभिः सुसम्पन्नः 'आशुपत्वा' आशु शीघ्रं पतति, गच्छति ज्ञातव्यं, गन्तव्यं प्राप्तव्यञ्चार्थमिति आशुपत्वा, ज्ञेये, गम्ये प्राप्ये च आशुगतिशाली, अप्रतिहतगतिरिति यावत् 'उत उ' अपि च निश्चयेनैव 'पद्याभिः' निजगतिभिः, लोककल्याणकारिनैकविधक्रियाव्यापारैः तदुपयोगिपद्धतिभिश्च उपलक्षितः, उपलक्षणे तृतीया, 'यविष्ठः' युवतमः, नित्ययौवननवनवोत्साहसम्पन्नः महाशक्तिशाली च वर्तते । 'उत' अथ 'ईम्' एनम् 'मानं' प्रतिष्ठा यशो वा 'आशु' द्रुतं 'पिपर्ति' पालयति परिपूरयति च ।

भावार्थः—अस्मिन् मन्त्रे पूर्वमन्त्रप्रोक्तप्राज्ञभक्तचूडामणेरेव महिमा पुनरुपवर्णितः, तस्य शरण्यतानिरूपणार्थं तदीयशरणग्रहणसम्प्रेरणार्थञ्च । शुचिशुभ्रः, अप्रमेयप्रज्ञः प्रतिपलं परार्थपरश्चासौ सर्वेषां स्वःश्रेयससम्पादनार्थं प्रभुप्रदत्तप्रत्यग्रबलोपेतः प्रत्यहमभिनवोत्साहसम्भृतश्च समुद्भासते । सोऽयम् आर्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थार्थि-जिज्ञासुभिराश्रीयमाणः दिग्दिगन्तविश्रुतयशाः प्रतितिष्ठति प्रतितिष्ठति।

आशुपत्वा—आशु पततीत्यर्थे पतेर्वनिप्। तदन्तात् प्रथमैकवचनम्।

पद्याभिः—पदनं गमनमेव पादः। 'पद गतौ' (दि० आ० अ०) इत्यतो भावे घञ्। तस्मै हिताः पद्यास्ताभिः। हितार्थे यत्। 'पद्यत्यतदर्थे' (पा० ६.३.५३) इत्यनेन पादस्य पद्भावः। यद्वा पदनमेव पद्। भावे क्विप्। तस्यै हिताः पद्यास्ताभिः।

आदित्या रुद्रा वसवस्त्वेऽनु त इदं राधः प्रतिगृभ्णीह्यङ्गिरः।
इदं राधो विभु प्रभु इदं राधो बृहत् पृथु॥६॥

'अङ्गिरः' हे प्रज्वलज्ज्ञानज्योतिष्पुञ्ज ज्ञानिप्रवर! जातावेकवचनम्, हे अङ्गिरोगण! 'आदित्याः रुद्राः वसवः' त्रिलोक्याः सर्वेऽपि देवगणाः, द्युस्थाना अन्तरिक्षस्थानाः पृथिवीस्थानाश्च सर्वेऽपि देवाः 'त्वे अनु' त्वामनुवर्तन्ते, यद्वा त्वयि अनुकूलाः सानुग्रहाश्च वर्तन्ते ब्रुवन्ति च—'इदं राधः' इदम् अस्माभिः प्रसादीक्रियमाणं दिव्यैश्वर्यं 'ते' तुभ्यं, त्वदभीष्टसिद्धये वर्तते। 'प्रतिगृभ्णीहि' प्रतिगृहाण, स्वीकुरुष्वैतद् हे अङ्गिरः! 'इदं राधः' एतद् आत्मसिद्धिवैभवं 'विभु प्रभु' विशालं, व्यापकं प्रभुत्वपूर्णञ्च, विभोः प्रभोश्च विभुतया प्रभुतया च सम्भृतम्। 'इदं राधः बृहत् पृथु' एतद् ऐश्वर्यं बृहत्त्वमयं बृहत्त्वकारकञ्च, पृथुलं प्रथिति-(यशः)-साधकञ्च। त्वदभीप्सितगुणगणविशिष्टमिदं त्वयाऽवश्यं प्रतिग्राह्यमिति भावः।

इदमाकूतम्—आदित्या नाम उत्तमस्थाना देवा येषां स्वरूपव्यापारा गुण-धर्मस्वभावाश्च एवमुपगीता ऋग्वेदे—

···आदित्यासः शुचयो धारपूता अवृजिना अनवद्या अरिष्टाः॥
त आदित्यास उरवो गभीरा अदब्धासो दिप्सन्तो भूर्यक्षाः।
अन्तः पश्यन्ति वृजिनोत साधु सर्वं राजभ्यः परमा चिदन्ति॥
धारयन्त आदित्यासो जगत् स्था देवा विश्वस्य भुवनस्य गोपाः।
दीर्घा धियो रक्षमाणा असुर्यमृतावानश्चयमाना ऋणानि॥
(ऋ० २.२७. २-४)

त आदित्या अभयं शर्म यच्छत सुगा नः कर्त सुपथा स्वस्तये।
(ऋ० १०.६३.७)

यमादित्यासो नयथा सुनीतिभिरति विश्वानि दुरिता स्वस्तये।
(ऋ० १०.६३.१३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिस्रो भूमीर्धारयन् त्रीँरुत द्यून् त्रीणि व्रता विदथे अन्तरेषाम् ।
ऋतेनादित्या महि वो महित्वं तदर्यमन् वरुण मित्र चारु ॥
त्री रोचना दिव्या धारयन्त हिरण्ययाः शुचयो धारपूताः ।
अस्वप्नजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्याय ॥
(ऋ० २.२७.८-९)

निगदव्याख्याता इमे मन्त्रा आदित्यस्वरूपव्यापारवर्णनपराः ।

अथ रुद्राः । यो देवो निजमन्युना उग्रशक्त्या च, रौद्र्याऽपि शिवङ्कर्या शक्त्याऽस्माकं विकासं पुरो नयति वेगपूर्वकम्, अस्माकं मार्गस्य सर्वानपि अन्तरायान् बाधकान्, विरोधिनोऽनिष्टकारिणश्च उन्मूलयति विचूर्णयति च, देवद्वेषिणो धर्मनिन्दकान् नास्तिकांश्च निषूदयति स एव रुद्रो नाम । प्रचण्डकर्मा प्राणबलानामप्रमेयनिधिरसौ बहूनां रुद्राणां पिता, मरुतां पितेति च प्रसिद्धः—

रुद्रस्य ये मीळ्हुषः सन्ति पुत्राः । (ऋ० ६.६६.३)

ते जज्ञिरे दिव ऋष्वास उक्षणो रुद्रस्य मर्या असुरा अरेपसः ।
पावकासः शुचयः सूर्या इव सत्वानो न द्रप्सिनो घोरवर्पसः ॥
युवानो रुद्रा अजरा अभोग्घनो ववक्षुरध्रिगावः पर्वता इव ।
दृळ्हा चिद् विश्वा भुवनानि पार्थिवा प्र च्यावयन्ति दिव्यानि मज्मना ॥
(ऋ० १.६४.२-३)

यूयं हि ष्ठा सुदानवो रुद्रा ऋभुक्षणो दमे ।
उत प्रचेतसो मदे ॥ (ऋ० ८.७.१२)

आदित्या रुद्रा वसवः सुदानव इमा ब्रह्म शस्यमानानि जिन्वत ।
(ऋ० १०.६६.१२)

नहि वः शत्रुर्विविदे अधि द्यवि न भूम्यां रिशादसः ।
युष्माकमस्तु तविषी तना युजा रुद्रासो नू चिदाधृषे ॥
(ऋ० १.३९.४)

इत्येवंविधेषु मन्त्रेषूपवर्णिता रुद्रा हि रुद्रस्य तत्तच्छक्तिविशेषाः ।

अथ वसवः—वसन्त्यस्मासु अस्मत्सत्ताया अन्तःस्थसत्त्वसारतया, वासयन्ति च सर्वाँल्लोकान्, विवासयन्ति दूरीकुर्वन्ति चान्धकारं निजज्योतिषेति वसवो नाम देवा भूतमात्रस्य सत्ताया अन्तःस्थसारतत्त्वाधिष्ठातारो ज्योतिर्मया देवाः । तेषां स्वरूपव्यापारा एभिर्निगमैराम्नाताः—

ज्योतिर्यज्ञाय रोदसी अनु ष्यादारे स्याम दुरितस्य भूरेः ।
भूरि चिद्धि तुजतो मर्त्यस्य सुपारासो वसवो बर्हणावत् ॥
(ऋ० ३.३९.८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तां वो देवाः सुमतिमूर्जयन्तीमिषमश्याम वसवः शसा गोः ।
सा नः सुदानुर्मृळयन्ती देवी प्रति द्रवन्ती सुविताय गम्याः ॥
(ऋ० ५.४१.१८)

उमया अत्र वसवो रन्त देवा उरावन्तरिक्षे मर्जयन्त शुभ्राः ।
अर्वाक् पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य ॥
(ऋ० ७.३९.३)

पाकत्रा स्थन देवा हृत्सु जानीथ मर्त्यम् ।
उप द्वयुं चाद्वयुं च वसवः ॥ (ऋ० ८.१८.१५)

ते नो भद्रेण शर्मणा युष्माकं नावा वसवः ।
अति विश्वानि दुरिता पिपर्तन ॥ (ऋ० ८.१८.१७)

विश्वे च नो वसवो विश्ववेदसो धीनां भूत प्रावितारः ।
(ऋ० ८.२७.२)

वि नो देवासो अद्रुहोऽच्छिद्रं शर्म यच्छत ।
न यद् दूराद् वसवो नू चिदन्तितो वरूथमादधर्षति ॥
(ऋ० ८.२७.९)

पुनन्तु मां देवजनाः पुनन्तु वसवो धिया । (ऋ० ९.६७.२७)

सुगा वो देवाः सदनाऽअकर्म्म यऽआजग्मेदँ सवनं जुषाणाः ।
भरमाणा वहमाना हवीँष्यस्मे धत्त वसवो वसूनि स्वाहा ॥
(यजु० ८.१८)

तदेवं प्रथममध्यमोत्तमस्थानाः इमे त्रयोऽपि देवगणाः स्वभक्ते, देवादिदेव-भक्तेऽङ्गिरसि सम्प्रीयमाणाः तस्मै त्रिलोक्या दिव्यैश्वर्यं राधः प्रसादीकुर्वन्ति । ऐश्वर्यवाचकस्य 'राधः' इति शब्दस्य 'राध संसिद्धौ' (स्वा० प० अ०) इत्य-स्माद् धातोर्निष्पन्नतया संसिद्धिर्वैभवम् अध्यात्मसिद्धिर्वा प्रधानोऽर्थः । श्रीअरविन्दपादास्तु वेदमन्त्राणामन्तरर्थे रत्नम्, रयिः, राधः, रायः इत्येषां शब्दानाम् अर्थम् आनन्दैश्वर्यमेव कुर्वन्ति 'र' इत्यक्षरस्य प्रेमार्थकत्वात् (द्र० 'आप्टे'कोषः), आनन्दस्य च प्रेम्णः परिणामत्वात् ।

अतः प्रकृतमन्त्रस्य गूढार्थे राधःपदेन आनन्दैश्वर्यम्, आत्मसिद्धिर्वैभवं च ग्राह्यं । इदमत्रंत्रिधवैभवमेव विभु-प्रभु-बृहत्-पृथु-इत्येभिर्विशेषणैर्विशेषयितुं शक्यं न तु किमपि अवरम् ऐहलौकिकम् । 'बृहत्'पदेन चात्र 'सत्यं बृहद् ऋतम्' (अथर्व० १२.१.१), सत्यबृहदृतमयी ऋतचिद्भूमिका सङ्केतिता या सप्तसु व्याहृतिषु बृहदर्थक-'महः' इति पदेन कीर्तिता, वेदे चान्यत्र द्यौर्बृहती (ऋ० १.५७.५) इति प्रोक्ता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'प्रथ प्रख्याने' इत्यतो निष्पन्नं 'पृथु' इति विशेषणं देवप्रदत्तेन राधसा देवभक्तोऽन्तर्यजमानो लोकलोकान्तरेषु प्रख्यातयशाः पृथुप्रथितकीर्तिर्वा भवतीति विवक्षतीति दिक्।

त्वे—युष्मच्छब्दात् परस्य अमो ङेर्वा 'सुपां सुलुक्०' इत्यनेन शे इत्यादेशः।

प्रतिगृभ्णीहि—प्रतिपूर्वाद् ग्रहेः लोण्मध्यमपुरुषैकवचने श्नः 'शानच्-शायच्'-आदेशाभावश्छान्दसः। हस्य भः।

देवा ददत्वा वरं तद् वो अस्तु सुचेतनम्।
युष्माँ अस्तु दिवेदिवे प्रत्येव गृभायत ॥१०॥

हे अङ्गिरसः! 'देवाः' आदित्यादयः पूर्वोक्ता देवा 'वः' युष्मभ्यम् 'वरम्' वरणीयं दिव्यवैभवम् 'आ' समन्तात्, सर्वतोऽपि, साकल्येनेति यावत् 'ददतु' प्रयच्छन्तु। 'ददत्वासुरम्' इति पाठे तु 'आसुरम्' असुरस्य भावः आसुरम्, असुरत्वम् प्रज्ञा-प्राण-पराक्रमवत्त्वम् ऋग्वेदस्य ३.५५-तमसूक्तस्य द्वाविंशतौ मन्त्रेषु परमरमणीयलोकोत्तरगुह्यकाव्यशैल्या विवृत्य वर्णितम्, 'महद् देवानामसुरत्वमेकम्' इति चरणेन प्रत्येकमन्त्रान्ते देवानां ज्ञानबलैश्वर्यत्वेन भूयो भूयो गुञ्जितम्...यत्ते जामित्वमवरं परस्या महन्महत्या असुरत्वमेकम् (ऋ० १०.५५.४) इति मन्त्रे परस्या महत्या देव्या अदितेर्महाशक्तित्वेनाम्नातम् असुरत्वम् इत्यर्थो बोध्यः। 'आसुरम्' इत्यस्य शब्दस्य अस्मिन्नर्थे च यास्काचार्यः प्रमाणम् —'महच्चास्मै देवानामसुरत्वमेकं प्रज्ञावत्त्वं वाऽनवत्त्वं वा, अपि वा असुरिति प्रज्ञानामास्यत्यनर्थानस्ताश्चास्यामर्थाः' (निरु० १०.४.३४) इति।

अथ द्वितीयपादार्थः। 'तद्' तत् पूर्वोक्तमसुरत्वं वरणीयवैभवं वा 'वः' युष्माकं 'सुचेतनम् अस्तु' पूर्णसच्चैतन्यमयं भवतु।

अत्रेदमवधेयम्—सु इति प्रशस्तनाम। 'अति सु इत्यभिपूजितार्थे' (निरु० १.३)। यच्च 'सु'पदवाच्यं तत् स्वल्पेनापि 'कु'पदवाच्येन सम्पृक्तं चेत् 'सु'-पदप्रयोगार्हं न भवतीति श्रीअरविन्दाः। अतः 'सुचेतनम्' इति पूर्णसच्चेतनात्मकमित्यर्थो ग्राह्यम्।

तच्च 'युष्मान्' प्रति, युष्मभ्यमित्यः 'दिवेदिवे अस्तु' प्रतिदिनम् अस्तु, न भवतु तस्माद् वो विच्छेदो जातुचिद् इति भावः, सुप्रतिष्ठितं भवतु तद् युष्मासु शाश्वतकालाय, तच्च यूयं 'प्रतिगृभायत एव' प्रत्यक्षरूपेण गृह्णीत, अनुभवत, किञ्च प्रतिगृह्णीत स्वीकुरुध्वमेव निश्चयेन। एवेत्यवधारणे।

अयमभिप्रायः—किं वरेण्यं वरणीयं वा देवेभ्य इति न जानीमो वयमल्पज्ञा जीवाः। तथा चाह भगवान् वेदः प्राथ्र्यप्रार्थनाविधिम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदिन्द्र चित्र मेहनाऽस्ति त्वादातमद्रिवः ।
राधस्तन्नो विदद्वस उभया हस्त्याभर ।।

यन्मन्यसे वरेण्यमिन्द्र द्युक्षं तदा भर ।
विद्याम तस्य ते वयमकूपारस्य दावने ।।

(ऋ० ५.३९.१-२, साम० ३४५, ११७२-७३)

एतदेव प्रकृतमन्त्रे 'देवा ददतु आ वरम्' इति प्रथमपादेनाभिप्रेतम् ।

अथ देवैर्दीयमानमपि दिव्यदानं प्रह्लादोपमाः प्रभुभक्तिमात्रप्रार्थिनो भक्तमूर्धन्याः—

यस्त आशिष आशास्ते न स भृत्यः स वै वणिक् ।
आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः ।।

न स्वामी भृत्यतः स्वाम्यमिच्छन् यो राति चाशिषः ।
अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः ।।
नान्यथेहावयोरर्थो राजसेवकयोरिव ।।

(भाग० ७.१०.४-६)

अपि च—

सालोक्य-सार्ष्टि-सामीप्य-सारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ।।

इत्येवं ब्रुवाणा नाङ्गीकुर्वते । अतः—

सालोक्य-सार्ष्टि-सामीप्य-सारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ।।

इति जानन्तो देवाः अनुरुन्धतेऽङ्गिरसो भक्तान् दीयमानप्रतिग्रहपूर्वकं देवेष्वनुग्रहार्थम् ।

गृभायत—गृह्णातेर्लोण्मध्यमपुरुषबहुवचने 'छन्दसि शायजपि' (पा० ३.१.८४) इत्यनेन श्नः शायच् । हस्य भः ।

त्वमिन्द्र शर्म रिणा हव्यं पारावतेभ्यः ।
विप्राय स्तुवते वसु नि दूरश्रवसे वह ।।११।।

'इन्द्र' हे ज्योतिर्मयमनोऽधिपते प्रकाशप्रदातर्देव ! 'त्वं पारावतेभ्यः' परावत् परब्रह्म देवता एषामिति पारावतास्तेभ्यः परब्रह्मनिष्ठेभ्यः 'हव्यम्' आह्वातुं योग्यं, देवस्याह्वानपूर्वकं तस्मात् प्रार्थयितुं योग्यं यद्वा भक्तस्य रोगनं, प्रसादकं सन्तं रुन्त्र 'शर्म' शृणाति हिनस्ति, समूलमुन्मूलयति समस्तसन्तापान् इति शर्म शरणम्, आर्तानां प्रपन्नानां संसारार्तिहरणं, भवभयभञ्जनम्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभयपदप्रापणं स्वकीयम् अनन्यमाश्रयं 'सप्रथस्तम'-परमशान्तिप्रदं निःश्रेयसा-परपर्यायं परमकल्याणमयम् आनन्दधाम वा 'रिणाः' प्रापय ।

'त्वमिन्द्र शर्म रिणा हव्यः पारावतेभ्यः' इति पाठे तु—हे इन्द्र ! त्वं 'हव्यः' भक्तैर्होतव्यः, आत्मार्पणहविषा तर्पणीयः, दिव्यैश्वर्यवृष्टये आह्वातव्यश्चासि । त्वं पारावतेभ्यः शर्म शरणम् आनन्दधाम वा 'रिणाः' प्रापय इति पूर्ववद् योज्यम् ।

'स्तुवते' स्तुतिशीलाय 'विप्राय' मेधाविने, ज्ञानिने 'दूरश्रवसे' दूरस्य अगोचरस्य श्रवः श्रवणं तस्मै, अतीन्द्रियश्रवणनिमित्तमित्यर्थः, श्रवणञ्चात्र अन्यज्ञानेन्द्रियाणामपि स्वस्वप्रत्यक्षानुभवस्योपलक्षणम्, अतीन्द्रियदर्शनस्पर्शनार्थमित्यर्थः 'वमु' अन्तरिन्द्रियैश्वर्यम् अन्तर्दृष्टि-अन्तःश्रुत्याद्युपकारकम् 'नि वह' नितरां प्रापय ।

इदं तात्पर्यम्—अधिगतदिव्यवैभवो ब्रह्मनिष्ठोऽङ्गिराः परमशान्त्यामानन्दे च निवसति, दिव्यैरन्तरिन्द्रियैश्च अतीन्द्रियशब्दस्पर्शरूपरसगन्धानप्रतिहतमनुभवितुं प्रभवति । तथा चोक्तं छान्दोग्योपनिषदि—

स वा एष एतेन दैवेन चक्षुषा मनसैतान् कामान पश्यन् रमते (८.१२.५) ।

शतपथब्राह्मणकारा अप्याहुः—

शृण्वन् श्रोत्रं भवति, स्पर्शयन् त्वग्भवति, पश्यन् चक्षुर्भवति, रसयन् रसना भवति, जिघ्रन् घ्राणं भवति, मन्वानो मनो भवति. बोधयन् बुद्धिर्भवति. चेतयँश्चित्तम्भवत्यहंकुर्वाणोऽहङ्कारो भवति । (काण्डम् १४)

रिणाः—'री गतिरेषणयोः' (त्र्या० प० अ०) इत्यस्मादन्तर्भावितण्यर्थात् लङ्मध्यमपुरुषैकवचने अडभावश्छान्दसः ।

हव्यम्—'ह्वेञ् स्पर्धायां शब्दे च' (भ्वा० उ० अ०) इत्यस्मात्, 'हु दानादनयोः, आदाने चेत्येके, प्रीणनेऽपि' (जु० प० अ०) इत्यस्माद वा यत् । प्रकृतमन्त्रे जुहोतिः प्रीणनार्थको ग्राह्यः ।

पारावतेभ्यः—परावत् परब्रह्म देवता एषामिति पारावतास्तेभ्यः । 'परावत्' इति शब्दात् 'सास्य देवता' (पा० ४.२.२४) इति सूत्रेण अण् । णित्त्वाद् वृद्धिः ।

त्वमिन्द्र कपोताय च्छिन्नपक्षाय वञ्चते ।
श्यामाकं पक्वं पीलु च वारस्मा अकृणोर्बहुः ॥१२॥

'इन्द्र' हे स्वर्लोकसम्राट् ! दिव्यालोकप्रदातर्देव ! 'त्वम्' 'छिन्नपक्षाय' छिन्नः कर्तितः पक्षः पतत्रं संसारासक्तिस्वरूपं, संसृतौ सन्ततसंसरण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साधकम् आत्महंसस्य चिद्व्योमविहरणबाधकञ्च येन तस्मै, यद्वा छिन्नः समुन्मूलितः पक्षः संसारसङ्गमूलकः सकलपरिग्रहः पुत्र-मित्र-कलत्रादिरूपो येन तस्मै 'वञ्चते' गच्छते, अत्र तत्र सर्वत्र पर्यटते परिव्राजकाय 'अस्मा कपोताय' अस्मै पारावताय पूर्वमन्त्रोक्ताय परब्रह्मनिष्ठाय 'पक्वं श्यामाकम्' श्यामाको मुन्यन्नम्, तच्चात्र तापसोचितम् अन्नमयकोषं तप्तां तनुं वा सङ्केतयति प्रतीक-भाषया, परिपाकमापन्नां तपस्तप्ततनुमित्यर्थः, 'बहुः वाः' प्रभूता अपः, दिव्य-चिन्मयसत्तायाः सच्चिदानन्दस्य वा धाराः,'च' अपिच, 'पक्वं पीलु'- पीलु नाम फलविशेषः, फलं च साधनायाः सुपरिणतेः सङ्केतकं प्रतीकं वेदस्य गुह्यार्थपद्धतौ, साधनायाः परिपक्वफलम् अपराप्रकृतेः पराप्रकृतौ परिणतिं, सर्वभूतहितरतिं लोकसंग्रहप्रवृत्तिञ्चेति भावः 'अकृणोः' कृतवान् । पक्वमिति पदं काकाक्षिगोल-कन्यायेन द्विरन्वीयते ।

अपि वा, तस्मै परिव्राजकाय अनिकेताय जगन्निकेताय 'पक्वं श्यामाकं, वाः पीलु च बहुः अकृणोः' अन्नजलफलादिव्यवस्थां बाहुल्येन अकरोः कृतवानसि, तस्य योगक्षेमभारं स्वयं त्वमेव निर्वहसीति यावत् ।

अत्रेदमवधेयम्—'कपोत'शब्दः खलु लोकभाषायां पक्षिविशेषवाचक-'पारावत'पर्यायः । अत्र तेन पूर्वमन्त्रोक्तः परब्रह्मनिष्ठः पारावतो लक्ष्यते गूढ-साङ्केतिकभाषया लक्षितलक्षणया । अदीक्षितेभ्यो गूढार्थगोपनार्थम् ईदृशपद-प्रयोगो रहस्यविदां समयः । लौकिककाव्ये तु पदस्य सन्दिग्धार्थकत्वं दूषणत्वेन परिगण्यते, प्रासादिकतायाः काव्यरसस्य प्रधानाऽपरिहार्यधर्मत्वात् काव्योत्कर्ष-हेतुत्वाच्च । किन्तु मन्त्रशास्त्रादिरहस्यविद्यासु सन्दिग्धार्थता गुणाय कल्पते । पर्यायप्रयोगाः सन्देहोत्पादनायैव क्रियन्ते । अनधिकारिभ्यो रहस्यशास्त्रस्य गोपनाय कृता एतादृशप्रयोगा बहुशो दृश्यन्ते । 'सोऽपि रुद्रजपं कुर्यात्' इत्यत्र यजुर्वेदीयरुद्राध्यायस्य जपो न विवक्षितः, किन्तु मन्त्री एकादशकृत्वः (एकादश किल रुद्राः) जपं कुर्यात् इत्येव रहस्योऽर्थः । तन्त्रशास्त्रेषु मन्त्रोद्धाराः परिभाषा-पदैरेव क्रियन्ते, बीजाक्षरसूचकानां पर्यायपदानां सङ्कलनं बीजनिघण्टुरित्याख्ये ग्रन्थे क्रियते ।

एवमेव 'निण्यवचः'प्रयोगबहुले गुह्यतममन्त्रकाव्यमये वेदे कलरवाख्यपक्षि-विशेषवाचि'कपोत'-'पारावत'पदप्रयोगः प्रतीकात्मकपदनिर्विशेषः 'तद्भिन्नत्वे सति तद्बोधकत्वं प्रतीकत्वम्' इति प्रतीकलक्षणात् (सर्वलक्षणसंग्रहः) । व्युत्पत्ति-दृष्ट्या पारावतशब्दस्य त्रयोऽर्था वर्तन्ते—१. कपोतः । २. पारावारदेशेषु, दूरादूरवर्तिदेशेष्वशेषेषु विद्यमाना निखिलाः प्रजाः । तथा चाह यास्कः —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'पारावतघ्नी पारावारघातिनी पारं परं भवत्यवारमवरम्' (निरु० २.२४), पार+अवार+वत्प्रत्ययः, तदन्तादण्, पृषोदरादिवत् रूपसिद्धिः। ३. परावत् परब्रह्म देवताऽस्येति परब्रह्मोपासको भक्त इत्यर्थः। एषु त्रिष्वप्यर्थेषु मध्ये प्रकृत-मन्त्रे तृतीयार्थः उपादीयमानो लोकोत्तरकाव्यस्य वेदस्य यथार्थंमर्माभिव्यनक्ति इति दिक्।

स्वयं 'कपोत'पदमपि के उदके, संसारार्णवे पोत इवेति, अपि वा, के प्रजापतौ ब्रह्मणि, यद्वा तदीये के सुखे आनन्दमयस्वरूपे पवते गतिं करोति, विचरतीति व्युत्पत्त्या आनन्दसुधासिन्धुविहिताधिवासस्य संसारार्णवसन्तरणैक-सहायस्य सिद्धस्य समभिधायको यौगिकवृत्त्या।

योगविद्यायां पक्षी अन्तरात्मनोऽतिप्रसिद्धं सामान्यं प्रतीकम्[1], एतच्च 'द्वा सुपर्णा सयुजा सखाया०' (ऋ० १.१६४.२०) इति प्रहेलिकात्मकमन्त्रवर्णेनापि प्रमाण्यते। तत्रापि श्वेतकपोतः शान्तेः प्रतीकम्, 'बत्तख' इति हिन्दी भाषायां प्रसिद्धश्च कपोतविशेषः सामान्यतया अन्तरात्मन अन्तःसत्ताया वा प्रतीकम्।[2]

प्रकृतमन्त्रगतं फलविशेषवाचि 'पीलु'पदं फलमात्रमुपलक्षयति। 'फलानि साधनायाः परिणामस्य प्रतिरूपकाणि' इति श्रीअरविन्दपादाः।[3]

तदेवं शान्तदान्ताय निःसङ्गताशस्त्रसंछिन्नसमस्तपरिग्रहाय परब्रह्मोपासक-परिव्राजकपुङ्गवाय, हे इन्द्र! त्वं न केवलं साधनाधिगम्यां दिव्यसम्पदं प्रददासि, अपितु तस्य योगक्षेममपि स्वयं निर्वहसि—'तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्' इति विश्वविश्रुतप्रतिश्रुतिपरिपालनार्थम् इति हार्दम्।

छिन्नपक्षाय—छिन्नः पक्षः (आसक्ति) पतत्रं परिग्रहो वा येन तस्मै। 'पक्ष परिग्रहे' (भ्वा० प० से०, चु० उ० से०) इत्यस्मात् घञि निष्पन्नमुत्तर-पदम्।

वञ्चते—'वञ्चु गतौ' (भ्वा० प० से०) इत्यस्मात् शत्रन्तात् चतुर्थ्येक-वचनम्।

बहुः—बहुशब्दात् परस्य द्वितीयाबहुवचनस्य 'सुपां सुलुक्०' इत्यनेन सु इत्यादेशः।

---

१. श्रीअरविन्द के पत्र, द्वितीय भाग, पृ० ४६३
२. ,, ,, ,, ,, ४७२
३ ,, ,, ,, ,, ४६४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्वा 'बहुवारम्' इत्यर्थे बहुशब्दात् 'द्वित्रिचतुर्भ्यः सुच्' (पा० ५.४.१८) इत्यनेन सुच् बाहुलकात् ।

अरंगरो वावदीति त्रेधा बद्धो वरत्रया ।
इरामह प्रशंसत्यनिरामप सेधति ॥१३॥

'वरत्रया' रज्ज्वा 'त्रेधा' त्रिभिः प्रकारैः त्रिषु स्थानेषु वा देहप्राणमनोलक्षणेषु 'बद्धः' बन्धनग्रस्तः, विपाशितः 'अरंगरः' अरम् अलमत्यर्थं वा गारयते विजानाति, यद्वा गृणाति स्तौति उपदिशति वेति अरंगरः विज्ञानवान्, पूर्णविज्ञानसम्पन्नो वा सततस्तुतिसंरतः परमोपदेष्टा वा पूर्वोक्तः पारावतः 'वावदीति' भूयो भूयो भृशं वा प्रवचनं करोति स्वानुभूतज्ञानस्येति भावः । 'इराम्' इळां सत्यसाक्षात्कारं, स्वतःप्रकाशं ज्ञानं तस्य शक्ति वा 'अह' निश्चयेन प्रशंसति 'अनिराम्' इळया अभावम्, आत्म-परमात्मनोः साक्षात्कारस्य प्रत्यक्षज्ञानस्य वा, तच्छक्तेर्वा अभावम् 'अप सेधति' अपगमयति, अपवर्जयति अपवारयति वा ।

अस्यायमाशयः—

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ विवेश ॥
(ऋ० ४.५८.३)

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥
(ऋ० १.२४.१५)

वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान् निधयेव बद्धान् ॥
(ऋ० १०.७३.११)

इत्यादिभिर्मन्त्रवर्णैः परमपुरुषस्य जीवस्य च त्रिधा बद्धत्वं सुविशदमुदीरितम् । विज्ञानवान् सर्वानपि देहिन उत्तममध्यमाधमैस्त्रिभिः पाशैर्देहप्राणमनोरूपैर्बद्धान् विज्ञाय यतते स्वयं बन्धमोक्षार्थमुपदिशति च तस्य विधिमन्यानपि —

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् । (ऋ० ७.५९.१२)
स्वाच्छरीरात् प्रवृहेन्मुञ्जादिवेषीकां धैर्येण । (कठोप० ६.१७)

इत्यादिरूपम् । देहप्राणमनसां जीवात्मनोऽन्तरात्मनो हृदयान्तर्वर्तिज्योतिर्मयपुरुषाद्वा पार्थक्यस्य सुस्पष्टसाक्षात्कारं, तन्मूलकं देहेन्द्रियप्राणाद्यात्मबुद्धिपरित्यागं च स प्रशंसति अमृतपदप्राप्तिप्रशस्तपथत्वेन, घोषयति च ईदृश-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साक्षात्काराभावं बन्धनमूलम्, प्रबोधयति च बुभुत्सून् देहाद्यावरणनिवारणपूर्वकम् आत्मपरमात्मप्रत्यक्षज्ञानोपार्जनार्थमिति ।

अरंगरः—अरं गृणातीत्यर्थे 'अरम्'शब्दे उपपदे गृणातेः 'ऋदोरप्' (पा० ३.३.५७) इति अप् । यद्वा, अरं गारयते इत्यर्थे 'गृ विज्ञाने' (चु० आ० से०) इत्यतः पचाद्यच् ।

वरत्रया—वृणोति आ वृणोति, बध्नाति यया या वा सा वरत्रा । 'वृञ् वरणे' इत्यतो 'वृञश्चित्' (उणा० ३.१०७) इत्यनेन करणे कर्तरि वा अत्रन् । तदन्तात् स्त्रियां टाप् ।

सेधति—'षिधु गत्याम्' (भ्वा० प० से०) इत्यस्माद् भौवादिकाद् अन्तर्भावितण्यर्थाल्लट्प्रथमपुरुषैकवचने रूपम् ।

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशमं सूक्तम्

(२०. १३६)

१-१६ प्रजापतिर्देवता । १-२,५,७-९,१५ निचृदनुष्टुप्, ३ आर्ष्यनुष्टुप्, ४ भुरिगनुष्टुप्, ६,१०-११,१६ अनुष्टुप्, १२ निचृत् ककुभुष्णिक्, १३ भुरिगाष्र्युष्णिक्, १४ उरोबृहती ।

यदस्या अंहुभेद्याः कृधु स्थूलमुपातसत् ।
मुष्काविदस्या एजतो गोशफे शकुलाविव ॥१॥

'यत्' यदा 'अस्याः' बुद्धिस्थायाः 'अंहुभेद्याः' अंहु पापं, पापमात्रमूलं कौटिल्यमिति यावत्, तेन भेद्या भेत्तुं विदारयितुं, विदार्य प्रवेष्टुमतिक्रमितुं च शक्या इति अंहुभेद्या त्रिगुणात्मिका, अन्नप्राणमनोमयी अपरा प्रकृतिः तस्याः, षष्ठ्याः सुः, 'कृधु' ह्रस्वं सूक्ष्मं वा तत्त्वं सत्त्वगुणलक्षणं 'स्थूलं' सत्त्वेतरत् रजस्तमःस्वरूपं स्थूलगुणद्वयं च 'उपातसत्' उपतासयति उपक्षयति विनाशयति च त्रिगुणातीततत्त्वानुसन्धित्सुः आत्मस्वरूपसाक्षाच्चिकीर्षुरिति शेषः तदा 'अस्याः मुष्कौ' एतस्या 'अपरा' प्रकृतेः, एतत्सम्बन्धिनावित्यर्थः मुष्कौ तस्करौ रागद्वेषलक्षणौ अहङ्कारकामौ वा 'एजतः इत्' कम्पेते एव, स्वनाशभयाद् वेपेते किल । तत्रोपमामाह—'गोशफे शकुलौ इव' यथा गोखुरे तदुपलक्षिते सुलघुगर्ते स्वल्पजलाशये वा मत्स्यौ प्रकम्पेते ताम्यतस्त्रस्यतश्च तथैव तावपि मूलोच्छेदाद् बिभित इति भावः ।

अयमभिप्रायः—

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ (गीता ७.४-५)

इति गीताशास्त्रे भगवदुपदिष्टप्रकृतिद्वयमध्यात् स्थूल-सूक्ष्मभूत-सेन्द्रियमनोबुद्ध्यहङ्कारमयी त्रिगुणात्मिका अपरा प्रकृतिरेव अंहुभेद्या इत्यभिधयाऽभिहिताऽस्मिन् मन्त्रे । अपरा नाम न परा, अनुत्कृष्टा, निकृष्टा, अशुद्धा, अनर्थकरी, संसारबन्धनात्मिका च, तस्या अपरात्वञ्च ईश्वरस्य अविद्यामयमायाशक्तित्वात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विपर्ययज्ञानवासनावासिता हि सा अंहुना अंहसा वक्रगत्या (अहि प्लिह वक्रगतौ) भिद्यते, विदार्यते, विध्यते, प्रविश्यते व्याप्यते च। वक्रगतिः, सत्यस्य ऋजुमार्गाद् विच्युतिरेव च सकलदुरितानां दुर्गुणदुर्गतीनां पापतापानां च मूलम्। 'युयोध्यस्मज्जुहुराणमेनः' इत्यत्र जुहुराणम् इति एनसो विशेषणं तस्य कौटिल्यजन्यत्वं कुटिलकारित्वं च सुस्पष्टमुदीरयति अभिधावृत्त्या। अस्मदीयसमस्तसत्तायाः सत्यस्वामिनो देवाः स्वयमृजवोऽस्मानपि ऋजून् कर्तुकामाः (ऋजूयन्तः) अस्मदन्तःस्थम् ऋजुवृजिनं च प्रतिपलं पश्यन्त ऋजुपथेनैव नयन्ति नः ऋजुप्रणीतयो जगतीगतऋजुवृजिनदर्शिनः सन्मार्गप्रदर्शितश्चेत्युक्तमासु ऋक्षु—

देवा ऋजव ऋजूयवश्च—

१. ऋजुः पवस्व वृजिनस्य हन्ताऽपामीवां बाधमानो मृधश्च।
(ऋ० ९.९७.४३)

२. युवाना पितरा पुनः सत्यमन्त्रा ऋजूयवः।
ऋभवो विष्टयक्रत॥ (ऋ० १.२०.४)

३. देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभिनो निवर्तताम्।
(ऋ० १.८९.२)

४. सिषक्तु माता मही रसा नः स्मत् सूरिभिर्ऋजुहस्त ऋजुवनिः।
(ऋ० ५.४१.१५)

५. सो अर्चिषा पृथिवीं द्यामुतेमामृजूयमानो अतपन्महित्वा।
(ऋ० १०.८८.६)

६. तयोर्यत् सत्यं यतरद् ऋजीयस्तदित् सोमोऽवति हन्त्यासत्।
(ऋ० ७.१०४.१२)

देवा अस्मदन्तःस्थऋजुवृजिनदर्शिनः —

१. आ सूर्यो बृहतस्तिष्ठदज्राँ ऋजु मर्तेषु वृजिना च पश्यन्।
(ऋ० ४.१.१७)

२. ऋजु मर्तेषु वृजिना च पश्यन्नभि चष्टे सूरो अर्य एवान्।
(ऋ० ६.५१.२)

३. ग्रन्थिं न वि ष्य ग्रथितं पुनान ऋजुं च गातुं वृजिनं च सोम।
(ऋ० ९.९७.१८)

देवा ऋजुक्रतवः ऋजुप्रणीतयश्च—

१. यं यज्ञं नयथा नर आदित्या ऋजुना पथा।
प्र वः स धीतये नशत्॥ (ऋ० १.४१.५)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. मदेमदे हि नो ददिर्यूथा गवामृजुक्रतुः । (ऋ० १.८१.७)

३. ऋजुनीती नो वरुणो मित्रो नयतु विद्वान् ।
अर्यमा देवैः सजोषाः ।। (ऋ० १.९०.१)

४. नास्या वश्मि विमुचं नावृतं पुनर्विद्वान् पथः पुर एत ऋजु नेषति ।
(ऋ० ५.४६.१)

मर्त्येभ्य ऋजुत्वप्रार्थनार्थं भगवदादेशः —

१. अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्ति नो वरेयम् ।
(ऋ० १०.८५.२३)

२. तमर्यमाभि रक्षत्यृजूयन्तमनु व्रतम् ।
उक्थैर्य एनोः परिभूषति व्रतं स्तोमैराभूषति व्रतम् ।।
(ऋ० १.१३६.५)

३. आ नो देवः सविता साविषद् वय ऋजूयते यजमानाय सुन्वते ।
(ऋ० १०.१००.३)

ऋजुमर्त्याय देवैर्दिव्यप्रकाशमयलोकप्रदानम् —

त्री रोचना दिव्या धारयन्त हिरण्ययाः शुचयो धारपूताः ।
अस्वप्नजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्याय ।।
(ऋ० २.२७.९)

अथ गीतायामपि आर्जवं दिव्यसम्पत्सु प्राधान्येन, सर्वार्थसाधकतपोऽङ्गत्वेन, ह्यकर्मत्वेन ज्ञानसाधनत्वेन च सङ्कीर्तितम्, अनार्जवं दम्भित्वं धर्मध्वजित्वं वा आसुरसम्पत्प्रधानाङ्गत्वात् श्रेयोविघातकत्वाच्च वर्जनीयत्वेन परिगणितम् ।
(गीता १३.७,१६.१,१७.१४,१८.४२)

निखिलदुरितदुर्गुणदुःखदुर्गतिमूलमिदं दम्भित्वमनार्जवं वा अंहुभेद्याया 'अपरा'प्रकृते रजोगुणस्यान्यतमसन्ततिः ।

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ।।

इति गीता(३.३७)वचनानुसारेण रजोगुणसमुद्भवः दुष्पूरः कामस्तृष्णा रागो वा महापाप्मा । तस्य मूलञ्च अविरतविषयचिन्तनजन्यतदासक्तिमूलकः, विषयोपभोगनिमित्तकोऽहम्मयसङ्कल्प एव इति शास्त्रविदां समयः । तस्य कामस्य रागस्य वाऽपूर्तौ जायमानः क्रोधोऽपि स्वपरिणामभूतसम्मोह-स्मृति-विभ्रम-बुद्धिनाश-सर्वनाशसमुपेतो महापापत्वेन परिगणितः पुण्यपापमर्मज्ञैः । अपराप्रकृतिनिम्नतमगुणपरिणामभूतमोहप्रमादालस्यनिद्रादिविद्रावणमपि अग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

णितानर्थविजृम्भणं, लौहश्रृङ्खलायिततमोगुणनिबर्हणमपि कामक्रोधादिप्रबलतर-रिपूपद्रवोपबृंहणं सकलपापपुञ्जप्रजनन,म् जीवबन्धसाधनरजतरज्जुस्वरूपम्, ईदृशमिमं रजोगुणं निर्जेतुं समर्जितः सत्त्वगुणोऽपि कालेन सात्त्विकाहङ्कारजनन-पूर्वकं स्वर्णश्रृङ्खलायते साधकस्य बन्धातीतपरमनिःश्रेयसैककामस्य। अत एव प्रकृतमन्त्रे प्रकृतेः स्थूलसूक्ष्मसूक्ष्मतरत्रिगुणसन्तरणार्थं सम्प्रेरितो भवसागर-सन्तितीर्षुः, सच्चिदानन्दसाम्राज्यसञ्जिगीषुः स्वात्मसमुद्दिधीर्षुः। ईदृशाद ब्रह्म-जिज्ञासोः परममुमुक्षोश्च रागद्वेषौ अहङ्कारकामौ वा गोष्पदप्रमाणपङ्किलपयः-पतितप्रताम्यन्मत्स्यमिथुनवत प्रवेपमानौ परिमरमुपेतः। अविप्लुतविवेकं त्रिगुणातीतमेतादृग्योगिनमनघमिव शिशुं जहाति जीवं प्रकृतिः प्रसन्नेति रहस्यम्।

अंहुना—'कर्मणा पुण्यपापलक्षणेन फलदानोन्मुखेन भिनत्ति तत्भोगार्थं विविधाकारेण स्वात्मानं परिणमयति इति सा अंहुभेद्या अविद्या' इति केचित्। तच्च नोऽप्यभिमतम् अपराप्रकृतेरविद्याजन्यत्वादिष्टापत्तेः। तस्मिन् पक्षे यदा तत्त्ववेत्ता प्रपञ्चसत्यत्वकल्पिकाम् अर्थक्रियासमर्थवस्तुकल्पिकां, विषयप्रतिभास-मात्रकल्पिकाञ्चेति त्रिविधामपि अविद्यामुपक्षयति तदा रागद्वेषलक्षणौ तादात्म्याध्यास-संसर्गाध्यासस्वरूपौ वा तस्करौ आत्मसाक्षात्कारभयात् प्रकम्पमानौ विनाशमुपेतः इत्येवमर्थयोजनानुसन्धेया।

अंहुभेद्याः—भेत्तुं शक्या भेद्या। 'भिदिर् विदारणे' (रु.उ.अ.) इत्यतः कर्मणि ण्यत्। तदन्तात् स्त्रियां टाप्।

अंहते वक्रगतिं करोतीत्यंहु पापम्। अहेरिव खलु वक्रा गतिरंहुनोंऽहसो वा। 'अहि प्लिह वक्रगतौ' इति काशकृत्स्नधातुपाठे पठिताद् (पृ० १२२) अंहतेः औणादिकः उः बाहुलकात्। अंहुना भेद्या अंहुभेद्येति तृतीयातत्पुरुषः। ततः षष्ठ्याः सुरित्यादेशः।

कृधु—कृध्विति ह्रस्वनाम, निकृत्तं भवति (निरु० ६.१.३), 'निकृत्तमिव तद् भवति ह्रस्वत्वादेव' इति स्कन्दस्वामिभाष्यम्। 'कृती छेदने' (तु०प०से०) इत्यस्माद् बाहुलकात् औणादिके कुप्रत्यये (उणा० १.२३) तकारस्य धकारः।

उपातसत्—उपपूर्वात् 'तसु उपक्षये' (दि०प०से०) इत्यतोऽन्तर्भावित-ण्यर्थात् लडर्थे लुङ्प्रथमपुरुषैकवचनम्।

मुष्कौ—मुष्णातीति मुष्कः। 'मुष स्तेये' (क्रया०प०से०) इत्यतः 'सृ-वृ-भू-शुषि-मुषिभ्यः कक्' इत्यनेन कक् (उणा० ३.४१)।

यदा स्थूलेन पससाणौ मुष्का उपावधीत्।
विष्वञ्चा वस्या वर्धतः सिकतास्वेव गर्दभौ ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'यदा' यस्मिन् काले, यस्यां दशायां यस्यां चिद्भूमिकायां वा 'अणौ' सूक्ष्मातिसूक्ष्मे प्रत्यगात्मनि परमात्मनि वा 'स्थूलेन पससा' बृहता विशालेन वा बन्धेन, देशबन्धश्चित्तस्य धारणा' (यो० द०, विभूतिपाद: १) इत्येवंलक्षणया परमैकाग्र्यरूपया धारणया इति यावत्, 'मुष्कौ' पूर्वोक्तौ तस्करौ रागद्वेषौ, अहङ्कारकामौ, तादात्म्याध्यास-संसर्गाध्यासौ वा 'उप अवधीत्' उप व्याप्तौ, व्यापकतया, सम्पूर्णतया हन्ति, यद्वा तौ उप उपेत्य, विचित्य अन्विष्य वा विनाशयति आत्मपरमात्मसाक्षात्कारकामः साधक इति शेषः, तदा 'विष्वञ्चा' विषु विश्वतः अक्तौ अञ्चितौ वा, सर्वतः सर्वत्र वा गतौ, व्याप्तौ पूज्यौ चेत्यर्थः 'वस्या' वसीयांसौ, वरिष्ठौ श्रेष्ठौ वा आत्मपरमात्मानौ 'वर्धतः' वृद्धिं विस्तारञ्च गच्छतः । तत्र दृष्टान्तः—'सिकतासु गर्दभौ एव' एवेति सादृश्ये, यथा बालुकासु मरुप्रदेशे वा श्वेतकुमुदे वर्धेते तथेत्यर्थः ।

अयमभिसन्धिः —

बालादेकमणीयस्कमुतैकं नेव दृश्यते ।
ततः परिष्वजीयसी देवता सा मम प्रिया ।। (अथर्व० १०.८.२५)
सहस्रमृक्वा पथिभिर्वचो विदध्वस्मभिः सूरो अण्वं वि याति ।
(ऋ० ६.६१.३)
आपानासो विवस्वतो जनन्त उषसो भगम् ।
सूरा अण्वं वि तन्वते ।। (ऋ० ६.१०.५)
प्र ते धारा अत्यण्वानि मेष्यः पुनानस्य संयतो यन्ति रंहयः ।
(ऋ० ६.८६.४७)
ओतं निर्हितमुच्छिष्टे यज्ञस्याणूनि विद्यया ।
(अथर्व० ११.७.१०)
स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा ।
(छा० उप० ३.८.७,६.४,१०.३)
अणीयान् व्रीहेर्वा यवाद्वा (आत्मा) । (छा० उप० ३.१४.३)
अणोरणीयान् महतो महीयान् । (कठोप० १.२.२०)
अणोरणीयानहमेव तद्वत् । (कैवल्योप० २०)
अणीयान् ह्यतर्क्यमणुप्रमाणात् । (कठोप० २.८)
अणोरणीयांसमिममात्मानमोङ्कारं नो व्याचक्ष्व । (नृसिंहोप० ५.१)
अणुत्वे सति चैतन्यम् । (भवसं० उप० २.३१)
अणुमेतमाप्य स मोदते । (कठोप० २.१३)
अणोरप्यण्व्यं ध्यात्वा । (मैत्रा० उ० ६.३८)
अणोरणीयांसमनुस्मरेद्यः । (गीता० ८.६)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ष्माच्च तत्सूक्ष्मतरं विभाति। (मुण्डकोप० ३.१.७)

सूक्ष्मातिसूक्ष्मं सलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपम्। (श्वेताश्व० ४.१४)

सूक्ष्मातिसूक्ष्म सलिलस्य मध्ये विश्वस्य स्रष्ट्रीमनेकाननाख्याम्। (गुह्यकाल्युप० ५७)

सूक्ष्मात् सूक्ष्मतरं नित्यं स त्वमेव त्वमेव तत्। (कैव० १६)

सूक्ष्मात् सूक्ष्मतरं ज्ञेयम्। (२ शिवसङ्कल्पोप० १२)

सूक्ष्मत्वात्तदविज्ञेयम्। (गीता १३.१६)

इत्यादिभिर्वेदोपनिषद्गीतादिशास्त्रवाक्यैरात्मपरमात्मनोरणोरणीयस्त्वं सूक्ष्मातिसूक्ष्मत्वं वा सुस्पष्टं सङ्कीर्तितम्।

अत एव च--

तममृक्षन्त वाजिनमुपस्थे अदितेरधि।
विप्रासो अण्व्या धिया॥
एष धिया यात्यण्व्या शूरो रथेभिराशुभिः।
गच्छन्निन्द्रस्य निष्कृतम्॥
अति श्रिती तिरश्चता गव्या जिगात्यण्व्या।
वग्नुमियर्ति यं विदे॥
ऋत्वा दक्षस्य रथ्यमपो वसानमन्धसा।
गोषामण्वेषु सश्चिम॥
तमीमण्वीः समर्य आ गृभ्णन्ति योषणो दश।
स्वसारः पार्ये दिवि॥
इन्द्रा याहि चित्रभानो सुता इमे त्वायवः।
अण्वीभिस्तना पूतासः॥
(ऋ० ९.२६.१, १५.१, १४.६, १६.२, १.७, १.३.४)

दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः। (कठोप० ३.१२)

अणुरेष धर्मः। (कठोप० १.२१)

अणुः पन्था विततः पुराणः। (बृहदा० ४.४.८)

अणिमादिकमैश्वर्यमचिरात्तस्य जायते। (योगशिखोप० २.७.२०)

अणिमादिपदं प्राप्य राजते। (योगशिखोप० १.१३८)

एषु शास्त्रवचनेषु च तस्य स्वयं सूक्ष्मातिसूक्ष्मधीसम्पन्नत्वात् सर्वज्ञानमयत्वाच्च सूक्ष्मधीगम्यत्वं, सूक्ष्मवाग्विषयत्वं, सूक्ष्मचिद्भूमिकाधिवासित्वं, सूक्ष्मदर्शिभिरेव दृश्यत्वं, क्षुरधारोपमनिशितदुरत्ययधर्मपथपथिकैकप्राप्यत्वं सूक्ष्मतमाणिमादिपदसम्पत्सम्प्रदायित्वं च प्रतिपादितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदर्थं च प्रकृतमन्त्रे 'पसस्' इति पदेन 'नाभिचक्रे, हृदयपुण्डरीके, मूर्धिन-ज्योतिषि, नासिकाग्रे, जिह्वाग्रे इत्येवमादिषु देशेषु, बाह्ये वा विषये चित्तस्य वृत्तिमात्रेण बन्धः इति धारणा' इति योगदर्शनव्यासभाष्यपरिभाषिता धारणैव रागद्वेषसमुन्मूलनपूर्वकप्रभुसाक्षात्कारसाधनत्वेन निर्दिष्टा ।

धारणां धारयेद् योगी धारणाभिश्च किल्विषम् (दहेत्) ।

(योगोप० २७)

(अथ) धारणा—सा त्रिविधा, आत्मनि मनोधारणं, दहराकाशे बाह्याकाश-धारणं, पृथिव्यप्तेजोवाय्वाकाशेषु पञ्चमूर्तिधारणं च (शाण्डि० १.८.२) ।

धारणाभिर्मनो धैर्यं याति चैतन्यमद्भुतम् । (योगचूडोप० ११०)

इत्यादिषूपनिषद्वचनेषु सैव प्रपञ्चिता । तया च निर्मूलितेऽहङ्कारे, निषूदिते रागद्वेषादिचक्रे, निरस्ते चाध्यासद्वये साधकस्य स्वात्मसर्वात्मसाक्षात्कारः सम्पद्यते । तेन तस्यात्मा स्वयं वर्धमानः सर्वात्मानं परात्मानञ्च प्रवर्धयति भुवने । यथा यथा देवः प्रादुर्भवति प्रकाशते च कस्मिन्नपि भक्तप्रवरे तथा तथा तेन देवस्य महिमाऽपि वरीवृध्यते ब्रह्माण्डमण्डलेऽस्मिन् । तदेवं देवो मानवश्च परस्परं यज्ञप्रक्रियया समेधयत इति आह स्वयं भगवान् वेदः —

१. या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा ।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः ॥

२. विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ॥

(ऋ० १०.८१.५-६)

३. याँश्च देवा वावृधुर्ये च देवान्त्स्वाहान्ये स्वधयान्ये मदन्ति ।

(ऋ० १०.१४.३)

४. अया वर्धस्व तन्वा गिरा ममाऽऽजाता सुक्रतो पृण ।

(ऋ० ८.१.१८)

अस्मद्रयग्वावृधानः सहोभिरनिभृष्टस्तन्वं वावृधस्व ॥

(ऋ० १०.११६.६)

५. शुभ्रं नु ते शुष्मं वर्धयन्तः शुभ्रं वज्रं बाह्वोर्दधानाः ।
शुभ्रस्त्वमिन्द्र वावृधानो अस्मे दासीर्विशः सूर्येण सह्याः ॥

(ऋ० २.११.४)

६. सा नो भूमि[1]र्वर्धयद् वर्धमाना । (अथर्व० १२.१.१३)

७. इध्मेन त्वा जातवेदः समिधा वर्धयामसि ।
तथा त्वमस्मान् वर्धय प्रजया च धनेन च ॥ (अथर्व० १९.६४.२)

---

१. पृथिवी देवता, अस्माकमन्नमयसत्ताया अधिष्ठात्री देवता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ अस्माभिः सुष्टुता गिरा संवर्धिताश्च देवा अस्मासु वर्धन्ते वर्धयन्ति चास्मान् इत्यत्र इमे निगमा अनुसन्धेयाः —

१. अग्ने स्तोमं जुषस्व मे वर्धस्वानेन मन्मना ।
प्रति सूक्तानि हर्य नः ।। (ऋ० ८.४४.२)

२. अयं होता प्रथमः पश्यतेममिदं ज्योतिरमृतं मर्त्येषु ।
अयं स जज्ञे ध्रुव आ निषत्तोऽमर्त्यस्तन्वा३ वर्धमानः ।।
(ऋ० ६.९.४)

३. ऋधङ् मन्त्रो योनिं य आ बभूवामृतासुर्वर्धमानः सुजन्मा ।
अदब्धासुर्भ्राजमानोऽहेव त्रितो धर्ता दाधार त्रीणि ।।
(अथर्व० ५.१.१)

४. त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय ।
त्वं नो देवतातये रायो दानाय चोदय ।। (ऋ० १०.१४१.६)

अतश्च वर्धयेम देवानित्युपदिशन्ति नो मन्त्रवर्णाः पदे पदे—

१. तमिमा ऋचस्तमग्निं वर्धयामसि । (ऋ० १.३६.११)
२. सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः । (ऋ० १.९१.११)
३. प्रेद्धग्निर्वावृधे स्तोमेभिर्गीर्भिः स्तोतॄणां नमस्य उक्थैः । (ऋ० ३.५.२)
४. सुतेसुते वावृधे वर्धनेभिर्यः कर्मभिर्महद्भिः सुश्रुतो भूत् ।
(ऋ० ३.३६.१)
५. पिबा वर्धस्व तव धा सुतासः । (ऋ० ३.३६.३)
६. भूरि नाम वन्दमानो दधाति···सुम्नमग्निर्वनते वावृधानः ।
(ऋ० ५.३.१०)
७. वैश्वानर सुष्टुतो वावृधानोऽग्ने यच्छ त्र्यरुणाय शर्म ।
(ऋ० ५.२७..२)
८. अमर्त्यं चिद् दासं मन्यमानमवाभिनदुक्थैर्वावृधानः । (ऋ० २.११.२)
९. तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि ।
बृहच्छोचा यविष्ठ्य ।। (ऋ० ६.१६.११)
१०. स मानुषीरभि विशो वि भाति वैश्वानरो वावृधानो वरेण ।
(ऋ० ७.५.२)
११. स्तुतश्चिदग्ने शृण्विषे गृणानः स्वयं वर्धस्व तन्वं सुजात ।
(ऋ० ७.८.५)
१२. यं त्वामिन्द्र न तुष्टुवुर्ऋषभो ये च तुष्टुवुः ।
ममेद् वर्धस्व सुष्टुतः ।। (ऋ० ८.६.१२)
१३. वर्धस्वा सु पुरुष्टुत ऋषिष्टुताभिरूतिभिः । (ऋ० ८.१३.२५)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१४. सा ते अग्ने शंतमा चनिष्ठा भवतु प्रिया ।
तया वर्धस्व सुष्टुतः ।। (ऋ० ८.७४.८)

अयमेव वैदिको भावो गीतायां--

देवान् भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ।। (३.११)

इति श्लोकेन उपश्लोकितः श्रीमद्भगवता । एवंविधेन देवमानवयोरन्योन्यभावनेन साधनायज्ञेन अहङ्कारकामनानिर्मूलने, रागद्वेषदलने तादात्म्याध्याससंसर्गाध्यासोत्सादने च समनुष्ठिते सर्वगतौ, सर्वश्रेष्ठौ श्वःश्रेयसौ च आत्मपरमात्मानौ जडदेहे जडजगति च तथा वर्द्धेते यथा ऊषरबालुकासु सुवसिते सितकुमुदे । सुरभितसुमनस्समुत्पादनाऽसमर्थास्विव सिकतासु यथाऽसम्भाव्यमाने अपि सितसुगन्धितकुमुदे वस्तुस्वाभाव्यात् समुद्भवतस्तथैव निर्गन्धनीरसान्नमयसत्ताया अध्यात्मसौरभभरितौ रससागरौ आत्मपरमात्मानौ प्रादुर्भूय स्वमहामहिमानं प्रकाशयतो महयतश्च—'शुष्काद् यद्देव जीवो जनिष्ठाः'—(ऋ० १.६८.२) इति दृष्टान्तदार्ष्टान्तिकयोरांशिकं धर्मसाम्यमनुसन्धेयम् ।

अथ अंहुभेद्या अविद्या इति पक्षे तु सर्वानर्थमूलाविद्याविनाशपूर्वकं रागद्वेषादिचौरान् (उप अवधीत्) उपादरे, सादरं सयत्नं सहर्षमिति यावत्, विनाशयति, सविलासामविद्यां विद्रावयतीति अर्थो योजनीयः ।

पससा—'पश (पस) बन्धने' (चु० उ० से०) इत्यतोऽसुन् औणादिकः । तदन्तात् तृतीयैकवचनम् ।

'पसधातुर्दन्त्यान्तः सौत्रो गत्यर्थः' इति माधवः । 'जपजभ०' (पा० ७.४.८६) इति सूत्रे 'पस' इति दन्त्यान्तत्वेन केचित् पठन्ति । सौत्रः 'पस'धातुश्च गत्यर्थोऽपि अत्र बन्धार्थो धातूनामनेकार्थत्वात्, गत्या अत्र बन्धात्मकगतेर्विवक्षितत्वात् तालव्यान्तचौरादिकस्य पाशयतेः बन्धनार्थकत्वाच्चेति दिक् ।

वस्या—अयमनयोरतिशयेन वसुरिति वसीयान् । 'वसु'शब्दादीयसुन् । 'वसीयस्' इति प्रातिपदिकात् परस्य प्रथमाद्विवचनस्य डादेश ईयसुन ईकारलोपश्च छान्दसौ । डित्वाट्टिलोपः ।

गर्दभौ—गर्दति शब्दयति आविष्करोति स्वीयसुगन्धम्, यद्वा प्रशब्दयति आह्वयति, आकारयतीव सुगन्धेन स्वसमीपवर्तिन इति गर्दभः पुष्पविशेषः, सिकतासमुद्भवं श्वेतकुमुदम् । 'गर्द शब्दे' (भ्वा० प० से०), शब्दनमाविष्कारो भाषणं वा, 'शब्द आविष्कारे' (चु० उ० से०), आविष्कारे अनुपसर्गात्, उपसर्गादाविष्कारभाषणयोरिति विवेकः । गर्दतेः 'कृ-शृ-शलि-कलि-गर्दिभ्योऽभच्' (उणा० ३.१२२) इत्यनेन अभच् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गर्दभं श्वेतकुमुदे गर्दभो गन्धभिद्यपि ।
रासभे गर्दभी क्षुद्रजन्तुरोगप्रभेदयोः ।। इति मेदिनी

गर्दभौ इत्यत्र लिङ्गव्यत्ययश्छान्दसः । यद्वा गन्धभेदवाचकस्य पुंल्लिङ्गस्य गर्दभशब्दस्य तद्वति प्रयोगः । अर्श आद्यच् ।

विश्वञ्चा —विषु विश्वतः अञ्चतः इति विष्वञ्चौ । 'विषु'शब्दे उपपदे 'अञ्चु गतिपूजनयोः' (भ्वा० प० से०) इत्यतः क्विन् । विभक्तेराकारः ।

यदल्पिका स्वल्पिका कर्कन्धूकेव पद्यते ।
वासन्तिकमिव तेजनं भंस आतत्य विद्यते ।।३।।

'यत्' यदा 'अल्पिका' अत्यल्पा 'स्वल्पिका' स्वल्पाल्पा, स्वल्पिष्ठा अपरा प्रकृतिरपि, तदङ्गभूता दम्भदर्पादिलक्षणा स्वल्पतमा आसुरी सम्पत्तिरपि 'कर्कन्धूका इव' 'बदरी'इत्याख्ययाऽऽख्यातः कण्टकिवृक्षक इव, बदरीणां गुल्ममिव तत्फलमिव वा 'पद्यते' निपतति, विशीर्यते विनश्यति वा तदा 'वासन्तिकं तेजनम् इव' वसन्तकालिकसूर्यं इव 'भंसः' आत्मतेज आत्मज्योतिर्वा 'आतत्य विद्यते' आततं विततं वा भवति, वितन्यते विततञ्चावतिष्ठते इत्यर्थः ।

इदमाकूतम्—अपराप्रकृतेः आसुरसम्पत्तेश्च स्वल्पोऽप्यंशो नावशेषणीयः स्वात्मनि । अपराप्रकृतिः पराप्रकृतौ आसुरी सम्पत्तिश्च दैवसम्पत्तौ परिणमनीया पूर्णतया । उत्तरोत्तरमपचीयमाना सा यदा क्षामक्षामा क्षयमुपैति कार्त्स्न्येन, निपतति बदरीगुल्मवत्, विशीर्यते बदरीफलवत् तदा दिव्यसम्पदः पराप्रकृतेश्च तेजो देदीप्यते आत्मगगने, विभ्राजते च आत्मज्योतिः साधकस्य रूपान्तरितदिव्यविग्रहे, तदीयचिन्मयदेहप्राणमनोमये दिव्यसत्त्वे ।

शीतर्तुजन्यहिमजाड्यमान्द्यशैथिल्यविपर्ययेण आत्मज्योतिर्नवनवोत्साहस्फूर्तिसंचारकारित्वात् वसन्तकालिकसूर्यस्य नवजीवनदायितेजसोपमितमिति बोध्यम् ।

कर्कन्धूका —कर्कं कण्टकं दधाति धारयतीति कर्कन्धूः । 'अन्दू-दृम्फू-जम्बू-कम्बू-कफेलू-कर्कन्धू-दिधिषूः' (उणा० १.९३) इत्यनेन कूप्रत्ययउपपदस्य नुगागमश्च निपात्येते । कित्त्वादाकारलोपः । कर्कन्धूशब्दाद् 'ह्रस्वे' (पा०५.३.८६) इत्यनेन ह्रस्वार्थे कन् । तदन्ताट्टाप् ।

पद्यते—'पद गतौ' (दि० आ० अ०) इत्यस्माल्लट्प्रथमपुरुषैकवचनम् । पद्यतिरत्र 'पत्लृ गतौ' इति धातुवत् अवपतनार्थकः, अवोपसर्गस्यार्थश्चात्रान्तर्भूतो द्रष्टव्यः ।

साकं जरायुणा पताव जरायु पद्यताम् । (अथर्व० १.११.६) इत्यत्र अवोपसृष्टस्य पद्यतेः पततिना समानार्थकत्वात् । आप्टेमहोदयैर्मोनियर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विलियम्स-महाशयैश्चापि वेदेऽस्य धातोः 'to fall down with fatigue, to perish' इति अर्थोऽभ्युपगम्यते। वस्तुतः अवाद्युपसर्गाणामर्था धातुष्वेवान्तर्गर्भिताः सन्तस्तत्तदुपसर्गेण अभिव्यज्यन्ते व्यञ्जनेन भोजनरसवत्, न तु योज्यन्ते सृज्यन्ते वा नूतनतया ।

भंसः—'भस भर्त्सनदीप्त्योः' (जु० प० से०) इत्यस्माच्छान्दसाद् धातोरौणादिकोऽसुन् (उणा० ४.१९०) । नुडागमश्छान्दसः । यद्वा भासतेरसुनि उपधाह्रस्वो नुडागमश्च छान्दसौ ।

यद् देवासो ललामगुं प्रविष्टीमिनमाविषुः ।
सक्थ्ना देदिश्यते नारी सत्यस्याक्षिभुवो यथा ॥४॥

'यत्' यदा 'देवासः' पूर्वमन्त्रत्रयप्रोक्तप्रकृतिरूपान्तरसाधनासुविजितात्मसाम्राज्या देवत्वमापन्ना देवमानवाः 'ललामगुम्' परमरमणीयश्रेष्ठचित्ररश्मियुक्तं 'प्रविष्टीमिनम्' प्र प्रकृष्टः, वि विशिष्टो विशालश्च स्तीम आर्द्रीभावः सर्वात्मैक्यभावेन सहजाऽऽत्मिकप्रेम-मैत्री-करुणा-मुदितास्वरूपस्तद्वन्तं कमपि हृत्पुरुषम्, अन्तरात्मशिशुं चैत्यशिशुं वा 'आविषुः' हृद्गुहाप्रवेशपूर्वकमवाप्य विज्ञाय च तं रक्षन्ति वर्धयन्ति चेत्यर्थः तदा 'सक्थ्ना' तेषां देवमानवानां समवायशक्त्या देवसंघशक्त्या वा तदन्तरे प्रबुद्धा 'नारी' देवी, आदिदेवी, देवमाता विश्वजननी अदितिः 'अक्षिभुवः सत्यस्य यथा' अक्षिभ्यां भवतः, प्रत्यक्षस्य सत्यस्य इव तस्य चैत्यशिशोर्विषये, संशयविपर्ययरहितस्यात्मतत्त्वस्य सम्बन्धे वा तान् 'देदिश्यते' भृशं दिशति उपदिशति तद्हृदयसिंहासनासीना, तेषां स्वकीयसाक्षात्कारं स्वप्रदत्तेनान्तःस्फुरितज्ञानेन सत्यापयन्ती समुपबृंहयन्ती चेति भावः ।

अयमभिसन्धिः—अपराप्रकृतिं विजित्य, आसुरीं सम्पदं परिभूय दैवीं सम्प्रकाश्य च मानवो देवो भवति, हृद्गुहागर्भं प्रविश्य स तत्र निगूढं निरुपमरमणीयं, परमवरणीयं वरेण्यं दिव्यशिशुमन्तरात्मानं हृत्पुरुषं वा विन्दति, विजानाति, तमालिङ्गति निजसमस्तसत्तया तं रक्षति वर्धयति च, प्रीयते परितृप्यति च तेन । मन्त्रगतस्य 'आविषुः' इति पदस्य मूलप्रकृतेः 'अव्'धातोः सर्वेऽप्येकोनविंशतिरर्था यथा परमपुरुषवाचके 'ओम्'पदे सङ्गमयितुं शक्यास्तथैव परमात्मनस्तस्य पराप्रकृतेश्चांशभूते प्रत्यगात्मन्यपि ते सर्वे चरितार्थयितुं पार्याः, जीवस्य पराप्रकृतेरंशभूतत्वात् (गीता १५.७,७.५), अन्तरात्मनश्च जीवस्य स्फुलिङ्गत्वात् । तेषु केचनास्माभिरत्र रेखाङ्कितपदैर्निर्दिष्टा दिशादर्शनाय । 'हृद्याकाशस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम्' (बृहदा० २.५.१०), 'किंज्योतिरेवायं पुरुष इत्यात्मैवास्य ज्योतिर्भवतीत्यात्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ॥ कतम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मेति योऽयं विज्ञानयय: प्राणेषु हृद्यन्तर्ज्योति: पुरुष: ...।।' (बृहदा० ४.३.६-७)। सोऽयं हृद्यन्तर्ज्योति: पुरुष: प्रविष्टीमी आत्मिकप्रेमकरुणादिभिरार्द्रतम:, प्रकृत्या सर्वभूतहितरत:। यदा सामूहिकयोगसाधका देवमानवा इमं हृत्पुरुषं साक्षात्कुर्वन्ति तदा तेषां समवायशक्त्या आवर्जिता परा प्रकृतिर्देवमाताऽदितिरपि (नारी) तेषां योगदृष्टिसमक्षं प्रादुर्भवति प्रददाति च तेभ्य: आत्मपरमात्मनो रहस्यज्ञानं येन तत् करबदरवद् हस्तामलकवच्च अप्रत्याख्येयप्रत्यक्षतां प्राप्य स्थिरीभवतु शाश्वततयेति दिक्।

अस्मिन् मन्त्रे प्रकीर्तिता नारी च परमपुरुषस्य परा शक्तिर्देवी अदितिरेव, वेदे नृ-नर-शब्दयोर्देवार्थे भूयसा प्रयुक्तत्वात्, नार्याश्च नरस्य देवस्यैव शक्तित्वात्। नारीवाचको 'ग्ना'शब्दोऽपि वेदे देवपत्नी (देवशक्ति) वाचकत्वेन प्रयुज्यते। तथा चाह यास्क:—'ग्ना गमनादापो देवपत्न्यो वा' (निरु० १०.४.४७)।

रथं ये चक्रु: सुवृतं नरेष्ठां ये धेनुं विश्वजुवं विश्वरूपाम्।

(ऋ० ४.३३.८)

इत्यत्र सा विश्वरूपा विश्वप्रेरिका (विश्वजू:) च अदितिर्धेनु: नरे पुरुषे परमपुरुषे परमदेवे वा तदीयशक्तित्वेन अवस्थानात् नरेष्ठा इत्युक्ता।

प्रति प्र याहीन्द्र मीळ्हुषो नॄन् मह: पार्थिवे सदने यतस्व।
अथ यदेषां पृथुबुध्ना स एतास्तीर्थे नार्य: पौंस्यानि तस्थु:।।

इत्यत्र प्रोक्ता नार्योऽपि पृथुबुध्ना विशालप्रतिष्ठा:, बृहदाधारा ऊर्ध्वा: पुरुषशक्तय एव, अन्यथा अर्थाऽनुपपत्ते:। ऋग्वेदे १.२८ सूक्तस्य 'यत्र नार्यपच्यवमुपच्यवं च शिक्षते' (ऋ० १.२८.३) इत्यादिमन्त्रस्य व्याख्यां 'यत्र यस्मिन् यज्ञे नारी नरस्य मनुष्ययजमानस्य पुरुषस्य देवस्य वा पत्नी शक्तिरित्यर्थ:' इत्यादि कुर्वाणा: श्रीकपालिशास्त्रिणो वेदस्य गुह्यविवृतौ नारीशब्दस्यार्थं 'पुरुषस्य देवस्य वा पत्नी शक्ति:' इत्येव स्वीकुर्वते। अस्य सूक्तस्य व्याख्यायां—'अधिषवणफलकार्थे उलूखलशब्दो मुसलार्थे ग्रावेति च व्याख्यातव्यमवश्यमासीत् पूर्वेषां कर्मणि विनियोगाय। ...सत्यपि भेदे चमसाधिषवणफलकानाम् औपचारिक: प्रयोग इतिकृत्वा व्याख्यानमवश्यमभवत्' अगतिकतया असङ्गतिदूषणभिया च (विस्तरार्थं श्रीकपालिशास्त्रिविरचितवेदगुप्तार्थसिद्धाञ्जनभाष्यस्य पृ० २८५-२८८ द्रष्टव्यानि)। किन्तु उलूखलादिशब्दानां गूढार्थेऽङ्गीकृते 'नारी'पदस्य पुरुषशक्तिपरकत्वे चाभ्युपेते सर्वं हृद्यमनवद्यञ्चोपपद्यते समर्पितरहस्यविद्यं सकललोकवन्द्यं देवकाव्यम् इति दिक्।

अथ 'प्रथमशस्त्रं बीजस्थानीयं, द्वितीयं प्राण:, तृतीयं शिशुशरीरं जीवात्मस्थानीयं, तथा च बीज-प्राण-शरीरात्मसम्पादनद्वारेण शिशुशरीरं जनयामासु:,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पश्चाद् एवयामरुदाख्येन प्रतिष्ठाहेतुना शस्त्रेण तदीयप्रतिष्ठापनेन स्थिरीकरणेन तं ररक्षुश्च' इत्यभिप्रायको यः 'शस्त्र'प्रपञ्चः ऐतरेयब्राह्मणे ३०.१-४ (६.२७-३०) खण्डेषु विहितः स वेदमन्त्राणां गूढार्थे चैत्यशिशोर्जन्माभिवर्धनरक्षणार्थकतया व्याख्यातव्यो ब्राह्मणादिश्रौतग्रन्थवाक्यानामाध्यात्मिकाधिभौतिकाधिदैविकाख्यत्रिविधार्थसमर्पणक्षमत्वात् अर्थत्रितयस्य विवक्षितत्वाच्च ।

ललामगुम्—ललति, लालयते लल्यते च इति ललामम् । 'लल ईप्सायाम्' (चु०आ०से०) इत्यत औणादिकोऽमच् बाहुलकात् (उणा० ५.६८) । दीर्घोऽपि बाहुलकादेव, 'पृषोदरादीनि यथोपदिष्टम्' (पा० ६.३.१०९) इति नियमस्य समासपदविषयकत्वाद् (द्र० सिद्धान्तकौमुदी, तत्त्वबोधिनीव्याख्या) । यद्वा लडनम् (ललनम्) एव लल । 'लड विलासे' (भ्वा०प०से०) इत्यस्माद् भावे 'सम्पदादिभ्यः क्विप्' इति वार्तिकेन क्विप् । डलयोरभेदात् डस्य लः । ललम् अमति इति ललामः । 'लल्'शब्दे उपपदे 'अम् गत्यादौ' (भ्वा०प०से०) इत्यतः 'कर्मण्यण्' इति अण् । उपधावृद्धिः । 'ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु' इत्यमरः । ललामाः प्रधानाः, श्रेष्ठाः, सुभगा गावः चिद्रश्मयो ज्ञानार्चिषो वा यस्य तमिति बहुव्रीहिः ।

प्रविष्टीमिनम्—प्र-वि-पूर्वात् 'ष्टीम् आर्द्रीभावे' (दि०प०से०) इत्यस्माद् भावे घञ् । प्रविष्टीमोऽस्यास्तीति तम् । मत्वर्थीय इनिः (पा० ५.२.११५) ।

आविषुः—अवतेर्लडर्थे लुङ् । प्रथमपुरुषबहुवचनम् । वर्धनार्थेऽवतिरन्तर्भावितण्यर्थो ग्राह्य इति विवेकः ।

सक्थना—सजतीति सक्थि । 'षञ्ज सङ्गे' (भ्वा०प०अ०) इत्यस्मात् क्थिन् औणादिकः (उणा० ३.१५४) । कित्त्वान्नलोपः ।

वैदिकपदानां यौगिकत्वात् 'सक्थि'पदं दृढसङ्गितां, सङ्घशक्तिं समवायशक्तिं चाह ।

यद्वा 'षच समवाये' (भ्वा०उ०से०) इत्यतः औणादिकः क्थिन् बाहुलकात् ।

महानग्न्यतृप्नद्वि मोक्रददस्थानासरन् ।
शक्तिं कनीना खुद मध्यमं सक्थ्युद्यतम् ॥ ५ ॥

'अग्नी' अन्नप्राणमनोमयत्रिवृद्भौतिकसत्तायामवस्थितं परमात्माग्नेर्नाचिकेतस्य त्रिवृद्रूपमेकोऽग्निः हृद्गुहानिहित आत्माग्निः परमात्माग्निर्वा द्वितीय इति अग्निद्वयमेव अत्र 'अग्नी' इति पदेनाभिहितं बोध्यं गुह्यार्थे, इमावग्नी 'महान्' महान् साधको योगी वा 'वि अतृप्नत्' विशेषेण तर्पयेद् योगविधिनेति शेषः । 'अस्थाना' अस्थाने, कृच्छ्रबहुले, अप्रशस्ते, साधनानुष्ठानविरुद्धे प्रदेशे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'आसरन्' आ समन्तात् सरन् गच्छन् विचरन् वा, तादृशप्रदेशं विधिवशात् प्राप्य तत्र निवसन् विचरंश्चापि 'मा उ रुदत्' नैव व्याकुलीभवेत्। यतः 'कनीना' परमकमनीया, ज्योतिष्मती, चतुर्थमन्त्रोक्ता नारी, आदिदेवी महाशक्ति-र्भुवनाम्बिका 'उद्यतम्' तादृशमहासाधकैर्गभीरगुहागर्भाद् उद्यम्य उन्नमय्य आविष्कृतं, प्रकाशितं, हृदयस्य पुरोभागे, उपरिपृष्ठे प्रतिष्ठापितं 'सविथ' सामूहिकयोगसाधनया करणभूतया समवायशक्त्या संघशक्त्या वा उपलक्षितं 'शक्तिं' प्रत्यक्षशक्तिस्वरूपं शक्तिमन्तं वा, लुप्ततद्धितप्रयोगः, 'मध्यमम्' मध्ये सत्तायाः केन्द्रे हृदयगर्भे भवं मध्यमं, साधकानां योगिनां वा हृन्मन्दिरमध्यमध्या-सीनं तं ललामगुं हृत्पुरुषं 'खुद' खुदति संवृणोति, संगोप्य सुरक्षति, विरोधि-शक्तीनां विरुद्धवातावरणस्य वा आक्रमणादिति शेषः।

मन्त्रस्यास्य प्रथमपदं 'महा-नग्नी' इति समस्तपदं न तु पदद्वयम्। तच्च अथर्ववेदस्य चतुर्दशकाण्ड-प्रथमसूक्त-षट्त्रिंशमन्त्रगतपदस्य 'महानघ्न्याः' इत्यस्य मूलप्रातिपदिकात् 'महानघ्नी' इत्यततोऽभिन्नम्, तस्य पाठभेदमात्रत्वात इति पदवाक्यप्रमाणपारावारपारीणा वैदिकपदानुक्रमकोषकारा विपश्चि-दपश्चिमाः श्रीविश्वबन्धुशास्त्रिणः (द्र० चतुर्थः खण्डः, पृ० २४६८)। तथात्वे इयमर्थयोजना द्रष्टव्या—

'महा-नग्नी' महा + न + घ्नी, महती चासौ अविनाशिनी च, 'हन हिंसागत्योः' इत्यस्य धातोः हिंसा-ज्ञान-गमन-प्राप्त्यर्थकत्वाद् अगमा, अजरामरा अक्षरा च पूर्वमन्त्रोक्ता नारी महाशक्तिरादिदेवी अदितिः 'वि अतृप्नत्' तं ललामगुं चैत्यशिशुं विशेषेण तर्पयति। शिष्टं समानम्।

इदमाकूतम्—महा+न+घ्नी इत्येवं व्युत्पन्नेन 'महानग्नी'पदेन महती अघ्न्या अदितिर्धेनुर्ध्वन्यतेऽसन्दिग्धम्। पदमिदं पूर्वमन्त्रोपन्यस्तं नारीपदं परा-मृशति, विशिनष्टि, विशदीकरोति व्याचष्टे च तद्व्यापारेण द्वितीयतृतीय-चतुर्थचरणेषु विशदतया विवृतेन। वेदेऽस्या अदितिधेनोः स्वरूपमनेकत्र सन्दृब्धम्। 'रथं ये चक्रुः सुवृतं नरेष्ठां ये धेनुं विश्वजुवं विश्वरूपाम्,' 'निश्चर्मणो गामरिणीत धीतिभिः', 'तक्षन् धेनुं सबर्दुघाम्' इत्यादिष्वार्भवमन्त्रेषु (ऋ० ४. ३३.८, ४.३६.४, १.२०.३) तस्या नरेष्ठायाः परमदेवस्थायाः, विश्वरूपायाः, विश्वप्रेरिकाया अमृतदुघायाः (विश्वजुवः, अमृतसुवः) धेनोस्तक्षणं निर्दिशता भगवता वेदेन इदमावेदितं भवति—देवमातुरदितेरेव पुत्र आत्मा मनुष्यस्य। वियुक्तोऽसौ स्वमातुः प्रज्ञायां चेतनायाञ्च। तत्र च देहावरणं चर्मैव हेतुर्भवति। तामावृण्वानं तच्चर्म अपावृत्य अपोद्धृत्य वा ऋभवस्तां तक्षणुवन्ति, संस्कुर्वन्ति आविष्कुर्वन्ति वाऽस्मासु। तस्य चर्मणश्च तमोमयत्वात् प्रकृतिकार्यत्वात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तमोगुणोपक्षपणम् अस्य सूक्तस्य प्रथममन्त्र एवोपदिष्टम् ।

प्रकृतमन्त्रे 'कनीना'पदेन गुह्यभाषया यदुक्तं तदेव 'ज्योतिष्मतीमदितिं धारयत् क्षितिं स्ववतीमा सचेते दिवेदिवे जागृवांसा दिवेदिवे' 'क आदित्यां अदितिं ज्योतिरीट्टे' इत्यादिऋक्षु (१.१३६.३,४.२५.३) सुस्पष्टमुदीरितम् । ततश्च सा विश्वजनीना, विश्वजननी, सर्वतातिः, अनागा गौरदितिर्देवी, अध्येषणीया, आह्वातव्या, न च जातु हातव्या विहातव्या वेति कीर्तितं शतशः मन्त्रेषु । तद्यथा—

'प्र पस्त्यामदितिं सिन्धुमर्कैः स्वस्तिमीळे सख्याय देवीम् ।'
'प्रातर्देवीमदितिं जोहवीमि मध्यन्दिन उदिता सूर्यस्य ।'
'आदित्येभिरदितिं विश्वजन्याम् (आ वह)'
'आ सर्वतातिमदितिं वृणीमहे'
'माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः ।
प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॥'
'वचोविदं वाचमुदीरयन्तीं विश्वाभिर्धीभिरुपतिष्ठमानाम् ।
देवीं देवेभ्यः पर्येयुषीं गामा मावृक्त मर्त्यो दभ्रचेताः ॥'
(ऋ० ४.५५.३,५.६९.३,७.१०.४,१०.१००.१-११,८.१०१.१५-१६)

अथ यदि दिगम्बरापरपर्यायो 'नग्न'शब्दः कृतङीष्प्रत्ययः महानग्नी-पदस्योत्तरपदत्वेनाभ्युपेयेत तदापीष्टापत्तिरेवास्माकम् । विश्वसर्जनात् पूर्वं विश्वजननी निष्प्रपञ्चपटा, विश्ववसनाऽनावृता, निर्वसना, दिगम्बरेव भवति लाक्षणिकतया । 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इति भगवद्वच-नात् विश्वलीलाविलासविस्तारेऽपि पुरुषोत्तमस्य एकांशेनैव, अनन्तस्य सूक्ष्मातिसूक्ष्माकलनीयकलयैव विष्टपेऽवस्थानात् तदीयशक्त्याः पराप्रकृतेरदिते-रपि एकया क्षोदिष्ठकलयैव अत्र अवस्थानं प्रसिद्ध्यति । तेन च प्रवर्तमानेऽपि प्रपञ्चव्यापारे सा भूयिष्ठांशेन नग्ना, निर्वसना दिगम्बरा वा संसृतिवासो-विरहितत्वात् । दुर्गाया दिगम्बरीत्वञ्चाध्यात्मिकेऽर्थे विश्ववितानशून्यत्वे सति केवलीत्वमेव । विश्वम्भरस्य विश्वम्भरायाश्च वसनमेवेदं विश्वमिति यजु-र्वेदस्यान्तिमाध्यायस्य प्रथममन्त्रगत'वास्य'पदेन द्योत्यते । तथा चाहुः श्री-अरविन्दपादास्तद्व्याख्यायाम्—'वास्यम् इति पदस्य त्रयः भावाः सम्भाव्यन्ते— आच्छाद्यम्, वस्त्रवत् परिधेयम्, निवास्यं च इति । ......अस्मिन् मन्त्रे जगद् अन्तर्यामिने ईशित्रे चात्मने वस्त्रमिव तस्य निवासस्थानमिव वा प्रति-बिम्बितम् । अनयोर्द्वितीयोऽर्थः उपनिषदो विचारेण सह सङ्गततरः ।' (Cent. Vol. 12, p. 63)

अथ 'महान् अग्नी' इति पदपाठे समुपात्ते मन्त्रस्य तात्पर्यमेवं पर्यवसेयम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव' (कठोप० ५.९) इत्युपनिषद्वचनानुसारेण स एक एव परमात्माग्निः प्राणिमात्रं पदार्थमात्रं च सृष्ट्वा प्रत्येकमनुप्रविष्टः। स एव—

प्र ते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन्।
अनन्तलोकाप्तिमथो प्रतिष्ठां विद्धि त्वमेतं निहितं गुहायाम्॥
(कठोप० १.१४)

अस्मिन् श्लोके 'स्वर्ग्यः', अनन्तलोकप्राप्तिकारकः, विराड्रूपेण जगतां प्रतिष्ठा अन्तर्यामितया च हृद्गुहानिहितश्च इत्येवमुपवर्णितः। प्रकृतमन्त्र-निर्दिष्टयोरग्न्योः स एकः। अपरश्च स एव अन्न-प्राण-मनोभूमिकासु धृत-त्रिवृद्रूपः 'त्रिणाचिकेतस्त्रिभिरेत्य सन्धिम्', 'त्रिणाचिकेतस्त्रयमेतद् विदित्वा' (कठोप० १.१७-१८) इति श्लोकयोः 'त्रि'पदेन विवक्षितः। इमौ द्वावपि महान् साधकः तर्पयेद्, यथाविधि परिपुष्य विकासं नयेत् सविशेषम्। तर्पिताग्निश्च नैव बिभियाद् देशतः कालतो वा, स्थानविशेषादवस्थाविशेषाद्वा, परिवेशात् परिसराद् वा, पारिपार्श्विकवातावरणाद् वा। अकिञ्चित्करं हि तदखिलं परमकमनीयमहाकालीकवचावृतस्य, समवेतसाधनया सम्बुद्धहृदयेश्व-रस्य साधकवरिष्ठस्येति दिक्।

महानग्नी—न हन्तुं विशसितुं, गन्तुं, ज्ञातुं, प्राप्तुं वा शक्येति नघ्नी। नञ्पूर्वाद् हन्तेः 'कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्' (पा० वा० ३.२.५) इत्यनेन कप्रत्ययः। धातोरुपधालोपो ह्रस्य घश्च। घकारस्य व्यत्ययेन गः। स्त्रियां ङीप्। महती चासौ नग्नी चेति महानग्नी।

'नग्नी' निर्वसना इत्यर्थे तु 'ओणजी व्रीडायाम्' इति धातोर्निष्पत्तिर्द्रष्टव्या। नजते इति नग्नी। 'ओलजी (ओणजी) व्रीडायाम्' (तु० आ० से०) इत्यतः कर्तरि क्ते, ईदित्त्वान्निष्ठायामिण्निषेधे, ओदित्त्वात् निष्ठानत्वे, कुत्वे स्त्रियां ङीषि च रूपम्।

श्रीपाणिनिमुनिप्रणीते धातुपाठे 'ओलजी ओलस्जी व्रीडायाम्' (१३९१-९२) इत्यनयोरेव पाठात् 'नग्न'शब्दोऽपाणिनीय इति केचित्। क्षीरस्वामि-नस्तु अमरटीकायां 'नग्ननग्निका'शब्दव्याख्याने 'नजते नग्ना, ओणजी ओलजी व्रीडे' इत्याहुः। 'ओलजी व्रीडायाम्'- 'अयं तवर्गपञ्चमादिः इति चान्द्राः' इति माधवीयधातुवृत्तौ। एवमेव 'ओलस्जी व्रीडायाम्' इत्येतमपि चान्द्राः तवर्गपञ्चमादिं मन्यन्ते। 'आत्रेय-मैत्रेय-स्वामिसम्मताकारशाकटायनादयः सर्वे यणादिमेवाहुः। नग्नशब्दस्तु पृषोदरादित्वाद् व्यत्ययेन इति मैत्रेयः' इति धातुवृत्तेर्ज्ञायते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्थाना—'सुपां सुलुक्०' इत्यनेन सप्तम्येकवचनस्याकारः ।

खुद—'खुड संवरणे' (तु० प० से०, कुटादिः) इत्यस्माल्लडर्थे लोट् छान्दसः, डकारस्य दकारश्च ।

महानग्न्युलूखलमतिक्रामन्त्यब्रवीत् ।
यथा तव वनस्पते निघ्नन्ति तथैवति ॥६॥

'महानग्नी' महासाधकस्य महायोगिनो वा हृन्मन्दिरे प्रकाशिता पूर्वोक्ता-ऽजरामराऽगमा, केवली, दिगम्बरी दुर्गा देवी 'उलूखलम्' तस्य देहं देहात्मबुद्धि-मिति भावः 'अतिक्रामन्ती' उल्लङ्घयन्ती, तं तत्पारं नयन्तीति यावत् 'अब्रवीत्' कथयति तम् उलूखलं प्रति—'वनस्पते' वनस्पतिर्वृक्षः उलूखलस्य प्रकृतिः, तस्य वृक्षविकारत्वात्, कार्ये कारणशब्दोपचारः, अत्र च वनस्पतिशब्दो दारुमये उलूखले तल्लक्षिते शरीरे चोभयोर्वर्तते, हे उलूखल! धान्यादिकण्डनपात्र-विशेष! 'यथा' यद्वत् 'तव' त्वयि 'निघ्नन्ति' धान्यादिकं नितराम् आघ्नन्ति, निरन्तराऽवहननेन च तस्य तुषादिकमपनीय अन्नसारं गृह्णन्ति 'तथा' तद्वत् 'एवति' ज्ञाने, निमित्तसप्तमी, ज्ञाननिमित्तं ज्ञानार्थे वा सारभूतात्मनो ज्ञानार्थं, पञ्चकोषेभ्यो निष्कृष्य पृथक्करणार्थञ्च अन्नमयादिपञ्चकोषात्मके देहोलूखले पुनः पुनराघातं मन्थन-मनन-मीमांसनादिरूपं कृत्वा सारभूत आत्मा निष्कृष्यते ।

अपि वा 'महान्' महासाधको महायोगी वा 'अग्नी' अग्निभ्यां पूर्वमन्त्रो-क्ताभ्यां करणाभ्याम् 'उलूखलम् अतिक्रामन्ती' देहं देहात्मबुद्धिमित्यर्थः अतिक्रामन् उल्लङ्घमानस्तम् 'अब्रवीत्' ब्रवीति इत्यादि पूर्ववत् ।

अयमभिप्रायः—वेदस्यान्तरर्थे उलूखलम्, कलशम्, द्रोणम्, चमसः, चमूश्चमं च शरीरवाचकान्येवेति तत्तत्स्थलसमीक्षणेन सम्यगुपपादयितुं शक्यम् । तत्र प्रकृतम् 'उलूखल'पदम् ऋग्वेदे प्रथममण्डलस्याष्टाविंशसूक्त एव प्रयुक्तं षड्वारम् । सूक्तमिदम् अञ्जःसवाख्ये सोमयागे विनियुक्तम् । 'अञ्जसा ऋजुना मार्गेण इष्टिपशुसाङ्कर्यमन्तरेण सवः सोमाभिषवो यस्मिन् यागे सोऽञ्जः-सव' इति ऐतरेयब्राह्मणभाष्ये सायणः । अभिषवविधिश्चायम्—आदौ ग्राव्णा सोम आहन्यते, ततः तस्य रसोऽधिषवणफलकयोर्निष्पीड्यते, तदनु स दशा-पवित्रेण शोध्यते, अथ सुनिष्पन्नोऽसौ सोमो द्रोणकलशे संस्थाप्यते । अन्ते होमो-ऽनुष्ठीयते । तस्यानुष्ठानञ्च अग्नावेव इति नैष नियमः, अप्स्वपि विहितोऽयं होमः । अयं सर्वोऽपि क्रमोऽन्तर्यागे सुघटः बहिर्यागेऽस्य सूक्तस्य विनियोगे तु अर्थयोजना नैव ऋज्वी । बाह्ये सोमयागे प्रयुज्यमानो ग्रावा खलु नैव मुसलः, न वा उलूखले सोमाभिषवः क्रियते, प्रत्युत अधिषवणफलकयोः । मुसलोलूखल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोगो वैदिकयागे धान्यावघातादावेव । अभिषवणार्थं ग्रावा एव प्रयुज्यते न मुसलः । अत एव अस्य (ऋ० १.२८) सूक्तस्य कर्मणि विनियोगाय अधिषवणफलकार्थे उलूखलशब्दः प्रयुक्तो बोध्यो मुसलार्थे ग्रावेति च यथाकथञ्चिद् व्याख्यातव्यमभवत् प्राचाम् । सप्तम्यामष्टम्यां च ऋचि 'वनस्पती' इति द्विवचनान्तप्रयोगात् मुसलोलूखले इति प्रोचुः पूर्वे कर्मकाण्डीयव्याख्यार्थम्, अन्यथाऽर्थासङ्गतेः । नवममन्त्रे चम्वोरिति पदस्य विवृतौ सत्यपि भेदे चमसाधिषवणफलकानाम्, 'औपचारिकोऽयं प्रयोग' इति मत्वा व्याख्यानं कर्तव्यमभवत् अगतिकतया । एषां पदानामन्तरर्थे तु न भवति कोऽपीदृशः क्लेशः । तेन च गूढार्थस्यैव प्राधान्यमभिमतमृषीणाम् अस्मिन् सूक्ते इति पर्यवसीयते । अस्य अन्तर्यागपरकोऽर्थ एव सरलः स्वाभाविकश्च । तस्मिन्नर्थे च उलूखलेन देहो लक्ष्यते । उलूखलञ्च वनस्पति(वृक्ष)विकारत्वात् वनस्पतिरपि अभिधीयते कारणे कार्यलक्षणया । देहोऽपि कन्दमूलफलादिवनस्पतिपरिणामत्वाद् वनस्पतिपदवाच्यो भवति सुतराम् । उलूखलम् अन्नमयप्रकृतिकार्यत्वाद् अन्नमयदेहं लक्षयेत् सुतरामिति किमु वाच्यम् । इदमन्नमयकोषलक्षकमुलूखलञ्च पञ्चकोषोपलक्षकम् । साधकस्य अन्तःस्था शक्तिरदितिदेवी तं कोशपञ्चकमतिक्रमय्य उलूखलदृष्टान्तेनोपदिशति––हे वनस्पते ! प्राणमयादिकोषचतुष्टयाधारान्नकोषप्रतिष्ठितपुरुष ! यथा धान्यादिकमुलूखले निक्षिप्य, पुनः पुनराहत्य, निस्तुषं कृत्वा तस्य सारो निष्कृष्यते तथैव तुषादिकल्पं कोषपञ्चकं निर्मुच्य तन्मध्यात् सारभूतमात्मानं निष्कृष्य पृथक्कर्तुं पुरुषार्थपरो भव अविरतम् । अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या (योगदर्शनम्, साधनपादः ५) इति योगसूत्रे परिभाषितां सत्यात्मतत्त्वतुषायितामविद्यां विद्रावयितुं नित्यानित्यात्मानात्मविचारलक्षणमाहननं कुरुष्व देहोलूखले, समुद्धर च स्वात्मसारं सम्मदरसात्मकं सत्स्वरूपममृतमयात्मानम्, 'तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण' इत्युपनिषत्-(कठोप० २.३.१७)-प्रदर्शितपद्धया, सम्पद्यस्व च 'पञ्चकोशविवर्जितः । निर्विकल्पस्वरूपात्मा' तेजोबिन्दूपनिषत्(४.७५)-प्रदत्तोपदेश-मूर्तंनिदर्शनस्वरूपः ।

अत्रेदमवधेयम्—अस्य मन्त्रस्य पदपाठे 'अतिक्रामन्ति' इति लट्प्रथमपुरुषबहुवचनरूपं तिङन्तं पदं पठन्ति श्रीपण्डितक्षेमकरणदासत्रिवेदिनोऽथर्ववेदभाष्यकाराः । पाठान्तरप्रचुराणि किल कुन्तापसूक्तानि । 'अतिक्रामन्ति' इति पाठभेदेऽभ्युपेते 'महान् अग्नी महानग्नी वा उलूखलम् अतिक्रामन्ति' इत्येवमात्मकेऽन्वये वचनव्यत्ययः शरणीकरणीयः ।

व्याकरणम्

एवति—'इवि व्याप्तौ', व्याप्तिः सर्वतो गतिर्ज्ञानं, गमनं प्राप्तिश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(भ्वा० प० से०) इत्यतो वर्तमाने पृषद्बृहन्मह०' (उणा० २.८५) इत्यनेन अतिर्बाहुलकात्। नकारलोप उपधाया गुणश्च। 'एवत्'शब्दात् सप्तम्येकवचनम्।

यद्वा, अवतेरतिप्रत्ययः। अकारस्यैकारः। एकोनविंशत्यर्थकोऽवतिरत्र अवगमार्थको ग्राह्यः।

महानग्न्युप ब्रूते भ्रष्टोथाप्यभूभुवः।
यथैव ते वनस्पते पिप्पति तथैवति ॥७॥

'महानग्नी' महाशक्तिर्जगदम्बा 'उप ब्रूते' उपेति सामर्थ्ये आचार्यकृतो च, साधकस्य बलोत्साहसामर्थ्यानि संवर्धयन्ती उपदिशतीत्यर्थः, 'वनस्पते' हे अन्नमयकोषाधिष्ठित पुरुष! त्वं 'भ्रष्टः' 'भ्रस्ज पाके'+क्तः, भृष्टः परिपाकमुपेतः, प्रौढिमापन्नः, साधनायां परिनिष्ठितः, तप्ततनुः सञ्जातः,. 'अथ अपि' अपि च 'अभूभुवः' न भवतीति अभूः, कर्तरि क्विप्, अभुवम् असम्भवम्, अभूतपूर्वरूपं वा भावयतीति तथाभूतोऽसि, अर्थात् त्वम् असाध्यप्रायमपि लक्ष्यं सिद्धमकरोः, यद्रूपस्त्वं पूर्वं नासीः तद्रूपं स्वात्मानम् अभावयः साधनाबलेनेति भावः। 'वनस्पते' शब्दोऽयं द्विरन्वीयते, हे उलूखल! 'यथैव' यद्वदेव 'ते' तव, त्वयि, विभक्तिव्यत्ययः, 'पिप्पति' पिपर्ति, पूरयति पुमान् धान्यादिकम् अवहननीयं द्रव्यं सारनिष्कर्षणार्थं 'तथा' तद्वदेव साधकः 'एवति' ज्ञाननिमित्तं प्राणमनसोराधारे देहोलूखले पञ्चतयीः क्लिष्टाक्लिष्टवृत्तीः, हेयोपादेयविषारान् सर्वविधसंस्कारांश्च सम्पूर्य तन्मन्थनमननादिद्वारा हेयं निरवशेषं विहाय उपादेयमुपाददानः पिपर्तु पूरयतु आत्मकोषं सर्वाङ्गीणपरिपूर्णतोपलब्धये परिपूर्णात्मसिद्धये वा।

उलूखलं प्रति सम्बोधिते अस्मिन्नुत्तरार्धे उलूखलदृष्टान्तेन देहोलूखलाधिष्ठातारं पुरुषं प्रति क्रियमाणः जगदम्बोपदेशः कान्तासम्मितप्रियोपदेशायते।

अथवा, 'महान्' महासाधकः 'अग्नी' पूर्वोक्तमग्निद्वयं प्रति 'उपब्रूते' उपेत्यादरे, आदरपूर्वकमाचष्टे, युष्मत्साहाय्येन अहं 'भ्रष्टः' लब्धपरिपाकः संवृत्तः 'अभूभुवः' अभूतपूर्वरूपान्तरं च सम्प्राप्तः। शिष्टं समानम्। तत्र 'महानग्नी'स्थाने महासाधकः वनस्पतिं सम्बोध्य ब्रूते इति विशेषः। अस्मिन् पक्षेऽपि सुयोजनोऽयं मन्त्र इति न पृथक् प्रपञ्च्यते पिष्टपेषणत्वात्।

अथवा 'अभूभुवः' इति पदमेवं व्याख्येयम्—हे पुरुष! त्वं 'न भूत्वा शरीरपातेऽदर्शनं प्राप्य भुवः पुनर्भवसि पुनः पुनर्जन्म लभसे', हृदयङ्गमश्चायमर्थः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'न हन्यते हन्यमाने शरीरे', 'नायं भूत्वाऽभविता वा न भूयः', 'अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे । रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ।।' 'भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते । रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ।।' (गीता २.२०,८.१८-१९) इत्यादिशास्त्रवचनानामेकेनैव पदेन तात्पर्यसमर्पणात् ।

अयमभिसन्धिः—प्रकृतसूक्तस्य चतुर्थमन्त्रे या 'नारी' इति पदेन व्यपदिष्टा सा चतुर्दशमन्त्रपर्यन्तं निरवच्छिन्नं चर्च्यमाना उत्तरोत्तरं सुनिर्दिष्टस्वरूपा सम्पद्यते इति सम्प्रेक्षितं स्यात् प्रेक्षावद्भिर्विपश्चित्पाठकैः । षष्ठे मन्त्रे जगदम्बाबलेन योगिनो देहाद्यात्मबुद्धेरतिक्रमणम् आत्मानात्मविवेकख्यातिं च सङ्कीर्त्य सप्तमे तस्या एव प्रसादेन तस्य विवेकप्रज्ञापरिपाको दिव्यरूपान्तरलाभ आत्मपरिपूर्णताश्चोपवर्णिताः । पातञ्जलयोगदर्शने 'योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः' (साधनपादः २८) इति सूत्रेण या विवेकख्यातिर्योगसाधनाफलत्वेन उपगीता तस्या वैदिकमूलमस्मिन् मन्त्रे अपि च—

सुविज्ञानं चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते ।
तयोर्यत् सत्यं यतरद् ऋजीयस्तदित् सोमोऽवति हन्त्यासत् ।।
(ऋ० ७.१०४.१२)

चित्तिमचित्तिं चिनवद्वि विद्वान् पृष्ठेव वीता वृजिना च मर्तान् ।
राये च नः स्वपत्याय देव दितिं च रास्वादितिमुरुष्य ।।
(ऋ० ४.२.११)

इत्यादिमन्त्रेषु च द्रष्टव्यम् । अथ 'कायेन्द्रियाणामन्यजातीयपरिणतानाम्' 'जात्यन्तरपरिणामः प्रकृत्यापूरात्' (यो० द०, कैवल्यपादः २), 'पूर्वपरिणामापाय उत्तरपरिणामोपजनस्तेषामपूर्वावयवानुप्रवेशाद् भवति' इति व्यासभाष्यसुभूषिते योगदर्शने यो दिव्यरूपान्तरनिर्विशेषो जात्यन्तरपरिणामो निरूपितो यश्च विष्णुपुराणे—

मेधा स्मृति तितिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतम् ।
मूर्तिः सर्वगुणोत्पत्तिर्नरनारायणावृषी ।।

इति श्लोके धर्मस्य मूर्तिनामकशक्त्या, सकलदुर्गुणनिरासपूर्वकल्याणगुणगणोत्पादक-दिव्य-रूपान्तर-शक्त्या नरनारायणऋष्योः प्रादुर्भूतिं देवमानवोत्पत्तिं वा प्रतिपादयता भगवता वेदव्यासेन प्रत्यक्षदृष्टान्तरूपेण निदर्शितः तस्य वैदिकोत्सोऽस्मिन् मन्त्रे 'अभूभुवः' इति पदे अपि च—

मनुष्वत् त्वा निधीमहि मनुष्वत् समिधीमहि ।
अग्ने मनुष्वदङ्गिरो देवान् देवयते यज ।। (ऋ० ५.२१.१)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनुर्भव जनया दैव्यं जनम् ॥ (ऋ० १०.५३.६)

मनुष्वदग्ने अङ्गिरस्वदङ्गिरो......अच्छ याह्या वहा दैव्यं जनम् ॥
(ऋ० १.३१.१७)

यो अग्निं देववीतये हविष्माँ आविवासति । (ऋ० १.१२.६)

त्वमग्ने सहसा सहन्तमः शुष्मिन्तमो जायसे देवतातये रयिर्न देवतातये ।
(ऋ० १.१२७.६)

इत्येषु देवत्वस्य वीतिं, प्रजनं, प्रादुर्भावं, दैव्यं जन्म, देवत्वस्य विस्तारं च वर्णयत्सु ऋङ्मन्त्रेषु द्रष्टव्यः ।

अतितरां हृदयङ्गमं खलु प्रकृतमन्त्रस्य 'अभूभुवः' इति पदम् । न भवतीत्यभु असम्भवप्रायम् असाध्यं दुर्घटं वा, षडर्थको नञ् अत्र अल्पार्थको बोध्यः । तदभु अपि भावयति इति तथाभूतः अभूभुवो भवति साधकसत्तमः । यद्वा न भवतीत्यभूः अतद्रूपः साधकः, अतद्रूपोऽप्यसौ तद्रूपो भवतीति अभूभुवः । 'तद्रूपः' इत्यत्र तद् इति पदं साधकस्य ध्येयं 'तत्सद्' इति संज्ञितमभिधत्ते । अभूभुवोऽसौ आत्मानं पिपर्तु पूरयतु परमसिद्धिलाभायेति उपदिष्टमत्र परमेश्वर्येत्यलमति पल्लवितेन ।

व्याकरणम्

उपब्रूते—उपेत्युपसर्गोऽत्र शक्तौ (सामर्थ्ये) आचार्यकृतौ च वर्तते यथा पुरोहित-उपदेशक-प्रोत्साहक-प्रेरक-प्रबोधकार्थके 'उपवक्तृ'शब्दे । 'उप' इत्युपसर्गस्य इमावर्थौ च अधोलिखितकारिकाद्वये संगृहीतौ गणरत्नमहोदधौ आचार्यवर्धमानैः :—

उप सामीप्य-सामर्थ्य-व्याप्त्याचार्यकृति-मृति-
दोषदानक्रियावीप्सारम्भाध्ययपूजने(षु) ।
उपासन्नेऽधिके हीने सादृश्यप्रतियत्नयोः ।
तद्योगव्याप्तिपूजासु शक्तावारम्भदानयोः ।
दक्षिणाचार्यकरणदोषाख्यानात्ययेषु च ॥

भ्रष्टः —'भ्रस्ज पाके' (तु० उ० अ०), कर्तरि निष्ठायां सम्प्रसारणाभावश्छान्दसः ।

अभूभुवः —न भवतीत्यभूः । कर्तरि क्विप् । 'अभू'पूर्वाद् भवतेरन्तर्भावितण्यर्थात् 'भूरञ्जिभ्यां कित्' (उणा० ४.२१८) इत्यनेन असुन्, स च कित् । कित्त्वाद् गुणाभावे ओरुवङ् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिप्पति—'पॄ पालनपूरणयोः' इत्यतो लट्प्रथमपुरुषैकवचने वर्णविकारश्छान्दसः ।

महानग्न्युप ब्रूते भ्रष्टोऽथाप्यभूभुवः ।
यथा वयो विदाह्य स्वर्गे नमवदह्यते ॥८॥

पूर्वार्धं गतम् । अथ उत्तरार्धम् । 'यथा' यद्वत् तपस्वी साधकः 'वयः' स्वकीयम् आयुष्यं जीवनं वा 'विदाह्य' विशेषेण, विविधं, व्यापकतया सर्वाङ्गीणतयेति यावत् तप्त्वा 'स्वर्गे' स्वः सुखमानन्दं वा गमयतीति स्वर्ग आत्मप्रकाशमयो लोकविशेषः तस्मिन्, तत्प्राप्तावित्यर्थः 'नम्' बन्धं, प्रतिबन्धकमन्तरायजालम् इति यावत् 'अवदह्यते' दहति, भस्मीकरोति तद्वत् परमार्थकामैरपरैरपि सर्वैः कर्तव्यम् इति शेषः ।

अयमाशयः —नहि अतपसा पुंसा किमपि सत्यसुखं समासाद्यम्, किं पुनः स्वर्गापवर्गसुखम् ! अत एव तपसः सुमहान् महिमा समाम्नातो निगमागमैः । तद्यथा—

तपसस्तन्महिनाजायतैकम् । (ऋ० १०.१२९.३)

ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत । (ऋ० १.१९०.१)

भद्रमिच्छन्त ऋषयः स्वर्विदस्तपो दीक्षामुपनिषेदुरग्रे ।
(अथर्व० १९.४१.१)

सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति ।
(अथर्व० १२.१.१)

ऋतवाकेन सत्येन श्रद्धया तपसा सुत इन्द्रायेन्दो परि स्रव ।
(ऋ० ९.११३.२)

तपसा येऽनाधृष्यास्तपसा ये स्वर्ययुः ।
तपो ये चक्रिरे महस्ताँश्चिदेवापि गच्छतात् ॥ (ऋ० १०.१५४.२)

यानि स्थानान्यसृजन्त धीरा यज्ञं तन्वानास्तपसाभ्यपश्यम् ।
(ऋ० ८.५९.६)

भिनत्त्यद्रिं तपसा वि शोचिषा । (ऋ० ८.६०.१६)

तपसा युजा वि जहि शत्रून् । (ऋ० १०.८३.३)

परा शृणीहि तपसा यातुधानान् । (ऋ० १०.८७.१४)

अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतम् ।
(ऋ० १०.१८३.१)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एषु वेदमन्त्रेषु तपसो महिम्नैव एकाद्वितीयतत्सत्स्वरूपस्य परमार्थतत्त्वस्य ब्रह्माण्डरूपेण प्रादुर्भावः, तस्यैव सम्प्रदीप्ततपसः ऋतसत्ययोरभिव्यक्तिः, परमसुखनिःश्रेयसकामैर्ऋषिभिस्तपःसाधनस्यैव निषेवणम्, सत्यबृहदृत-तपोदीक्षादिभिरेव धरित्र्या धार्यमाणत्वम्, सत्यश्रद्धादिसंवलिततपसैव सोमरसस्य निष्पाद्यत्वम्, तपसैव पुंसो दुष्प्रधर्षतेजःपुञ्जविभ्राजमानवपुष्ट्वम् स्वर्लोक-विजयित्वञ्च, तपसैव यज्ञसाधनपुरस्सरं समीहितधामसमासादनम्, किं बहुना, तपसैव अद्रीणामपि भेदनम्, शत्रूणां यातुधानानाञ्च निषूदनम्, दिव्यविभूति-मत्त्वञ्च उद्घोषितम् । उपनिषत्स्वपि—

तपःश्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्षचर्यां चरन्तः ।
सूर्यद्वारेण ते विरजाः प्रयान्ति...॥ (मुण्डकोप० १.२.११)
तपसा चीयते ब्रह्म० । (मुण्डकोप० १.१.८)
तपसा प्राप्यते सत्त्वं सत्त्वात् सम्प्राप्यते मनः ।
मनसा प्राप्यते ह्यात्मा ह्यात्मापत्त्या निवर्तते ॥ (मैत्रे० १.७,४.३)
तपसा ब्रह्म विजिज्ञासस्व, तपो ब्रह्मेति । (तैत्ति० ३.२,३.४,३.५)
तपसा श्रद्धा, श्रद्धया मेधा, मेधया मनीषा, मनीषया मनो
मनसा शान्तिः, शान्त्या चित्तं, चित्तेन स्मृतिः, स्मृत्या स्मारं,
स्मारेण विज्ञानं, विज्ञानेनात्मानं वेदयति । (महानारा० १७.१)
तपसि सर्वं प्रतिष्ठितं तस्मात्तपः परमं वदन्ति । (महानारा० १७.२)
तपःप्रभावाद् देवप्रसादाच्च ब्रह्म ह श्वेताश्वतरोऽथ विद्वान् ।
(श्वेता० ६.२१)

तपांसि सर्वाणि च यद् वदन्ति यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् । (कठोप० १.२.१५)
तपोऽवधिः परमा ब्राह्मणस्य । (इतिहासो० ११)

इत्यादिभिर्मन्त्रवाक्यैस्तपोगौरवगानमुद्गीतम् । अथ—

यद् दुरापं दुराम्नायं दुराधर्षं दुरन्वयम् ।
तत् सर्वं तपसा साध्यं तपो हि दुरतिक्रमम् ।
तपो मे हृदयं साक्षादात्माहं तपसोऽनघ ॥ (भाग० २.६.२२)

इति भणता भगवता वेदव्यासेन तावत् तपः भगवदात्मत्वेनैव सभाजितम् । मनुमहाराजेन च—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तपोमूलमिदं सर्वं दैवमानुष्यकं सुखम् ।
तपोमध्यं बुधैः प्रोक्तं तपोऽन्तं वेददर्शिभिः ॥
यद् दुस्तरं यद् दुरापं यद् दुर्गं यच्च दुष्करम् ।
तत् सर्वं तपसा साध्यं तपो हि दुरतिक्रमम् ॥ (मनु० अ० ११)

इति कीर्तयता तप एव ऐहिकामुष्मिकसुखमूलत्वेन सकलध्येयानाममोघसाधनत्वेन च स्वीकृतम् । तस्मात् तप्तव्यं तपः, तप्तव्यं तपः सम्पूर्णपुरुषायुषपर्यन्तं सन्तप्तस्वर्णसङ्काशमात्मतेजः सम्प्राप्तुकामैः साधकैरिति रहस्यम् ।

व्याकरणम्

नम्—'णह बन्धने' (दि० उ० अ०) इत्यस्माड्डः । डित्वाट्टिलोपः । द्वितीयैकवचनम् ।

अवदह्यते—अवपूर्वाद् दहतेः कर्तरि लट्प्रथमपुरुषैकवचने विवक्षिते व्यत्ययेन कर्मणि लङ् यक् च ।

महानग्न्युप ब्रूते स्वस्त्यावेशितं पसः ।
इत्थं फलस्य वृक्षस्य शूर्पे शूर्पं भजेमहि ॥६॥

'महानग्न्युप ब्रूते' इति व्याख्यातपूर्वं द्विधा ।

'महान्' सुमहान् महनीयश्च साधकः 'इत्थम् उप ब्रूते' उपेति आसत्तौ आदरे च, अन्यान् सामूहिकसाधनासहयोगिसाधकान् उपेत्य आदरपूर्वकम् इत्थमेवं वक्ष्यमाणप्रकारकं वच आचष्टे—हे तपःपूतसाधकप्रवराः ! अस्माभिः 'अग्नी' अग्नीभ्यां पूर्वोक्ताभ्यां करणभूताभ्यां, तदीयसामर्थ्येनेत्यर्थः, 'स्वस्ति' स्वस्ति यथा स्यात्तथा, कल्याणसाधकतयेत्यर्थः, अपि च स्वस्तिकासनेन समुपविश्य स्वस्तिवाचनिकपुरस्सरं च 'पसः आवेशितम्' बन्धः धारणाख्यः, चित्तस्य परमैकाग्र्यसाधको देशबन्धः प्रतिष्ठापितः सुस्थिरीकृतश्चेतनायामिति शेषः ।

सम्प्रति वयं 'वृक्षस्य फलस्य' संसारवृक्षस्य श्रुतिस्मृतिषु अश्वत्थाख्यया-ऽऽख्यातस्य, यद्वा वरणीयस्य, 'वृक्ष वरणे' (भ्वा०आ०से०), किंवा व्रश्चनीयस्य मृत्युकुठारच्छेद्यस्य, विनश्वरस्य देहवृक्षस्य तत्सम्बन्धिनः फलस्य अभ्युदय-निःश्रेयसलक्षणस्य, बाह्यान्तरवैभवस्य, साधनासमासादिताऽध्यात्मसाम्राज्यस्य वेत्यर्थः एकदेशं, साधनासमर्जितमंशविशेषं, यद्वा द्वितीयार्थे षष्ठी, बहिरन्त-रैश्वर्यम् अध्यात्मसाम्राज्यं वा 'भजेमहि' सेवेमहि आस्वादेमहि इति भावः ।

तत्र दृष्टान्तः—'शूर्पे शूर्पम्' इवेत्यध्याहार्यम्, लुप्तोपमाश्रितत्वादस्य दृष्टान्तस्य, यथा एकस्मिन् शूर्पे व्रीह्याद्युत्पवनसाधने प्रस्फोटने धान्यादिकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमृज्य पुनरन्यत् शूर्पम अन्नशोधनसाधनमुपादीयते सर्वथा शुद्धं विधातुं शोध्य-धान्यं, तथैव साधनालब्धयोः अभ्युदयनिःश्रेयसयोरैहिकामुष्मिकैश्वर्ययो-र्बाह्यान्तरसाम्राज्ययोर्वा उत्तरोत्तरं शुद्धता, दिव्यता, वरणीयता पूर्णता च सम्पादनीया बहिरन्तःप्रयासेन पुनः पुनर्निषेवितेनेति तात्पर्यम् ।

'महा-नग्नी उपब्रूते' इत्येवम्भूते पदपाठे तु एषा अर्थयोजना द्रष्टव्या—महामहिममहनीयतममाता महेश्वरी योगाभ्याससम्भृष्टान् सुपरिणतप्रज्ञान् तप्ततनून् प्रति एवमाह : हे तपःपूता रूपान्तरप्राप्ताः साधकपुङ्गवाः! युष्माभिः पसः स्वस्ति आवेशितम् । सम्प्रति यूयं संसारवृक्षस्य शरीरवृक्षस्य वा फलं भजेमहि भजध्वं, सेवध्वम्, आस्वादयध्वम्, पुरुषव्यत्ययः । अपि वा, अहञ्च मत्सुताश्च (अदितिसुता आदित्याः विश्वे देवाश्च) यूयञ्चेति—वयं सर्वेऽपीति भावं बुद्धिस्थं कृत्वा 'भजेमहि' इति उत्तमपुरुषबहुवचनप्रयोगः । अस्माकं साधनाफले तत्तद्देवभागो भवत्येव, तञ्च तत्तद्देवाय निवेद्य तत्प्रसादभूत-निर्माल्यमेव सेव्यं साधकैरित्यभिप्रायः ।

इदं रहस्यम्—अस्य सूक्तस्य प्रथममन्त्रे अंहुभेद्यायाः प्रकृतेरार्जवसम्पादन-मुपदिष्टम् । द्वितीयमन्त्राच्च योगस्यान्तरङ्गसाधनानां धारणादीनां तत्फला-नाञ्च निर्देशो विहितोऽत्यन्तगूढभाषायाम् । प्रकृतनवममन्त्रपर्यन्तं प्राञ्जल-प्रतीकात्मकपदैः प्रतिपाद्यमानं प्रकृतिरूपान्तरपरकं प्रतिपाद्यं प्रस्फुटं सुसङ्गतञ्च प्रतीयेत प्रबुद्धपाठकानाम् ।

अथ प्रकृतमन्त्रे साधनातरोरमृतफलस्य शुद्धतासिद्धये सन्ततप्रयासः, परि-पूतस्य च तस्य अतिमिश्रणीयूषरसस्यास्वादनविधिः प्रबोधितः 'शूर्पे शूर्पम्' इति लौकिकहृदयग्राहिदृष्टान्तेन ।

अत्र 'स्वस्ति' इति पदे भूयांसः प्रासङ्गिका हृद्याश्च भावाः सुचारुतया सरसतया च संश्लिष्टाः । स्वस्ति मङ्गलं यथा स्यात्तथा, मङ्गलकारितया इति प्रसिद्धार्थस्तु अस्त्येव सुसङ्गतः । अथ तस्य मङ्गलस्य परार्ध्यं स्वरूपं तु सु+अस्ति अर्थात् श्रेष्ठतमं, सर्वाङ्गसुन्दरं सुपूर्णतमञ्च अस्तित्वं जीवनं वा । तादृशजीवनविनिर्माणाय च योगस्य अन्तरङ्गसाधनत्रयस्य संयमाह्वयस्य धारणादेराश्रयणमपरिहार्यमिति प्रकृतसूक्तस्य द्वितीयमन्त्रस्य विवक्षितम् । तदर्थञ्च आसनेषु स्वस्तिकाऽऽसनस्याभ्यसनं तेनोपविश्य च स्वस्तिवाचनिक-पुरस्सरं 'सर्वे भवन्तु सुखिनः' इत्येवंरूपसर्वमङ्गलसङ्कल्पपूर्वकं साधनारम्भो विधेय इतीमौ द्वौ भावावपि श्लेषेण 'स्वस्ति'शब्देन समर्प्येते । वेदोपनिषदा-दिसद्ग्रन्थेषु पदे पदे स्वस्ति-शान्ति-अभयाऽमृतादिदिव्यदानानां प्रार्थना प्राणिमात्राय, द्विपदे चतुष्पदे च जोगुञ्ज्यते जेगीयते च—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वस्ति नो अस्त्वभयं नो अस्तु । (अथर्व० १९.८.७)

शान्तं भूतञ्च भव्यञ्च सर्वमेव शमस्तु नः । (अथर्व० १९.९.२)

स्वस्ति नो अदिते कृधि । (ऋ० ७.५१.१४)

यूयं पात स्वस्तिभिः सदा नः । (ऋ० ७.३५.१५)

त आदित्या अभयं शर्म यच्छत सुगा नः कर्त सुपथा स्वस्तये ।
(ऋ० १०.६३.७)

इन्द्रो विश्वस्य राजति । शं नो अस्तु द्विपदे शं चतुष्पदे ।
(यजु० ३६.८)

स्वस्ति मात्र उत पित्रे नो अस्तु स्वस्ति गोभ्यो जगते पुरुषेभ्यः ।
विश्वं सुभूतं सुविदत्रं नो अस्तु ज्योगेव दृशेम सूर्यम् ।।
(अथर्व० १.३१.४)

इत्यादयो मन्त्राः शतश उद्धतुँ शक्याः ।

औपनिषदर्षयोऽपि सामष्टिकाशिषः प्रयुञ्जानाः सर्वेषामपि स्वस्तिप्रार्थनां प्रशिक्षयन्ति परमनिःश्रेयसार्थिनः । तद्यथा—

'ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात्' (मुण्डकोप० २.२.६)। 'स्वस्ति सर्वजीवेभ्य इत्युक्त्वा दीक्षामुपेयात्' (कठश्रुत्युप० २२)। 'स्वस्ति सर्वजीवेभ्य इत्युक्त्वाऽऽत्मानमनन्यं ध्यायंस्तदूर्ध्वबाहुर्विमुक्तमार्गो भवेत्' (कठरुद्रोप० ४)।

अथ-—

स्वस्तिकासनमास्थाय समाहितमनास्तथा ।······
आनन्दाविर्भवो यावत्तावन्मूर्धनि धारणात् ।
प्राणः प्रयात्यनेनैव ब्रह्मरन्ध्रं महामुने ।······
पश्चात् प्रीतो महाप्राज्ञः साक्षादात्मोन्मुखो भवेत् ।
पुनस्तज्ज्ञाननिष्पत्तिर्योगात् संसारनिह्नुतिः ।।

इति जाबालदर्शनोपनिषदि (६.३२-३८) स्वस्तिकासनस्य मनःसमाधिपूर्वकमात्मसाक्षात्कारसम्प्रदानप्रभविष्णुत्वं प्रकीर्तितम् ।

स्वस्ति इत्यस्य स्थाने स्वसा इति पाठान्तरं प्रतिपद्यन्ते केचित् । तत्र 'स्वसा' सुगत्या, शोभनयुक्त्या, श्रेष्ठोपायेन वा 'पसः आवेशितम्' धारणाख्यो बन्धः प्रतिष्ठापितः सुसाधित इत्यर्थो बोध्यः ।

अथ च वृक्षोऽस्मिन् मन्त्रे विश्ववृक्षः, प्रकृतिवृक्षः प्रकृतिकार्य(विकार)-भूतो देहवृक्षो वेति वेदोपनिषद्गीतापुराणादिभिर्विज्ञायते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमं तावत्––

किं स्विद् वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद् यदध्यतिष्ठद् भुवनानि धारयन् ॥

(ऋ० १०.८१.४,१०.३१.७ पूर्वार्धमात्रम्, यजु० १७.२०)

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥

(ऋ० १.१६४.२०)

यस्मिन् वृक्षे मध्वदः सुपर्णा निविशन्ते सुवते चाधि विश्वे ।
तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद ॥

(ऋ० १.१६४.२२)

यस्मिन् वृक्षे सुपलाशे देवैः संपिबते यमः ।
अत्रा नो विश्पतिः पिता पुराणाँ अनु वेनति ॥ (ऋ० १०.१३५.१)

अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि ।
तत्रामृतस्य चक्षणं ततः कुष्ठो अजायत ॥

(अथर्व० १९.३९.६,५.४.३, चतुर्थचरणे किञ्चित् पाठभेदः)

अश्वत्थ खदिरो धवः । (अथर्व० २०.१३१.१४)

एषु वेदमन्त्रेषु सनातनस्य प्रकृतिवृक्षस्य, संसारवृक्षस्य देवसदनस्य अश्वत्थ-वृक्षस्य देहवृक्षस्य च वर्णनं प्रहेलिकाप्रवह्लिकात्मिकयाऽपि हृदयाह्लादिकया प्रासादिककाव्यशैल्या विहितम् । 'अश्वत्थो देवसदनः......ततः कुष्ठोऽजायत' इत्यत्र तु कौ पृथिव्यां तिष्ठतीति कुष्ठः पार्थिवः प्राणी पदार्थो वा तस्माद् देवसदनादश्वत्थादेव अजायतेति व्याहृतम् । 'द्वा सुपर्णा' इत्यत्र च जीवजगदीशयोः सुपर्णयोः सहावस्थानाय निवासस्थानं संसारशरीरं मानवशरीरञ्चेत्युक्तम् । अथ—

वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ।

(श्वेताश्व० ३.९)

वृक्षं तु सकलं विद्याच्छाया तस्यैव निष्कला ।
सकले निष्कले भावे सर्वत्रात्मा व्यवस्थितः ॥ (ध्यानबिन्दूप० ८)

ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः ।
तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन एतद्वै तत् ।।
(कठोप० २.३.१)

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ।।
अधश्चोर्ध्वं........................ (गीता १५.१-३)
अव्यक्तमूलप्रभवस्तस्यैवानुग्रहोत्थितः ।
बुद्धिस्कन्धमयश्चैव इन्द्रियान्तरकोटरः ।।
महाभूतविशाखश्च विषयैः पत्रवाँस्तथा ।
धर्माधर्मसुपुष्पश्च सुखदुःखफलोदयः ।।
आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः ।
एतद् ब्रह्मवनं चैव ब्रह्मा चरति नित्यशः ।।
एतच्छित्वा च भित्वा च ज्ञानेन परमासिना ।
ततश्चात्मरतिं प्राप्य तस्मान्नावर्तते पुनः ।। (पुराणतः)

इत्यादिषु गीतोपनिषत्पुराणादिकशास्त्रवचनेषु आप्तैर्वृक्षरूपककल्पनया ब्रह्मवृक्षस्य संसारवृक्षस्य च वर्णनं विधाय, अन्ते 'यस्तं वेद स वेदवित्' इति समुद्घोष्य, वेदोक्तो वृक्षोऽश्वत्थो वाऽयं ब्रह्मवृक्षः, संसारवृक्षः, शरीरवृक्षश्चैवेति अभिधयाऽभ्यधायि ।

तत्र शरीरवृक्षस्य व्रश्चनीयत्वं, मृत्युकुठारच्छेद्यत्वं वैराग्यविबोधकं विनश्वरत्वं वा विश्वविश्रुतमेव । अथ तस्य वरणीयत्वं शास्त्रवाक्यैर्विज्ञायते । तथा हि—

ये पुरुषे ब्रह्म विदुस्ते विदुः परमेष्ठिनम् । (अथर्व० १०.७.१७)
तस्माद्वै विद्वान् पुरुषमिदं ब्रह्मेति मन्यते ।
सर्वा ह्यस्मिन् देवता गावो गोष्ठ इवासते ।। (अथर्व० ११.८.३२)
पुरुषो वै प्रजापतेर्नेदिष्ठम् । (शत० ४.३.४.३)
पुरुषः प्रजापतिः । (शत० ६.२.१.२३)
प्राजापत्यो वै पुरुषः । (तैत्ति० २.२.४.३)

ता एता देवताः सृष्टा...एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन् प्रतिष्ठिता अन्नमदामेति ।।१।। ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति ।। ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति ।।२।। ताभ्यः पुरुषमानयत्ता अब्रुवन् सुकृतं बतेति पुरुषो वाव सुकृतम् ।। ता अब्रवीद्यथाऽऽयतनं प्रविशतेति ।।३।। (ऐतरेयोप० २.१-३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देहो देवालयः प्रोक्तः स जीवः केवलः शिवः ।
त्यजेदज्ञाननिर्माल्यं सोऽहम्भावेन पूजयेत् ।।
(मैत्रेय्युप० २.१, स्कन्दोप० १०)

दुर्लभं मानुषं जन्म प्रार्थ्यते त्रिदशैरपि ।
तल्लब्ध्वा परलोकार्थं यत्नं कुर्याद् विचक्षणः ।। (वाल्मीकिः)
गुह्यं ब्रह्म तदिदं ब्रवीमि । न हि मानुषाच्छ्रेष्ठतरं हि किञ्चित् ।।
(वेदव्यासः)

सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या
वृक्षान् सरीसृपमृगान् खगदंशमत्स्यान् ।
तैस्तैरतुष्टहृदयो मनुजं विधाय
ब्रह्मावलोकधिषणं मुदमाप देवः ।। (भागवतम्)

अतश्च पुरुषो दुर्लभं मानुषजन्म प्राप्य संसारवृक्षस्य मूलज्ञानार्थं तदासक्तेः समूलोन्मूलनार्थं च सम्प्रेरितः सर्वैरपि ऋषिमुनिभिः, तद्विना संसारवृक्षफलास्वादस्य आकाशकुसुमायमानत्वात्, तद्विपर्ययेण 'भोगा न भुक्ता वयमेव भुक्ताः' इति नयेन भोक्तुरेव भोगैर्भुज्यमानत्वात्, निखिलानर्थमूलसंसारचक्रावर्तनस्य च दुरवसानत्वात् । संसारवृक्षसमूलोच्छेदार्थञ्च अनासक्तेर्निशितनिस्त्रिंशो विवेकस्य सुतीक्ष्णखड्गश्चामोघशस्त्रे इति निर्दिष्टं 'शूर्पे शूर्पम्' इति दृष्टान्तेन । सदसतोर्विवेकः (पृथक्कारः) असतश्च परिहार एव क्रियते शूर्पेणेति दृष्टान्तस्य स्वारस्यमिति दिक् ।

व्याकरणम्

स्वसा—सुपूर्वात् 'अस गतिदीप्त्यादानेषु' (भ्वा० उ० से०) इत्यतो भावे क्विप् । तृतीयैकवचनम् ।

वृक्षस्य—'वृक्ष वरणे, आवरणे इति काशकृत्स्नः' (भ्वा०आ० से०) इत्यतः पचाद्यचि रूपम् । यद्वा वृश्च्यते इति वृक्षः । 'ओव्रश्चू छेदने' (तु०प०वे०) इत्यतः कर्मणि 'स्नु-व्रश्चि०' (उणा० ३.६६) इत्यनेन क्सप्रत्यये रूपम् । तथा हि, 'वृक्षो व्रश्चनात्' इति यास्कः (निरुक्तम् २.६) ।

महानग्नी कृकवाकं शम्यया परि धावति ।
अयं न विद्म यो मृगः शीर्ष्णा हरति धाणिकाम् ।।१०।।

'महानग्नी' दिगम्बरमहादेव्या अस्मदन्तःस्थितांशशक्तिः 'कृकवाकं' क्रियते जन्यते इति कृकं कृत्रिमम्, अनित्यं क्षणिकं च सुखं वक्ति वर्णयति वा जनोऽनेन जल्पमानमिति कृकवाको रागः कामो वा तं 'परि' प्रति 'शम्यया' शम-दम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रद्धा-समाधानोपरम-तितिक्षा-समाख्यसम्पत्ति-षट्कशस्त्रेण, निशितेन असङ्ग-शस्त्रेण वा 'धावति' सरभसमभियाति महावेगेन तमाक्रम्य तत्क्षणं विनाशयितुमुद्युङ्क्ते इति यावत् । 'उपब्रूते' इति पदं पूर्वमन्त्रादनुकृष्यतेऽनुवर्तते वा, सा महानग्नी आक्रामन्ती ब्रूते उपदिशति वा 'न' सम्प्रति, (निरु० ७.३१) 'विद्म' जानीमः तं मृगं 'यः अयं मृगः' य एष मृग इव विमृग्य विशसितुं योग्यो वासना-पशुः कामनामा रागाख्यो वा 'शीर्ष्णा' मस्तिष्कद्वारा, मस्तिष्कमाक्रम्य तत्र विकृतिं जनयित्वा चेत्यर्थः 'धाणिकाम्' धानिकाम्, धानीम्, आत्मसाम्राज्य-राजधानीं 'हरति' लुण्ठति, अपहरति आत्मनो दिव्यवरणीयागणनीयगुणगणा-गारमिति भावः ।

अपि वा, 'महान्' महासाधकः 'अग्नी' स्वान्तःस्थाग्निभ्यां यथोक्ताभ्यां 'शम्यया' निशितशस्त्रेण च अनासक्तिसंज्ञेन षट्सम्पत्तिखड्गेन वा इत्येवंविधा-ऽर्थयोजना द्रष्टव्या ।

इदमाकूतम्—सर्वानर्थमूलस्य कामस्य रागस्य वा समूलोन्मूलनं साधकस्या-परिहार्यमिति प्रतिपादितमस्मिन् मन्त्रे । स कामश्च सङ्कल्पात् सङ्गाच्च सञ्जायते इति संज्ञायते तज्ज्ञवचनात् ।

तथा हि—

'काम ! जानामि ते रूपं (मूलं) सङ्कल्पात् किल जायसे ।
नाहं सङ्कल्पयिष्यामि ततो मे न भविष्यसि ॥'
ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते कामः कामात् क्रोधोऽभिजायते ॥
......................बुद्धिनाशात् प्रणश्यति ॥
(गीता २.६२-६३)

अयमेव कामो रागोऽप्यभिधीयते । रागो नाम सुखमूलो रञ्जनात्मकचित्तवृत्ति-विशेषः । यस्मात् पदार्थात्, पुरुषात्, प्राणिनः स्थानसाधनादिकाद् वाऽस्माभिः सुखं प्राप्यते तस्य रञ्जनात्मकसंस्कारोऽस्मच्चित्तवृत्तौ पतति । ततो वारंवारं तस्यैव स्मृतिः तत्प्राप्तेस्तृष्णा च सञ्जायते । स एव रागः । अयमेवाशयः 'सुखानुशयी रागः' (साधनपादः, ७) इत्यस्य पातञ्जलयोगसूत्रस्य । यस्मात् प्राणिपदार्थादेः पुंसा सुखं प्राप्तं तेन सुखसाधनेनैव सह शेते तस्य मनस्तदासक्तं तत्सतृष्णं च ।

अयमेव रागः कामो वा सर्वभावानां सकलक्रियाणाञ्च मूलम् । तथा चोक्तं भरतेन—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रायेण सर्वभावानां कामान्निष्पत्तिरिष्यते ।

तथैव मनुमहाराजेनापि—

अकामस्य क्रिया काचिद् दृश्यते नेह कर्हिचित् ।
यद्यद्धि कुरुते जन्तुस्तत्तत् कामस्य चेष्टितम् ।।

(मनु० २.४)

इति व्याहरता कामस्य सर्वक्रियाजनकत्वमुक्तम् ।

किन्तु कृत्रिमं खलु सकल-भाव-क्रिया-व्यापारमूलकामजन्यं सुखमिति आम्नातं प्रकृतनिगमे 'क्रक' इति पदेन । तस्य कृत्रिमस्य, अनित्यस्य क्षण-भङ्गुरमिथ्यासुखस्य प्रलोभनमेव 'कामात् क्रोधोऽभिजायते' (गीता २.६२-६३) इत्यादिगीतोक्तक्रमेण सर्वनाशान्तां सकलानर्थपरम्परां प्रसूते । यावत् कामोऽवतिष्ठते साधकस्य सत्तायाः कस्मिन्नपि स्तरे तावत् परमप्रभुप्राप्तिस्वरूपिणी साधनापूर्तिः शशशृङ्गायते 'कामो यत्र न तत्र हि रामः' इति प्राज्ञोक्तेः । अस्याः सूक्तेः फलितार्थस्तु 'रामो यत्र न तत्र हि कामः' इति । तथा चाहः श्रीचैतन्य-महाप्रभवः—'कामो नाम आत्मेन्द्रियप्रीतिवाञ्छा, प्रेम नाम कृष्णेन्द्रियप्रीति-वाञ्छा' इति (चैतन्यचरितामृत-आधारतः) । अतश्च आत्मसाम्राज्यसंजि-गीषुभिर्जीवैः शिववत् 'काम'जयिभी 'राम'प्रेमिभिश्च भाव्यम् । यतो हि जीवो नाम कामस्य दासः, शिवो नाम कामरहितो जीव इति । कामजये एव आत्मपरमात्मसाक्षात्कारो भवतीति भणितं महाभारतकारैरपि '···कामद्वेषौ च जयति तदात्मानं च पश्यति' (म०भा०, शा०प० २१.३) । 'आत्मानं च' इत्यत्र चकारोऽनुक्तपरमात्मसमुच्चयार्थः । ततश्च समूलघातं हन्तव्योऽयं महाशनो महापाप्मा, दुष्पूरानलो दुर्धर्षो महावैरी कामो विप्राणां मोक्षद्वारा-र्गलत्वात् । स च सङ्कल्पमात्रपरित्यागेन विवेकवैराग्यसहकृतेन निर्मूलयितुं शक्यो नान्यथा । तथा चोक्तं परमप्राज्ञैराप्तैः—

यन्मैथुनादि गृहमेधिसुखं हि तुच्छं
कण्डूयनेन करयोरिव दुःखदुःखम् ।
तृप्यन्ति नेह कृपणा बहुदुःखभाजः
कण्डूतिवन्मनसिजं विषहेत धीरः ।।
सङ्कल्पाज्जायते कामः सेव्यमानो विवर्धते ।
यदा प्रज्ञो विरमते तदा सद्यः प्रणश्यति ।।
असङ्कल्पाज्जयेत् कामं क्रोधं कामविवर्जनात् । (भाग०······)

यतो हि 'हर्ष'तनयः कन्दर्पः किल कं न दर्पयति विमोहयति वा ? शङ्करेण संदग्धोऽप्यसौ अनङ्गत्वमुपागतः सूक्ष्मवासनारूपेण निवसति जीवमात्रस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हृदये। अतो निष्कामत्व-निःसङ्कल्पत्व-हर्षशोकातीतत्वभूमिकायां शाश्वत-प्रतिष्ठालाभ एव हर्षपुत्रस्य कामस्य दाहः इति रहस्यम्।

शम्या—अनेन शब्देन सङ्केतितं शमदमादिसम्पत्तिषट्कं साधनचतुष्टया-न्तर्गतत्वात् स्वसाधनभूतयोः विवेकवैराग्ययोः, स्वपरिणामभूतमुमुक्षुतायाश्चोप-लक्षणम्। अस्य प्रसिद्धार्थो युगकीलक इति, 'शम्या स्त्री युगकीलकः' इत्यमरः (६.१४)। अत्र त्वेष शान्तिकरे युगकीलतुल्यशस्त्रे वर्तते इति अथर्वभाष्यकाराः क्षेमकरणदासत्रिवेदिनः। शल्या नाम अर्शश्चिकित्सायां प्रयुज्यमानः शालाक्य-शस्त्रविशेष इति वाग्भटः। वेदस्य रहस्यार्थेऽयम् अन्तारिपूपद्रवोपशामके तीक्ष्ण-शस्त्रविशेषे द्रष्टव्यः। अन्तर्वैरिविनाशकेषु सुतीक्ष्णशस्त्रेषु तीक्ष्णतमं तावद् असङ्गखड्गः परापरवैराग्यं वेति रहस्यम् (गीता १५.३)।

मृगः—मृगवद् विमृग्य, अन्विष्य निहन्तुं योग्यत्वात् कामोऽपि मृग एव विशसनीयवासनापशुत्वात्। अथ 'यद्ध त्यं मायिनं मृगं तमु त्वं माययाव-धीरर्चन्ननु स्वराज्यम्' (ऋ० १.८०.७) इत्येतान् मन्त्रचरणान् सायणः 'यद्ध यस्मात् खलु मायिनं मायाविनं त्यं तं प्रसिद्धं वञ्चयितारम्, लोकोपद्रव-कारिणमित्यर्थः, मृगं मृगरूपमापन्नं तं वृत्रं त्वमपि माययैवावधीः, हत-वानसि' इत्येवं व्याचक्षाणो 'मृग'शब्दस्य प्रतीकात्मकार्थव्याख्यायां परमोप-कारको भवति वेदगुह्यार्थवादिनामात्मयाजिनाम्। काममृगोऽपि वृत्र एव चित्प्रकाशस्य ज्ञानज्योतिषश्च आवरणात् समाच्छादनाद् वा। तथा चोक्तं गीतायाम्—

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्॥
आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च॥
इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम्॥
तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्॥ (३.३८-४१)

एषु श्लोकेषु कामो ज्ञानज्योतिरावरकः पाप्मा च प्रोक्तः। पापमात्रं च वृत्र एव वेदमन्त्राणामाध्यात्मिकेऽर्थे, आत्मज्योतिषः समाच्छादनात्।

कामक्रोधौ खलु वृत्रविशेषौ मधुकैटभौ, योगशास्त्रपरिभाषया 'मल'नामकौ, एवमेव लोभमाहौ महिषासुर-चिक्षुरौ विक्षेपाख्यकौ, अहम्ममभावौ च शुम्भ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निशुम्भो आवरणाऽऽह्वयो इति विवेकः। अतः समूलमुन्मूलनीय एष महावैरी। अव्यापादिते त्वस्मिन् मृगे आत्मराज्यं विजित्यापि योषितां क्रीडामृगो भवति पुमान् इत्युक्तं भागवते--

निर्जित्य दिक्चक्रमभूतविग्रहो वरासनस्थः सुरराजवन्दितः।
गृहेषु मैथुन्यसुखेषु योषितां क्रीडामृगः पुरुष ईश नीयते॥

वञ्चकचक्रचूडामणिश्चायं काममृगः शीर्ष्णि प्रहरति पुरुषं, हरति च तस्य सुरराज्यस्पर्धि अध्यात्मसाम्राज्यम्। 'इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते' इति गीतावचने च शीर्ष्णा साम्राज्यहरणस्य भावो विशदतयाऽभिव्यक्तः। तत्राधिष्ठितश्चायं शठशिरोमणिः कामो यां धाणिकामाक्रामति लुण्ठति च सा खलु अस्मत्समस्तसमत्ताया राजाधिराजस्य अन्तरात्मनस्तदीयज्योतिश्शबितशान्तिप्रभृतिदिव्यसद्गुणसन्ततेश्चाधिवसतिर्हृदयनगरी, जीवात्मनो राजधानी इत्यलमनल्पजल्पनेन।

कृकवाकम्---क्रियते इति कृकं कृत्रिमम्। करोतेः कर्मणि 'सृ-वृ-भू०' (उणा० ३.४१) इत्यनेन कक्। कृकं कृत्रिमसुखं वक्ति वर्णयतीति कृकवाकस्तम्। कृकशब्दे उपपदे वक्तेर्ब्रवीतेर्वा 'कर्मण्यण्' इति अण्। न्यङ्क्वादिवत् कुत्वमास्थेयं छान्दसम्।

शम्यया—शम्यतेऽनया उत्पातादिकमित्यर्थे 'शमु उपशमे' (दि०प०से०) इत्यस्मात् यक् औणादिको बाहुलकात् (उणा० ४.११२)। स्त्रियां टाप्।

धाणिकाम्—दधति धीयते वाऽस्यां निधिर्महामूल्यनिधिरिति धानी। सैव धानिका धाणिका च। दधातेरधिकरणे ल्युटि, स्वार्थे कप्रत्यये, टापि, इत्वे, छान्दसे णत्वे च रूपम्। द्वितीयैकवचनम्। यद्वा 'आणको लू-धू-शिघि-धाञ्भ्यः' (उणा० ३.८३) इत्यनेन दधातेः आणक्प्रत्ययः। स्त्रियां टाप्। अत इत्वम्।

महानग्नी महानग्नं धावन्तमनु धावति।
इमास्तदस्य गा रक्ष यभ मामद्ध्योदनम्॥११॥

'महानग्नी' चिदम्बराम्बरा महाशून्यपरमव्योमाम्बरा जगदम्बा सृष्टेरीक्षणात्परमपि सर्जनसङ्कल्पाज्जुगुप्समानं 'धावन्तं' प्रपञ्चप्रपञ्चनात् पलायमानम्, 'स ऐक्षत' (बृह० १.२.५) इत्येवंस्वरूपात् सर्गेक्षणात् परमपि 'सोऽकामयत' (तैत्ति० २.६) इत्येवंरूपसृष्टिसङ्कल्पपराङ्मुखम्, स्वयमीक्षितसर्गसर्जनानौत्सुक्यात् तद्विरक्तेर्वा सङ्कल्पक्रियायाः परतः प्रधावन्तं सच्चित्सुखाम्बरं, दिगम्बरं परात्परं पुरुषम् 'अनुधावति' सवेगमनुव्रजति सर्जनसङ्कल्पार्थं तं सम्प्रेरयितु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रोत्साहयितुं च, तद्विना तस्या अस्तित्वसामर्थ्यादिवैयर्थ्यापत्तेरिति भाव इत्येकोऽर्थः पूर्वार्धस्य ।

अपि वा, 'महानग्नी' पूर्वोक्ता एतत्सूक्तसम्प्रोक्तसाधनापद्धत्या सम्प्राप्तापवर्गम्, उपर्युक्तमहानग्नेन परात्परेण सह सायुज्यमुपेतं, प्रपञ्चपराङ्मुखत्वाच्च तेनैव सह 'धावन्तं' प्रपञ्चस्य परस्तात् पलायमानं 'महानग्नं' तादात्म्योपलब्धेर्महानग्नमिव महानग्नं प्रकृतिबन्धमुक्तं जीवविशेषम् 'अनुधावति' सुमहाजवेन अनु व्रजति प्रचोदयितुं तं महात्मबुद्धवन्निर्वाणमपि निरादृत्य निराकृत्य च त्रिविधतापतप्तप्राणिपरित्राणार्थं, जीवमात्रस्य प्रकृतिपुरुषविवेकपथप्रतिपादनप्रशिक्षणपूर्वकं परमकल्याणसम्पादनार्थं, जगति जगदीश्वरसाम्राज्यसंस्थापनार्थम् आ अपर-'पुरुष'मात्र-अपवर्गप्राप्तेः प्राकृतिकप्रपञ्चे एव जीवनयापनार्थञ्च । एतदर्थं च सा महानग्नं परात्परपुरुषम् 'उपब्रूते' इति पूर्वमन्त्रेभ्योऽनुकृष्यते । किम् उपब्रूते इत्याकाङ्क्षायामाह—'तत्' हे लिङ्गातीत ! 'तत् सत्', 'तद् एकम्' इत्यादिपदावलिविनिर्दिष्ट अव्यक्त, अनिर्वाच्य ! परमोदासीन, प्रपञ्चोपशमप्रिय महानग्न ! यद्वा, 'तत्' तस्माद्धेतोः, त्वदुद्दिष्टसकलजीवसमुद्धारहेतोः 'अस्य' बुद्धिस्थस्य, सद्यः प्रकृतिबन्धमुक्तस्य, त्वया सह लब्धतादात्म्यस्य सिद्धजीवस्य 'इमाः गाः' एताश्चिदर्चिषः, चिज्ज्योतीरश्मीन् 'रक्ष', पाहि, त्वयि विलयपूर्वकं जीवभावविलोपात् त्रायस्वेति यावत् । 'मां यभ' मया सह सङ्गतो भव सृष्टिसर्जन-तद्व्यापारप्रवर्तनार्थम् 'औदनम्' सेचनशीलं प्रवर्धकं वा प्रकृतिमयं ब्रह्म, विश्वब्रह्म 'अद्धि' आदय, उपभोजय इमं जीवं जीवान्तरमङ्गलसाधनार्थम् ।

'महान् अग्नी महान् अग्नम्' इत्येवंविधे पदपाठे तु सरलतराऽर्थयोजना । सा चेयम्—'महान्' महासाधकः 'अग्नी' अग्निभ्यां पूर्वोक्ताभ्यां करणाभ्यां 'धावन्तम्' आत्मपरमात्मसाक्षात्कारवर्त्मनि महावेगेन व्रजन्तम्, पुरः पुरः उच्चात्युच्चं च प्रगतिपरं 'महान् अग्निम्' महानित्यत्र द्वितीयार्थे प्रथमा, महान्तम्, तत्त्वविदामग्रगण्यम् अग्निस्वरूपं गुरुम् 'अनुधावति' अनुसरति सतीव्रवेगम्, उपब्रूते च तम्— 'तत्' हे 'तत्सत्'-प्रतिनिधे गुरुशिरोमणे ! 'यभ' हे यम ! यतात्मन् ! संयतेन्द्रिय, अदान्तशिष्याणां दुर्दान्तेन्द्रियाश्वनियमननिपुण ! 'अस्य' त्वत्सम्मुखस्थान्तेवासिनः 'इमा गा रक्ष' एतानि एकादशेन्द्रियाणि पाहि सन्मार्गच्युतेः, दर्शय एषामनुशासनसत्पथप्रवर्तनपद्धतिम् । एवञ्च 'माम् औदनम् अद्धि' ब्रह्मौदनम्, स्वौगदनं, पञ्चौदनम् अजञ्च मामुपभोजय आस्वादय साधनासत्फलस्वरूपम् ।

'यभ' इति शब्दे क्रियापदत्वेन स्वीक्रियमाणे तु स्वार्थेऽन्तर्भूतण्यर्थे च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तमानस्य यमेर्लोण्मध्यमपुरुषैकवचनरूपं 'यभ' इति बोध्यम् । अत्र च इयमर्थ-योजना बोध्या—'तत्' हे 'तत्सत्'-प्रतिनिधे सद्गुरो ! 'मां यभ' अन्तःसङ्गतो भव मया सह, सिद्धे च तस्मिन्नन्तःसङ्गमेऽन्तःसम्पर्केऽन्तर्मिलने च यमय माम् अन्तर्यामितया, नियमय मेऽन्तःसाधनाम्, परिचालय मां पदे पदे सिद्धिपथे, अन्ते च 'ओदनम् अद्धि' ब्रह्मौदनं, स्वर्गौदनमजौदनञ्च माम् आशय आस्वादय ।

अत्रेदं विचारणीयम्—को न्वयमोदनो योऽत्र सम्प्रार्थितः सद्गुरुम् अदनार्थम् ? भगवान् वेद एव विशदीकरोति अस्य गुह्यार्थमनेकत्र । अथर्व-वेदस्य ओदनदेवताके सूक्ते (११.३)—

तस्यौदनस्य बृहस्पतिः शिरो ब्रह्म मुखम् ।।१।।
द्यावापृथिवी श्रोत्रे सूर्याचन्द्रमसावक्षिणी सप्तऋषयः प्राणापानाः ।।२।।
इयमेव पृथिवी कुम्भी भवति राध्यमानस्यौदनस्य द्यौरपिधानम् ।।११।।
ऋचा कुम्भ्यधिहितार्त्विज्येन प्रेषिता ।।१४।।
ब्रह्मणा परिगृहीता साम्ना पर्यूढा ।।१५।।
ओदनेन यज्ञवचः सर्वे लोकाः समाप्याः ।।१९।।
यस्मिन्त्समुद्रो द्यौर्भूमिस्त्रयोऽवरपरं श्रिताः ।।२०।।
यस्य देवा अकल्पन्तोच्छिष्टे षडशीतयः ।।२१।।
तं त्वौदनस्य पृच्छामि यो अस्य महिमा महान् ।।२२।।
ब्रह्मवादिनो वदन्ति पराञ्चमोदनं प्राशी३ः प्रत्यञ्चा३मिति ।।२६।।
त्वमोदनं प्राशी३स्त्वामोदना३ इति ।।२७।।
नैवाहमोदनं न मामोदनः ।।३०।।
ओदन एवौदनं प्राशीत् ।।३१।।

इत्यादिभिर्निगदव्याख्यातैर्मन्त्रैरोदनस्य प्रतीकात्मकता न केवलमनावृता विवृता-ऽप्यभिधया । ब्रह्मवादिनामयं ब्रह्मौदन एव प्रकृतमन्त्रे 'मामद्ध्योदनम्' इति मन्त्रांशेऽभिप्रेतः ।

अथ च अथर्ववेदे अस्यौदनस्य महिमानुवर्णनपराणि नैकानि सूक्तान्तराणि दृश्यन्ते । तेषां केचिन्मन्त्रा अत्र समुद्ध्रियन्ते—

ब्रह्मास्य शीर्षं बृहदस्य पृष्ठं वामदेव्यमुदरमोदनस्य ।
छन्दांसि पक्षौ मुखमस्य सत्यं विष्टारी जातस्तपसोऽधि यज्ञः ।।
इममोदनं नि दधे ब्राह्मणेषु विष्टारिणं लोकजितं स्वर्गम् ।
स मे मा क्षेष्ट स्वधया पिन्वमानो विश्वरूपा धेनुः कामदुघा मे अस्तु ।।
(अथर्व० ४.३४.१,८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अजः पक्वः स्वर्गे लोके दधाति पञ्चौदनो निर्ऋतिं बाधमानः ।
तेन लोकान्त्सूर्यवतो जयेम ।।

अजो वा इदमग्रे व्यक्रमत तस्योर इयमभवद् द्यौः पृष्ठम् ।
अन्तरिक्षं मध्यं दिशः पार्श्वे समुद्रौ कुक्षी ।।
सत्यं चर्तं च चक्षुषी विश्वं सत्यं श्रद्धा प्राणो विराट् शिरः ।
एष वा अपरिमितो यज्ञो यदजः पञ्चौदनः ।।
(अथर्व० ९.५.१८,२०,२१)

ऋतेन तष्टा मनसा हितैषा ब्रह्मौदनस्य विहिता वेदिरग्रे ।
अंसद्रीं शुद्धामुप धेहि नारि तत्रौदनं सादय दैवानाम् ।।
येन देवा ज्योतिषा द्यामुदायन् ब्रह्मौदनं पक्त्वा सुकृतस्य लोकम् ।
तेन गेष्म सुकृतस्य लोकं स्वरारोहन्तो अभि नाकमुत्तमम् ।।
(अथर्व० ११.१.२३,३७)

अथ च ऋग्वेदेऽपि—'भिनत् कनीन ओदनं पच्यमानं परो गिरा' (ऋ० ८.६९.१४) इति मन्त्रवर्णेन अयमोदनो गिरामगोचरः, तपसा परिपच्यमानः, आवरणभेदनेन च आत्मनि प्रकाशमान इत्येवमुपवर्णितः । सोऽयम् एषु मन्त्रवर्णेषु निरूपितः सर्वोच्च-स्वर्लोक-समारोहण-साधनस्वरूपो ब्रह्मौदनः पञ्चौदनो वा प्रकृतमन्त्रे विवक्षितः, वेदस्य वेदेनैव व्याख्यानस्य न्याय्यत्वात् । तदेवं सुस्पष्टेऽपि ओदनस्य गुह्यस्वरूपे येऽर्वाग्दृश इममोदनम् अन्नब्रह्मपरकतयैव व्याख्यातुमाग्रहग्रहग्रहिलाः तैरपि 'ओदन एवौदनं प्राशीत्' (अथर्व० ११.३.३१) इति मन्त्रवर्णस्य तात्पर्यमिदमपलपितुं नैव पार्यं यद् अन्नेऽपि ब्रह्म साक्षात्कृत्य 'जीवब्रह्मणाऽन्नब्रह्म प्राश्यते' इत्येवंरूप-जीवजगज्जगदीश्वरैक्यानुभवलाभार्थमेव प्रेरयति पुरुषं भगवान् वेदः ।

प्रकृतमन्त्रः सम्भवतः शाक्ततन्त्रस्य वैदिकं मूलम् । तस्य प्रसिद्धपञ्चमकारेषु पञ्चतत्त्वेषु वा मैथुनतत्त्वस्य रहस्यार्थोऽत्र सङ्केतितो गुह्यशैल्या । अदीक्षितेभ्यस्तन्मर्मगोपनार्थमेवात्र 'महानग्नी', 'महा-नग्नम्', 'अनुधावति', 'यभ' इत्यादिकाऽर्थश्लेषमयगूढपदानां प्रयोगो विहितः । अतश्च 'बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति' इति विदद्भिर्विद्वद्भिर्मैथुनार्थकस्य यभेरर्थोऽत्र

मदो मद्यं मतिर्मुद्रा माया मीनं मनः पलम् ।
मूर्च्छनं मैथुनं यस्य तेनासौ शाक्त उच्यते ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति योगाचार्य - श्रीगोरक्षनाथ-विरचित-'सिद्धसिद्धान्तपद्धति'-(षष्ठोपदेशः. श्लोकः ५०)- विहित,-पञ्चमकार'-विवरणप्रमाणाधारतो विधेयो न अल्पश्रुतवद् निरङ्कुशतया। उपर्युपन्यस्तपद्यतात्पर्यानुसारेण सहस्रारे कुण्डलिनी-परमशिवयोः शिवशक्त्योर्वा सङ्गमो मिलनं वा मैथुनम्, यद्वा प्राणापानयोः सङ्गमः कुम्भक एव मैथुनम्। शिवशक्तिमिलनं प्राणापानसङ्गमं च यो महाशक्तये समर्पयति स शाक्त उच्यते। पञ्चमकारेण पूजाऽनुष्ठेया इति सुप्रसिद्धं शाक्तमतम्। तस्यां पञ्चमकार-करणक-पूजायां मैथुनद्वारा पूजाया रहस्यं तावदिदं यत् प्राणापानसङ्गम-शिवशक्तिमिलने संसाध्य महाशक्तये समर्पणीये इति। एतद् रहस्यं च तन्त्रमार्गीय-सिद्ध-गुरुगम्यमेव। तथा चोक्तं कौलाचार्यैः—

आमूलाधारमाब्रह्मरन्ध्रं गत्वा पुनः पुनः।
चिच्चन्द्रकुण्डलीशक्ति-सामरस्य-सुखोदयः॥
पराशक्त्यात्ममिथुन-संयोगाऽऽनन्दनिर्भरः।
य आस्ते मैथुनं तत् स्यादपरे स्त्रीनिसेवकाः॥

(श्रीकुलार्णवतन्त्रम् ५.१०७,११२)

प्रकृतमन्त्रे महानग्न्याः महानग्नानुधावनं 'यभ माम्' इति प्रार्थनञ्च शिवशक्तिमिलन-संसाधनार्थः तन्त्रसाधनानुसारी प्रयास एवेति बोध्यम्।

न च 'कुतो वेदादिसच्छास्त्रेषु ईदृशाऽनर्थकारिसन्दिग्धार्थकपदप्रयोग' इति चोद्यम्, मन्त्रशास्त्रादिरहस्यविद्यासु सन्दिग्धार्थताया गुणत्वात्। पर्यायप्रयोगाः सन्देहोत्पादनाय अर्थश्लेषाय च क्रियन्ते। अनधिकारिभ्यो रहस्यशास्त्रस्य गोपनाय कृता एतादृशप्रयोगा बहुशो दृश्यन्ते शास्त्रग्रन्थेषु। 'सोऽपि रुद्रजपं कुर्यात्' इत्यत्र यजुर्वेदीयरुद्राध्यायस्य जपो न विवक्षितः किन्तु मन्त्री एकादशकृत्वः (रुद्राणामेकादशत्वात्) मन्त्रजपं कुर्यात् इत्येव रहस्यार्थः।

व्याकरणम्

यभ—'यम उपरमे' (भ्वा०प०अ०) इत्यस्माल्लोण्मध्यमपुरुषैकवचने रूपम्। 'गम्यते प्राप्यते ज्ञायते वा इति गभीरः' इत्यत्र गमेर्मकारस्य भकारवत् (उणा० ४.३६) अत्रापि यमेर्मकारस्य भकारः, छन्दसि वर्णव्यत्ययस्य बाहुल्येन दर्शनात्।

औदनम्—ओदन एवौदनस्तम्। स्वार्थिकोऽण्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

**सुदेवस्त्वा महानग्नीर्बबाधते महतः साधु खोदनम् ।
कुसं पीवरो नवत् ॥१२॥**

हे महासाधक ! 'सुदेवः महान् अग्नीः' ज्येष्ठश्रेष्ठब्रह्मस्वरूपो देवादिदेवो महानग्निस्वरूपो भगवान् 'त्वा' त्वां 'बबाधते' पुनः पुनरतिशयेन च बाधते, प्रबलतया प्रेरयति यत् 'महतः साधु खोदनम्' बुद्धेः परतः स्थितस्य महत आत्मनः साधुरीत्या सम्यग् अन्वेषणं कुरु, देहप्राणेन्द्रियमनसामावरणानि विदार्य, गहनगभीरहृद्गुहाया अन्तस्तलं प्रविश्य तत्र संवृतस्यात्मनो निर्भेदनमनावरणं च कुरुष्व सम्पूर्णतया । यतः 'पीवरः' आत्मानुसन्धानसाधनासम्पुष्टसमस्तसत्त्वः साधकसत्तम एव हृद्गुहावर्तिनोऽन्तरतमात्मनः 'कुसम्' आलिङ्गनं, तेन सह घनिष्ठमन्तर्मिलनं वा 'नवत्' अधिगच्छति, प्राप्नोति ।

अपि वा, हे साधकप्रवर ! 'महान् अग्नीः' महान् तत्त्वविदग्रणीः 'सुदेवः' ज्योतिष्मान् श्रेष्ठगुरुदेवः 'त्वा बबाधते' त्वां बलवत्तरं प्रेरयति···अग्रे पूर्ववत् ।

विशेषविवरणम्

सुदेवः—'देवो दानाद्वा दीपनाद् वा द्योतनाद् वा द्युस्थानो भवतीति वा' (निरु० ७.४.१५) इति यास्कोक्तेः ज्ञानज्योतिषा दीप्यमानत्वात् ज्ञानालोकप्रदानाच्च सद्गुरुरपि सुदेव एव । अतोऽत्र देवाधिदेवो भगवांश्च गुरुदेवश्च उभावपि विवक्षितौ वेद्यौ ।

बबाधते—'बाधः' इति बलनामसु पठितं निघण्टौ (२.६.८) । तस्माद् बाधतिरत्र बलवत्तर-विवशीकारक-प्रेरणे बोध्यः । प्रपूर्वकोऽयम् ऋग्वेदे निरुक्ते च to press forward, urge, promote (प्रबलतया पुरतः प्रेरणं, विवशीकरणं पुरतः प्रवर्धनञ्च) इत्यर्थेषु वर्तते इति मोनियर्-विलियम्स्-महोदयाः । यङन्तस्यास्य बाबधे, बद्बधे इति रूपे च ऋग्वेदे 'to press hard', उग्रसम्पीडनेऽर्थे वर्तेते, 'प्रबाधित' इति (ऋ० १०.१०८.६) 'urged on' 'अग्रतः प्रेरित' इत्यर्थे 'प्रबाबधान' इति च 'hastening on before' (तीव्रवेगेन अग्रे सम्प्रेरित) इत्यर्थे वर्तते इत्यपि तन्मतम् । (Sans. Eng. Dict. pp. 683, 727) । दृश्यते चाद्यापि हिन्दीभाषायां बाधते रस्मिन्नर्थे प्रयोगो 'बाध्य'-'बाधित'-शब्दव्यवहारे इति दिक् ।

महतः—'बुद्धेरात्मा महान् परः' (कठोप० १. ३. १०), 'ज्ञानमात्मनि महति नियच्छेत्' (कठोप० १.३.१३), 'सत्त्वादधि महानात्मा' (कठोप० २.३.७) इत्येषु उपनिषत्सन्दर्भेषु सुकीर्तितो महानात्मैव प्रस्तुतमन्त्रे 'महत्'-पदेन सङ्केतितो गूढरीत्या ।

खोदनम्— 'खुड भेदने' (चु० उ० से०) इत्यस्माल्ल्युटि निष्पन्नोऽयं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दः अन्न-प्राण-मनो-विज्ञानमयकोशचतुष्टयावरणभेदनपूर्वकम् आनन्दमय-कोशस्थात्मनोऽनावरणमाह। इदमवदारणपुरस्सरं खननं खोदनं वा 'अगस्त्यः खनमानः खनित्रैः''' सत्या देवेष्वाशिषो जगाम' (ऋ० १.१७९.६) इत्यत्र कीर्तितं हृद्गुहात्रखननमेव, यत्फलं खलु हृद्गुहाया गभीरतमतलेषु अन्तरङ्गतया सोमसुधास्वादनम् आनन्दमयसोमस्वरूपात्मनो रसपानं वा तस्मिन्नेव सूक्ते सङ्कीर्तितम् 'इमं नु सोममन्तितो हृत्सु पीतमुप ब्रुवे' इति मन्त्रवर्णेन (ऋ० १.१७९.५)। इदमेव खोदनं कठोपनिषदि 'तं स्वाच्छरीरात् प्रवृहेन्मुञ्जादिवेषीकां धैर्येण' इति मन्त्रवर्णैरुपवर्णितम् (२.३.१७)।

तदेवम् अस्मिन् 'सुदेवस्त्वा···' इति मन्त्रे साधकस्यान्तःस्था देवी तमुद्बोधयति सततात्मगवेषणया परमात्मना सह घनिष्ठान्तर्मिलनलाभार्थमिति सारसर्वस्वम्।

व्याकरणम्

बबाधते—पुनः पुनर्भृशं वा बाधते इति बाबाध्यते। छान्दसे यङ्लुकि अभ्यासह्रस्वे च बबाधते इति साधु।

खोदनम्—'खुड भेदने' (चु० उ० से०) इत्यतो भावे ल्युटि वर्णव्यत्ययेन डस्य दकारे च रूपम्।

कुसम्—'कुस संश्लेषणे' (दि० प० से०) इत्यतो भावे कप्रत्यये रूपम्। कित्त्वाद् गुणाभावः।

पीवरः—पीवतीति पीवरः। 'पीव स्थौल्ये' (भ्वा० प० से०) इत्यतः औणादिकः 'अर'प्रत्ययो बाहुलकात्, स च चित् (उणा० ३.१३२)।

नवत्—'नवते' इति गतिकर्मा नैघण्टुको धातुः (२.१४.२९), तस्माल्लेट्-प्रथमपुरुषैकवचने रूपम्।

वशा दुग्धामिमाङ्गुरिं प्र सृजते वनं करम्।
महान् वै भद्रो बिल्वो यभ मामद्धयौदनम् ॥१३॥

पूर्वमन्त्रोक्तः सुदेवो ब्रूते—हे साधकाग्रणीः! 'वशा' कामदुहा कामधेनु-कल्पा गौः 'इम' यथा 'आङ्गुरिं दुग्धाम्' अङ्गुरि(लि)प्रमाणां स्थूलां दुग्धधारां 'प्र सृजते' प्रस्रावयति, प्रवाहयति तथैव 'वशा' सर्ववशिनी निखिल-ब्रह्माण्डनियन्त्री महाशक्तिरदितिर्धेनुः 'करं वनम्' सकलसृष्टिजनकम् आनन्दं 'प्र, सृजते' प्रवाहयति साधनचतुष्टयसम्पुष्टाय पीवरसाधकप्रकाण्डाय। हे साधक! त्वयाऽन्विष्यमाणोऽसौ 'महान्' बुद्धेः परस्ताद् वर्तमानो महान् आत्मा 'वै' निश्चयेन 'भद्रः' सकलकल्याणाकरः, समस्तसुखदाता 'बिल्वः' बिल्ववत् परमोपकारकश्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'यभ मा०' इति अन्तिमं चरणं साधकस्य प्रतिवाक्यं व्याख्यातपूर्वम् ।

अस्त्यत्र मन्त्रे किञ्चित् सविशेषं विवरणीयम् । अस्य पूर्वार्धे कीर्तिता वशा अथर्ववेदे सविस्तरं वर्णिता सूक्तद्वये (१०.१०; १२.४) । तस्याः स्वरूप-परिज्ञानं मन्त्रस्यास्य मर्म हृद्गतं कर्तुमावश्यकमिति अत्र तयोः सूक्तयोः कतिपयमन्त्राः समुद्ध्रियन्ते । (अथर्व १०.१०)

यया द्यौर्यया पृथिवी ययापो गुपिता इमाः ।
वशां सहस्रधारां ब्रह्मणाच्छवदामसि ॥४॥
ये देवास्तस्यां प्राणन्ति ते वशां विदुरेकधा ॥५॥
त्रिषु पात्रेषु तं सोममा देव्यहरद्वशा ।
अथर्वा यत्र दीक्षितो बर्हिष्यास्त हिरण्यये ॥१२॥
वशा समुद्रमत्यख्यद् भद्रा ज्योतींषि बिभ्रती ॥१५॥
वशा यज्ञं प्रत्यगृह्णाद् वशा सूर्यमधारयत् ।
वशायामन्तरविशदोदनो ब्रह्मणा सह ॥२५॥
वशामेवामृतमाहुर्वशां मृत्युमुपासते ।
वशेदं सर्वमभवद् देवा मनुष्या असुराः पितर ऋषयः ॥२६॥
वशा द्यौर्वशा पृथिवी वशा विष्णुः प्रजापतिः ।
वशाया दुग्धमपिबन्त्साध्या वसवश्च ये ॥३०॥
वशाया दुग्धं पीत्वा साध्या वसवश्च ये ।
ते वै ब्रध्नस्य विष्टपि पयो अस्या उपासते ॥३१॥
सोममेनामेके दुह्रे घृतमेक उपासते···॥३२॥
वशां देवा उप जीवन्ति वशां मनुष्या उत ।
वशेदं सर्वमभवद्यावत् सूर्यो विपश्यति ॥३४॥
अथर्व० १२.४—
वशा चरन्ती बहुधा देवानां निहितो निधिः ।
आविष्कृणुष्व रूपाणि यदा स्थाम जिघांसति ॥२९॥
तां देवा अमीमांसन्त वशेया३मवशेति ।
तामब्रवीन्नारद एषा वशानां वशतमेति ॥४२॥

विशदा एव प्रायः सर्वेऽपीमे समुद्धृता मन्त्राः । देवासुरमनुष्यऋषि-पितॄणां द्यावापृथिव्यादिलोकलोकान्तराणां च स्रष्ट्री, धात्री पात्री च (१०.१०.२६,३०,४), सूर्यनारायणाधीक्षितासकल-चराचर-सर्जिनी सर्व-भूतात्मभूतात्मा (१०.१०.३४,२६), वसु-साध्यादिदेवेभ्यः स्तन्यपानप्रदा देव-मनुष्योपजीवनस्वरूपा (१०.१०.३०,३१,३४), देवानां निगूढनिधिरूपेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहुधा —बहुभिर्नामरूपैः—विचरन्ती, वशानां वशतमा, 'एको वशी सर्व-'भूतान्तरात्मा' इत्यत्रवर्णित वशि 'परमपुरुषवत् तस्यैव सर्ववशिनी एकाऽद्वितीया परा शक्तिः, अमृतस्वरूपा, 'देवी वशा' (१२.४.२६,४२; १०.१०.२६,१२) ऋग्वेदस्य देवीसूक्ते (१०.१२५) वर्णिता 'विश्वानि भुवनानि आरभमाणा', द्यावापृथिवीं परिव्याप्य स्थिता, वसुरुद्रादिभिः सकलदेवैः सह तद्रूपतया वा विश्वस्मिन्नपि विश्वे विचरन्ती, विश्वविधात्री अदितिमातैवेति किं वक्तव्यम् !

सा चेयं विज्ञानमयकोषमध्यासीनस्य, दीक्षितस्य, देवोन्मुखाऽविचल-चिज्ज्वालस्य, साधनायां सुप्रतिष्ठितस्य, 'अथर्व' विरुदविभूषितस्य साधकस्य (अथर्वणः) देहप्राणमनोरूप-पात्रेषु त्रिष्वपि सोमम्, आनन्दसुधारस-माहरति (१०.१०.१२), तामेव सकलकामपूरिकां, कामदुहां, 'वशा'ऽऽह्वयां कामधेनुमदितिधेनुं वा साधकः सोमं घृतं (घृतसदृशं, स्नेहपूर्णं ज्योतिःस्वरूप-मात्मदर्शनं) च दुग्धे (१०.१०.१२,३२)। सैव 'भद्रा ज्योतींषि बिभ्रती', कल्याण-कारीणि सच्चित्सुखात्मकानि ज्योतींषि धारयन्ती अस्मच्चैतन्यसागरमप्यति-क्रम्य, तत ऊर्ध्वं प्रचाकाश्यते (१०.१०.१५)। तस्याम् एव च अन्तर् आविष्टम् ओदनब्रह्म (१०.१०.२५) यत् प्रकृतमन्त्रे 'मामद्यौदनम्' इति मन्त्रांशेन साधकेन सम्प्रार्थितमास्वादनार्थम् ।

'वशा'सूक्ते यत् तत्त्वं 'सोम'पदेन सङ्केतितं तदेव प्रकृतमन्त्रे 'वनम्' इति गूढतर-प्रतीकेन निर्दिष्टम्, उभयोरपि 'सोम'-'वन'योः गुह्यविद्यासु सच्चिदा-नन्दस्य आनन्दतत्त्ववाचकत्वात् । तथा चोक्तं केनोपनिषदि—'तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं स य एतदेवं वेदाभि हैनं सर्वाणि भूतानि संवाञ्छन्ति' (४.६)। तद् 'वनं' (आनन्दः) च सर्वं करोति जनयतीति हेतोः 'करम्' इति विशेषणेन विशेषितं प्रस्तुतमन्त्रे, 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' (तैत्ति० ३.६) इत्यादिश्रुतिभिः तस्य सर्वजनकत्वकीर्तनात् जन इति नाम्ना च सप्तव्याहृतिषु परिगणितत्वाच्च ।

अथ महत आत्मनो बिल्वत्वकीर्तने हेतुर्विमर्शनीयः । स च बिल्वोपनिषदि सविस्तरं प्रपञ्चितः । अत्र तु 'त्रिमूर्तिरूपं शिवरूपमस्मि', 'त्रिलोचनं निष्कल-मद्वितीयम्', 'त्रिसुपर्णं त्रिऋचां रूपं त्रिसुपर्णं त्रयीमयम्', 'त्रिसुपर्णश्रुतिर्ह्येषा निष्कृतौ त्रिदले रता', 'बिल्वपत्रं विना वस्तु नास्ति किञ्चित्त्वानघ' (बिल्वोप० १३,११,२०,२५,१५) इत्येतैर्वचनैः त्रिपत्रात्मक-बिल्वः 'त्रिमूर्ति-त्रिसुपर्ण'-'त्रयीमय'-ब्रह्मणः प्रत्यक्षप्रतीकं प्रसिद्ध्यति इति विनिर्दिश्य विरम्यते विस्तर-भिया । तस्यात्मनो बिल्ववत् परमोपकारकत्वं तु निर्दिष्टपूर्वम् इति अलमति-प्रपञ्चेन ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वशा—वशयति सर्वमिति वशा । पचाद्यचि स्त्रियां टाप् ।

दुग्धाम्—दुग्धमस्यामस्तीति दुग्धा दुग्धधारा, 'अर्शआदिभ्योऽच्' इति मत्वर्थीयोऽच्, अर्शआदेराकृतिगणत्वात् ।

इम—इव । वस्य मश्छान्दसः ।

आङ्गुरिम्—अङ्गुरिः परिमाणमस्या इति आङ्गुरिः ताम् । अङ्गुरिशब्दात् 'तदस्य परिमाणम्' (पा० ५.१.५७) इत्यर्थेऽण् । इकारलोपस्य अण्णन्तलक्षणङीपश्च अभावश्छान्दसः ।

'तदस्य परिमाणम्' इत्यत्र परिमाणशब्देन परिच्छेदकमात्रं गृह्यते न तु सर्वतो मानमेव, उत्तरसूत्रे संख्याया परिमाणेन विशेषणात् इत्यवधेयम् ।

वनम्—वनितुं सम्भक्तुं, सेवितुं योग्यमिति वा, वन्यते सेव्यते इति वा, वन्यते याच्यते प्रार्थ्यते इति वा वनम् आनन्दः । 'वन षण सम्भक्तौ' (भ्वा० प० से०) इत्यतः, 'वनु याचने' (त० आ० से०) इत्यतो वा औणादिकोऽच् बाहुलकात् ।

करम्—करोति जनयतीति करम् इति वनम् इत्यस्य विशेषणम् । पचाद्यच् ।

विदेवस्त्वा महानग्नीर्विबाधते महतः साधु खोदनम् ।
कुमारिका पिङ्गलिका कार्यं कृत्वा भस्मा प्र धावति ॥१४॥

हे साधकतल्लज ! 'विदेवः' वि इति गतिसंज्ञकमव्ययम् अत्र वैशिष्टय, वैविध्यं, वैचित्र्यं व्यापकत्वं च सूचयति, वैशिष्टय-वैविध्य-वैचित्र्य-व्यापकत्वशाली देवः 'महान् अग्नीः' अग्निस्वरूपः पूर्वमन्त्रोक्तो महान् सुदेवः परमदेवो वा 'त्वा विबाधते' त्वां विशेषेण प्राबल्येन च प्रेरयति—'महतः साधु खोदनं' हृद्गुहाया गभीरतलात् महत आत्मनो निष्कर्षणमुद्धरणञ्च कुरुष्वेति शेषः । एवमुद्बोधितस्य साधकधुरीणस्य 'कुमारिका पिङ्गलिका' कुमारिका नाम इडाख्या नाडी, इडाया मेरुदण्डस्य वामभागे स्थितत्वात् कुमार्याः 'कुमारिकायाः' च पुरुषस्य वामाङ्गत्वस्वीकारात् अत्र 'कुमारिका'पदं वामभागस्थिताम् इडानाडीमाह गूढसाङ्केतिकभाषया । पिङ्गला एव पिङ्गलिका । इडा पिङ्गला च 'कार्यं कृत्वा' परस्परसंयोगपूर्वकं भ्रूमध्ये सुषुम्नया सह सङ्गमसाधनस्वरूपं स्वीयंव्यापारं सम्पाद्य 'भस्मा' अन्तर्ज्योतिषा समुद्भासमाना तया सुषुम्नया सह ब्रह्मरन्ध्रं प्रति 'प्र धावति' प्रवेगेन पुरतः प्रयाति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषविवरणम्

योगसाधनापरकमन्त्राणामेषां सम्यग् बोधार्थं विशेषज्ञातव्यमत्र समासत उपन्यस्यते । योगमार्गसाधकैः इडा-पिङ्गला-सुषुम्णा-कुहू-पूष-यशस्विनी-प्रभृतीनां चतुर्दशयोगनाडीनां ज्ञानं सम्प्राप्य तासां यथाविधि उपयोगो विधेयः सिद्धिलाभार्थम् । तत्रापि इडा-पिङ्गला-सुषुम्णाः(म्नाः) प्राधान्यं भजन्ते । आसां तिसृणामपि मूलं मूलाधारपद्माभिधं योनिस्थानम् । आसु सुषुम्णा मेरुमध्यमध्यासीना आ मूलाधारात् आसहस्रदलकमलं (आसहस्रारचक्रम्) वितता । सैव चेतनाया ज्ञानशक्तेर्वा केन्द्रम् । तामभितश्च अधिष्ठिते इडापिङ्गले । तयोरिडा वामादण्डकोषादुद्भवति पिङ्गला च दक्षिणात् । तस्मान्मूलाद् ऊर्ध्वं प्रयात्योस्तयोर्योनि-लिङ्गमूल-नाभि-हृदय-कण्ठ-भ्रूमध्यदेशेषु सङ्गमो भवति । इमानि षट् सङ्गमस्थानान्येव सुप्रसिद्धानि षड् योगचक्राणि मूलाधार-स्वाधिष्ठान-मणिपूराऽनाहत-विशुद्धाऽऽज्ञाचक्रसंज्ञानि । सर्वाण्यपीमानि मेरुदण्डे (पृष्ठवंशे) सुषुम्णाधिष्ठितानि ।

अस्मद्देहस्थगङ्गा-यमुना-सरस्वती-स्वरूपा इमा इडा-पिङ्गला-सुषुम्णा यस्माद् मूलकन्दाद् योनिस्थानाद् वा उद्गत्य पृथक्तामापद्यन्ते तस्य नाम 'मुक्तत्रिवेणी' इति । यत्र च भ्रूमध्यदेशे आज्ञाचक्रे इमाः सङ्गच्छन्ते तत् खलु 'युक्तत्रिवेणी' - 'त्रिवेणीसङ्गम' - 'शिवनेत्र'-'ज्ञाननेत्र'-प्रभृतिनामभिरभिधीयते । तच्च योगिनस्तीर्थस्थानं यत्र समाहितस्य तस्य विज्ञानोपलब्धिर्जायते ।

योगाभ्यासेन प्रबुद्धायां सुषुम्णायां सूर्यचन्द्रस्वरौ इडापिङ्गलाख्यौ सममेव प्रवर्तेते । उभयोरपि नासारन्ध्रयोर्युगपत् प्रवर्तमानोऽसौ समः श्वासप्रश्वासव्यापारो ब्रह्मस्वरसंज्ञया संज्ञायते । सोऽयं ब्रह्मस्वरः इष्टदेवताध्यानोपासनादिकाऽऽध्यात्मिककार्येभ्योऽत्यन्तमुपकारकः सद्यः फलप्रदश्च । अत एव च उपनिषत्पुराणादिषु सुषुम्नाया महिमा सङ्कीर्तितः सविशेषम्—

शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विश्वङ्ङन्या उत्क्रमणे भवन्ति ॥
(कठोप० २.३.१६; छान्दो० ८.६.६)

इडापिङ्गलयोर्मध्ये सुषुम्ना सूर्यरूपिणी ।
सर्वं प्रतिष्ठितं तस्मिन् . . . . . . ॥
(योगशिखोप० ६.६,१०)

इडापिङ्गलयोर्मध्ये शून्यं चैवानिलं ग्रसेत् ।
................तत्र सत्यं प्रतिष्ठितम् ॥
(शाण्डिल्योप० १.७.४१)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुषुम्ना कालभोक्त्री भवति। (शाण्डिल्योप० १.४.६)

सुषुम्ना तु परे लीना विरजा ब्रह्मरूपिणी। (क्षुरिकोप० १६)

सुषुम्नायां यदा प्राणः स्थिरो भवति धीमताम्।
तदा समरसं भावं यो जानाति स योगवित्॥

(योगशिखोप० ६.३६)

सुषुम्नायां यदा यस्य म्रियते मनसो रयः।...
भिद्यते च तदा ग्रन्थिः...ते यान्ति परमां गतिम्॥

(योगशिखोप० ६.३७)

सुषुम्नायां यदा योगी क्षणार्धमपि तिष्ठति।
भिद्यते च तदा ग्रन्थिश्छिद्यन्ते सर्वसंशयाः॥

(योगशिखोप० ६.३८)

सुषुम्नायां यदा हंसस्त्वध ऊर्ध्वं प्रधावति।...
सुषुम्नायां यदा प्राणं भ्रामयेद्यो निरन्तरम्।
तदा समरसं भावं यो जानाति स योगवित्॥

(योगशिखोप० ६.३५)

सुषुम्नायां सदा गोष्ठीं यः कश्चित् कुरुते नरः।
स मुक्तः सर्वपापेभ्यो निःश्रेयसमवाप्नुयात्॥
सुषुम्नैव परं तीर्थं सुषुम्नैव परो जपः।
सुषुम्नैव परं ध्यानं सुषुम्नैव परा गतिः॥

(योगशिखोप० ६.४४-४५)

वैश्वानरं याति विहायसा गतः सुषुम्नया ब्रह्मपथेन शोचिषा।

(भाग० २.२.२४)

इडापिङ्गलासाहाय्येन सुषुम्नया सङ्गमं सम्पाद्य तज्ज्योतिश्शक्त्यादिभिर्ब्रह्मरन्ध्रप्रवेशार्थं प्रेरितो योगी प्रकृतमन्त्रे भगवता वेदेन, यतो हि—

ब्रह्मरन्ध्रे महास्थाने वर्तते सततं शिवा।
चिच्छक्तिः परमा देवी मध्यमे सुप्रतिष्ठिता।

(योगशिखोप० ६.४७)

भस्मा—बभस्ति दीप्यते इति भस्मा। 'भस भर्त्सनदीप्त्योः' (जु०प०से०) इत्यस्माच्छान्दसाद् धातोः कर्तरि मक् औणादिको बाहुलकात् (द्र० उणा० १.१४५)। तदन्तात् स्त्रियां टाप्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महान् व भद्रो बिल्वो महान् भद्र उदुम्बरः ।
महाँ अभिक्त बाधते महतः साधु खोदनम् ॥१५॥

विवृतचरः प्रथमचरणः । अत्र तु अयं विशेषोऽवधेयः—मन्त्रस्य पूर्वार्ध-मात्मपरमात्मोभयपरकम्, तृतीयचरणे 'महान्' इति पदेन 'महतो महीयसः' परमात्मन एवाभिधीयमानत्वात्, अन्यथाऽर्थानुपपत्तेः, व्याख्यातपूर्वमन्त्रद्वयस्य (२०.१३६.१२,१४) अर्थेन सह प्रकृतमन्त्रस्य अर्थासङ्गतिरूप-जघन्यदोष-प्रसक्तेश्च ।

'महान् वै भद्रो बिल्वः' व्याख्यातोऽयं पाद आत्मपरकतया । परमात्मपक्षे तु 'महान् वै' महतो महीयान् भगवान् ननु 'भद्रः' अनन्तकल्याणगुणगणाकरः परमकल्याणकरश्च, सकलसुखानामुत्सः सम्प्रदाता च 'बिल्वः' त्रिपत्रबिल्ववत् ब्रह्मविष्णुमहेशात्मना त्रिमूर्तिः, बिल्ववत् परमोपकारकश्च प्राणिमात्रस्य ।

अथ द्वितीयचरणः । तत्र 'महान् भद्रः' इति समानम् । उदुम्बरशब्द एव व्याख्यातव्यः । उदुम्बरः उदुम्बलः, रलयोरभेदात् । उदुम्बलश्च उरुबलो विस्तीर्णबल इति सायणः (द्र० ऋ० १०.१४.१२) ।

स महान् आत्मा 'उदुम्बरः' (देहप्राणमनोऽपेक्षया) उरुबलो विस्तीर्णबलः, यद्वा, उदुम्भरः पापात् कृच्छ्राच्च उद्भर्ता उद्धर्ता वर्तते इति शेषः । स महतो महीयान् परमात्मा च 'उदुम्बरः' उरुबलो ब्रह्माण्डव्यापिविशालबलः, पाप-मात्रात् कृच्छ्रमात्राच्च प्राणिमात्रस्य समुद्धर्ता ।

आप्टे-मोनियर्-विलियम्स्-कोषयोः उडुम्बर-उदुम्बरशब्दयोर्येऽर्थाः प्रदत्ता-स्तेषु 'गृहदेहली', 'यज्ञाङ्गम्', 'क्लीबः' इत्यर्था अपि सङ्गता रम्यव्याख्या-सहायाश्च । तथा हि स महान् आत्मा 'उदुम्बरः' भगवद्धाम्नि प्रवेशार्थं देहलीस्वरूपः, आत्मज्ञानस्य परमात्मसाक्षात्कारप्रथमसोपानत्वात् । अथ च स यज्ञाङ्गभूतः मनुष्यजीवनयज्ञे अन्तर्यज्ञे च जीवस्यैव यजमानतया यज्ञस्य प्रधानाङ्गत्वात् । 'अयन्त इध्म आत्मा जातवेदस्०' इत्यादिमन्त्रे—'हे जातवेदः ! अयमात्मा ते इध्मः' इति वचनाद् अन्तर्यज्ञे जीवात्मन इन्धनत्व-(समित्त्व-)-स्वीकारात्, यज्ञेन्धनायमान-यज्ञियतरु-उदुम्बरसाधर्म्यात् आत्मा उदुम्बरवत् यज्ञाङ्गभूतो यज्ञियश्च ।

स 'महतो महीयान्' परमात्मा च 'उदुम्बरः' स्त्री-पुरुषोभयात्मकत्वेऽपि उभयातीतत्वात्, लिङ्गातीतत्वात् 'तत्'-पदाभिधेयत्वाच्च क्लीबः । तथा चोक्त-मथर्ववेदे—

त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी ।
(अथर्व० १०.८.२७, श्वेताश्व० ४.३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वं स्त्री पुमांस्त्वं च कुमार एकस्त्वं वै कुमारी ह्यथ भूस्त्वमेव ।
(एकाक्षरोप० ११)

अपि च—

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ।
तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः ।।

(यजु० ३२.१)

इति प्रसिद्धमन्त्रे ब्रह्म स्त्रीपुंलिङ्गत्वेऽपि लिङ्गातीतत्वेन 'तद्' इति क्लीबलिङ्गेन निर्दिष्टम् ।

एवमेव स विराट्पुरुषः सृष्टियज्ञे देवैः पशुत्वेन बद्धत्वात् (द्र० ऋ० १०.९०.१५) 'उदुम्बरः', अर्थात् यज्ञस्याङ्गभूतः तस्य स्वीयबलिं विना सृष्टियज्ञस्यैवासाध्यत्वात् ।

अथ तृतीयचरणः । 'महाँ अभिक्त बाधते' महतो महीयान्, ज्येष्ठश्रेष्ठब्रह्मस्वरूपः, अभ्यक्तः सर्वगतः, सर्वतो व्याप्तो नानानामरूपैरभिव्यक्तः, प्राकाश्यं प्राप्तः, परमतेजोमयश्च साधकस्य हृद्देशस्थो भगवान् तं प्रेरयति 'महतः' महच्छब्दवाच्यस्य आत्मनः परमात्मनश्च 'साधु खोदनम्' सम्यग् अनुसन्धानमन्वेषणञ्च कुरुष्वेति ।

विशेषविवरणम्

बिल्वः—अस्मिन् मन्त्रे प्रयुक्तस्य बिल्वशब्दस्य लाक्षणिकाः, साङ्केतिकाः प्रतीकात्मकाश्चार्थाः केचन विवृताः पूर्वमन्त्रविवृतौ । अत्र तु महतो महीयसो ज्येष्ठश्रेष्ठब्रह्मणोऽपि बिल्वशब्दस्य लक्ष्यार्थत्वाद् त्रिपत्त्रात्मकबिल्वस्य प्रतीकत्वं ब्रह्मणो ब्रह्मत्वानुरूपं प्रकाशनीयम् ।

'सव्ये दले तिष्ठति पद्मयोनिः श्रियाऽन्वितो दक्षिणपत्त्रगो हरिः ।
श्रिया समेतः शिवयाऽनुषक्तो मध्ये दलेऽहं निवसामि नित्यम् ।।'

(बिल्वोप० ३)

'कालत्रयं च सवनत्रयं लिङ्गत्रयं त्रिपात् तेजस्त्रयमकारोकारमकारप्रणवात्मकम्' (बिल्वोप० २१) इति उपनिषद्वाक्यप्रामाण्यात् बिल्वो ब्रह्मणः त्रिमात्रोङ्कारमयत्वं, ब्रह्मविष्णुमहेशस्वरूपपतेजस्त्रयात्मकत्वम्, कालत्रयात्मकत्वं 'त्रिपादूर्ध्वं उदैत्' पुरुषः (ऋ० १०.९०.४) इत्यत्र कीर्तितं-भुवनोर्ध्ववर्ति-त्रिपाद्रूपत्वं, तुरीयपादं परात्परत्वं वा प्रतिरूपयति । 'वेदान्तवेद्यं शिवमप्रमेयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वच्छं निराकारमसङ्गमद्भुतम् ।' 'निरामयं शान्तमुमासहायम्', 'पुरा जगन्मातृतपःप्रभावादासीन्महाबिल्ववनस्पतिर्महान्' (बिल्वोप० १०,११,२) इति वचनानुसारेण च निखिलरोगहारिबिल्ववत् भवरोगनिर्मूलनपूर्वकं निजाऽनामयपदप्रदत्वं, भुवनाम्बिका-तपःप्रभाव-प्रादुर्भूत-बिल्ववच्च साधकस्य तपःप्रभावेणैव ब्रह्मणः तस्य हृदये जायमानत्वं, तदीयसाधनाया उत्तरोत्तरविकासेन च तदन्तर्विशालविकसित-वनस्पतिस्वरूपधरत्वं सूचयति ।

उदुम्बरः —१. 'उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः' (अ०को० २.२२) इत्यस्य टीकायां भट्टक्षीरस्वामिपादा आहुः—'उल्लङ्घिताम्बर उदुम्बरः'। अमर० २.६७तमश्लोकस्य व्याख्यायां च आचक्षते—'उदुम्बरम् उद्गताम्बरम् इति नैरुक्ताः'। ब्रह्मणोऽम्बरस्यापि परस्ताद् वर्तमानत्वाद् उल्लङ्घिताम्बरत्वम् अनन्तत्वं च 'व्योमा परो यत्', 'यो अस्याध्यक्षः परमे व्योमन्' (ऋ० १०.१२९.१,७), 'परो दिवा पर एना पृथिव्या' (ऋ० १०. १२५.८), 'यो अस्य पारे रजसः' (ऋ० १०.१८७.५; अथर्व० ६.३४.५), 'रजस इन्द्र पारे' (ऋ० १.३३.७), 'इन्द्राविष्णू अपसस्पारे अस्य' (ऋ० ६. ६९.१), 'या सिस्रतू रजसः पारे अध्वनः' (ऋ० ८.५९.२), 'यो अस्य पारे रजसो विवेष' (ऋ० १०.२७.७), 'दूरे पारे रजसो रोचनाकरम्' (ऋ० १०. ४९.६), 'त्वमस्य पारे रजसो व्योमनः' (ऋ० १.५२.१२) इत्यादिभिर्मन्त्रवर्णैः शतशः समाम्नातम् ।

२. वेदे 'उदुम्बल'शब्द उरुबलो विशालबलः, महाशक्तिशालीत्यस्मिन्नर्थे प्रयुक्तो लक्ष्यते (द्र० ऋ० १०.१४.१२; अथर्व० ८.६.१७; १८.२.१३)। रलयोरभेदात् 'उदुम्बर'शब्दस्याप्ययमर्थो बोध्यः (द्र० सायणभाष्यम्—ऋ० १०.१४.१२)।

३. शतपथकारास्तावत् पदमिदम् इत्थं व्याचचक्षिरे— 'अयं वाव मा सर्वस्मात् पाप्मन उदभार्षीदिति यदब्रवीदुदभार्षीन्मेति तस्मादुदुम्भरः । उदुम्भरो ह वै तमुदुम्बर इत्याचक्षते परोक्षं, परोक्षकामा हि देवाः' (७.५.१.२२) । 'अथ या सोर्क्, एष स उदुम्बरः' (७.५.१.२१) ।

अस्य वचनद्वयस्य भाष्ये सायणाचार्या आहुः—" 'सर्वस्मात् पाप्मनः' कृच्छ्रान्माम् 'अयम्' हि 'उदभार्षीद्' उद्धृतवान् 'इति' 'सः' प्रजापतिः 'अब्रवीत्' । कृच्छ्राद्धरणं चास्यान्नप्राणयोरवरोधकत्वात् । अतश्चोदभार्षीन्मामिति 'यदब्रवीत्' 'तस्माद्' ऊर्क् 'उदुम्भरोऽभूत्' । अत एवमुक्तत्वादयम् 'उदुम्भरः', तमेव देवाः 'उदुम्बरः' इति 'परोक्षम् आचक्षते' । पारोक्ष्येणाभिधानं गौरवाय कल्प्यत

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति देवानां परोक्षकामत्वम् ।...उदुम्बरस्योर्गात्मकत्वादुलूखलस्य चौदुम्बरत्वादुरुकरणं पाप्मन उदभार्षीद् इत्युक्तं च सम्पद्यते । उदुम्बरोलूखलशब्दौ पृषोदरादित्वाद् भरतेः करोतेश्च व्युत्पादनीयौ ।"

" 'अथ या सा ऊर्क्' 'स एष उदुम्बरः' उदुम्बरस्य बलकररसत्वादूर्गात्मकत्वम् ।"

व्याकरणम्

उदुम्बरः —१. उल्लङ्घितमम्बरं येन सः उदम्बरः । स एव च उदुम्बरः । पृषोदरादिवद् वर्णव्यत्ययेन अकारस्योकारः । २. उद्भरतीति उदुम्भरः । उदुपसृष्टाद् भरतेः संज्ञायां 'भृ-तॄ-वृ०' (पा० ३.२.४६) इत्यनेन खच् । मुमागमः । पृषोदरादित्वाद् उकारागमः । ३. उरुबल एव उदुम्बरः इति नैरुक्ताः । पृषोदरादिवद् रूपसिद्धिरास्थेया ।

अभिक्त —अभिपूर्वाद् 'अञ्जू व्यक्ति-म्रक्षण-कान्ति-गतिषु' (रु०प०वे०) इत्यस्मात् निष्ठायां नकारलोपे, कुत्वे च धातोरकारलोपश्छान्दसः । 'यस्य विभाषा' (पा० ७.२.१५) इति इण्निषेधः । अनक्तिरत्र व्यक्तौ (अभिव्यक्तौ), कान्तौ (दीप्तौ) गतौ च व्याख्यातोऽस्माभिरित्यवधेयं सुधीभिः ।

'अभिक्त' इति प्रातिपदिकात् प्रथमैकवचने 'सुपां सुलुक्०' इत्यादिना सोर्लुक् ।

यः कुमारी पिङ्गलिका वसन्तं पीवरी लभेत् ।
तैलकुण्डमिमाङ्गुष्ठं रोदन्तं शुदमुद्धरेत् ॥१६॥

'यः' यः कोऽपि साधकोत्तमः 'पीवरी कुमारी पिङ्गलिका' लुप्तविभक्तिः प्रयोगः, सततसाधनाऽभ्यास-साधित-सुषुम्ना-सङ्गमेन सम्पुष्टया इडया पिङ्गलया च 'वसन्तं प्रकाशमानं ब्रह्मरन्ध्रं, शिव-शक्ति-सङ्गमस्थलं विज्ञानमयज्योतिर्मण्डलं सहस्रदलकमलं वा 'लभेत्' प्राप्नोति प्राप्नुयाद् वा सः, यत्तदोर्नित्यसम्बन्धात् 'सः' इति पदमाक्षिप्यते, 'तैलकुण्डम् इम' स्निग्धद्रवकुण्डमिव, तत्तुल्यमिति यावत्, गुह्यभाषाऽर्थानुसारेण घृतकुण्डोपमम् अमृतकलशप्रतिमं वा 'रोदन्तं' उद्धारार्थम् आक्रोशन्तं, शुनःशेपवत् बन्धमोक्षार्थं सार्तस्वरमाह्वयन्तं वा 'शुदम्' शुद्धं, नित्यशुद्ध-बुद्ध-मुक्त-स्वभावं ज्ञानप्रदञ्च 'आङ्गुष्ठम्' अङ्गुष्ठप्रमाणं हृत्पुरुषं, नवजातशिशुमिव क्रन्दन्तं चैत्यशिशुं, प्रत्यगात्मानम् 'उद्धरेत्' उद्धरति देहप्राणमनोबन्धनेभ्यः, उद्धर्तुं प्रभवति वा इति सामान्यविध्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषविवरणम्

'यः आङ्गुष्ठम् उद्धरेत्' इति पदत्रयं मन्त्रगूढार्थसङ्केतकम्, तात्पर्यनिर्णय-सहायकञ्च ।

वसन्तः —वसति विवासयति तमः इति वा, उच्छति दीप्यते इति वा वसन्तः प्रकाशमानं ब्रह्मरन्ध्रं ज्योतिर्मयं सहस्रारचक्रं वा ।

१. वेदे वसतिर्विवासनार्थो व्युच्छनार्थको वा वीक्ष्यते बहुधा व्यवहृतः । तथा हि 'वसव आदित्यरश्मयो विवासनात् तस्माद् द्युस्थानाः' (निरु० १२. ४.४१) । तत्र 'विवासनात् दूरीकरणात् तमसाम्' इत्याहुर्निरुक्त-विवृतिकाराः ।

२. ऋग्वेदस्य १.११३तम-उषःसूक्तस्य दशममन्त्रव्याख्यायां 'व्यूषुः'-शब्दं व्युत्पादयन्तः श्रीसायणाचार्या आचक्षते—'विपूर्वो वसतिर्व्युच्छने वर्तते। लिटचुसि कित्वे यजादित्वात् सम्प्रसारणं द्विर्वचनादि ।'

१.११३.७मन्त्रस्य 'शुक्रवासाः' इति पदं व्याचक्षाणास्ते आहुः—'शुक्र-वासाः श्वेतवसना निर्मलदीप्तिर्वा···वस आच्छादने । वस्ते सर्वमाच्छादयतीति प्रकाशो वासः ।'

३. 'वस्तोः', 'वासरम्' इति अहर्नामसु पठिते निघण्टौ (१.६.१,४) । तद्व्याख्यायां स्कन्दस्वामिनः प्राहुः—'वस्ते ज्योतिरिति वस्तोः' (श्रीदेवराज-यज्वकृतनिघण्टुटीका, पृ० ७२-७३) । इदमेव पदद्वयं देवराजयज्वान एवं निर्ब्रुवन्ति —'वस्ते (अ०आ० से०) आच्छादयतीति वस्तो ज्योतिः ।···वास्यते ('वासृ दीप्तौ' दि०आ०से०)···दीप्यते इति वासरम्' (निघण्टु-टीका, पृ० ७३-७४) ।

४. 'वस्' इति 'उष दाहे' (भ्वा०प०से०) इति धातुना सम्बद्धो वैदिको धातुर्दीप्त्यर्थकः तुदादिगणीय इति मोनियर्-विलियम्स्कोषकाराः । उच्छति, उवास, ऊषुः, अवस्रन्, वस्तवे, वासयति, इति वेदे प्रयुक्तानि पदानि अस्य दीप्त्यर्थकस्य वसतेरेव रूपाणीति तन्मतम् (द्र० तदीयकोषः, पृ० ६३०) । 'उषर्हाँ' इत्यर्थके 'वसर्हाँ' (ऋ० १.१२२.३) इति पदे 'वसर्' शब्दोऽपि अस्मा-देव धातोर्व्युत्पन्न इत्यपि त एवाहुः ।

उपर्युक्तं प्रमाणचतुष्टयं वसन्त'शब्दस्य प्रकाशमानब्रह्मरन्ध्रवाचकत्वं ब्रह्मरन्ध्रगत-ज्योतिर्मयसहस्रारचक्रवाचकत्वं वा उपपादयितुमलम् ।

तैलकुण्डम्—तिलोद्भवस्निग्धद्रवविशेषवाचकोऽपि तैलशब्दो यथा सम्प्रति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्नेह-(स्निग्धता-)सामान्यात् बीजफलाद्युद्भवं स्निग्धद्रवमात्रं सूचयति तथैव नितान्तगोपनीयरहस्यविद्यासु अयं स्निग्धपदार्थानां स्निग्धतमं घृतम् अमृतञ्चापि सङ्केतयितुं क्षमः। घृतञ्च गूढसाङ्केतिकभाषायां घृतवत्स्नेहपूर्णं ज्योतिस्स्वरूपमात्मदर्शनं द्योतयतीति वेद्यम्। परोक्षप्रिया वै देवाः घृताऽमृते अपि 'तैल'पदेन आचक्षते परोक्षेण, अदीक्षिता अनधिकारिण एते उपलभ्य वित्तैषणा-लोकैषणापूर्तये एतयोर्दुरुपयोगं न कुर्युरिति। अभिधावृत्त्याऽभिहितानि इमानि गूढातिगूढसत्यानि आसुरवृत्तिभिः संसारिभिरपि घोरतपसा साधितानि हीनतमोद्देश्यार्थं प्रयुज्यन्ते इति न कस्य विदितं वेदितव्यविदो विपश्चितः। साधनया संलब्धऋद्धिसिद्धिसमृद्धयोऽपि पुमांसः सांसारिकसुखभोगवासनाविचलितचेतसः, कीर्ति-कामिनी-काञ्चन-कामना-कलुषितान्तःकरणाः स्वीयाणिमाद्यैश्वर्यमपि एषणात्रयतृप्तये प्रयुञ्जन्तः न केवलं स्वयं निस्तलगर्ते निपतन्ति, निपातयन्ति स्वान् अन्धानुयायिनोऽपि। अतो गुह्यज्ञानं नानार्थकपदैरुपनिबद्धमनधिकारिभ्यो बाह्यं स्थूलार्थमेव समर्पयति, दीक्षितेभ्यस्तपःपूतसदधिकारिसाधकेभ्य एव च सत्यार्थं सम्प्रकाशयति सद्गुरुवदनारविन्दविनिस्सृतवाक्प्रसादात् इत्यलमतिप्रपञ्चेन विपश्चिद्वरेषु।

आङ्गुष्ठम्—अङ्गुष्ठः परिमाणमस्येति तम् आङ्गुष्ठम् अङ्गुष्ठमात्रं पुरुषम्।

अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः। (कठोप० ४.१३)

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति। (कठोप० ४.१२)

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः।
(कठोप० ६.१७, श्वेता० ३.१३)

अङ्गुष्ठमात्रो रवितुल्यरूपः सङ्कल्पाहङ्कारसमन्वितो यः।
(श्वेताश्व० ५.८)

अङ्गुष्ठमात्रमात्मानं सधूमज्योतिरूपकम्।
प्रकाशयन्तमात्मानं ध्यायेत् कूटस्थमव्ययम्॥
(पैङ्गलोप० ३.५, योगकुण्डल्युप० ३.२६)

अङ्गुष्ठमात्रः पुरुषोऽन्तर्लक्ष्यमित्येके। (मण्डलब्राह्मणोप० १.५)

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः। (महानारायणोप० १६.५)

इत्यादिभिरुपनिषन्मन्त्रवर्णैरुपवर्णितो हृत्पुरुषोऽन्तरात्मा चैत्यपुरुषो वा प्रकृतमन्त्रे विवक्षित आङ्गुष्ठशब्देन।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोदन्तम्—'त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ विवेश' (ऋ० ४.५८.३) इत्यत्र यस्त्रिधा बद्धः—देहे, प्राणे मनसि च निगडितः, पौनः-पुन्येन अतिशयेन च रुवन्, तारस्वरेण क्रन्दन्, मर्त्येष्वन्तःप्रविष्टः पुरुषो वर्णितः स एवात्र रोदन् 'रोदन्तम्' इति पदेन सङ्केतितः।

'शुनःशेपो यमह्वद् गृभीतः सो अस्मान् राजा वरुणो मुमोक्तु।'
'शुनःशेपो ह्यह्वद् गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः।
अवैनं राजा वरुणः ससृज्याद् विद्वाँ अदब्धो वि मुमोक्तु पाशान्॥'
(ऋ० १.२४.१२,१३)

इति मन्त्रद्वये बद्धस्य मानवात्मनः प्रतिनिधिः शुनःशेपो देहप्राणमनोरूप-रज्जुत्रयेण बद्धो मोक्षणार्थं राजानं वरुणमावाहयामास इति कीर्तितम्। तस्यैव शुनःशेपस्य त्रिवृद्बन्धननिगडितस्य जीवस्य मोक्षविधिः समुदीरितः प्रस्तुत-मन्त्रे।

इदं कुत्सो वृत्रहणं शचीपतिं काटे निबाळ्ह ऋषिरह्वदूतये।
(ऋ० १.१०६.६)

इत्यत्र काटे संसारस्य अगाधकूपे निबाळ्हः निपातितः कुत्सः मानवजीवः ऊतये परित्राणार्थम् इन्द्रदेवम् आह्वयत् सार्तनादम् इति प्रोक्तं लोकोत्तरकाव्यगिरा। भवार्णवे निमज्जतो मृत्युसंसारसागरात् समुद्धारं प्रार्थयतः प्रत्यगात्मनोऽप-वर्गोपायः परिकीर्तितोऽस्मिन् प्रकृतमन्त्रे।

शुदम्—चतुर्वेदभाष्यकारैः श्रीजयदेवविद्यालङ्कारैः अस्य पदस्य 'शुद्धम्' इति पाठभेद उपन्यस्तः स्वीयभाष्ये। अस्माभिः 'शुदम्' शुद्धम्', इत्युभयोरपि पाठयोरर्थसङ्गतिरत्र प्रदर्शिता। 'शुदम्' इत्यस्य व्युत्पत्तिस्तु व्याकरणभागेऽव-लोकनीया।

उद्धरेत्—अनेन क्रियापदेन सूचितस्य आत्मोद्धारस्य करणं तावद् इडा पिङ्गला च। तयोः करणत्वं जीवोद्धारसाधनत्वं वा उपनिषत्सु सविस्तरं सङ्कीर्तितम् अत्र संक्षेपाद् उदाह्रियते।

इडया बाह्याद् वायुमापूर्य षोडशमात्राभिरकारं चिन्तयन् पूरितं वायुं चतुःषष्टिमात्राभिः कुम्भयित्वोकारं ध्यायन् पूरितं पिङ्गलया द्वात्रिंशन्मात्रया मकारमूर्तिध्यानेनैवं क्रमेण पुनः पुनः कुर्यात्। अथासनदृढो योगी वशी मित-हिताशनः सुषुम्नानाडीस्थमलशोषार्थं बद्धपद्मासनो वायुं चन्द्रेणापूर्य यथाशक्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुम्भयित्वा सूर्येण रेचयित्वा पुनः सूर्येणापूर्य कुम्भयित्वा चन्द्रेण विरेच्य यया त्यजेत्तया सम्पूर्य धारयेत्। तदेते श्लोका भवन्ति—

प्राणं प्रागिडया पिबेन्नियमितं भूयोऽन्यया रेचयेत्
पीत्वा पिङ्गलया समीरणमथो बद्ध्वा त्यजेद् वामया।
सूर्याचन्द्रमसोरनेन विधिनाऽभ्यासं सदा तन्वतां
शुद्धा नाडिगणा भवन्ति यमिनां मासत्रयादूर्ध्वतः ॥
(शाण्डिल्योप० १.६.१)

ततः परिचयावस्था जायतेऽभ्यासयोगतः।
वायुः परिचितो यत्नादग्निना सह कुण्डलीम् ॥
भावयित्वा सुषुम्नायां प्रविशेदनिरोधतः।
वायुना सह चित्तं च प्रविशेच्च महापथम् ॥
यस्य चित्तं स्वपवनं सुषुम्नां प्रविशेदिह।
धारयेत् पञ्च घटिकाः पृथिवीजयमाप्नुयात्।
पृथिवीयोगतो मृत्युर्न भवेदस्य योगिनः ॥
(योगतत्त्वोप० ८१-८३, ८६-८७)

मुखेनाच्छाद्य तद्द्वारं[1] प्रसुप्ता परमेश्वरी।
प्रबुद्धा वह्नियोगेन मनसा मरुता सह ॥
सूचिवद् गुणमादाय व्रजत्यूर्ध्वं सुषुम्नया।
उद्घाटयेत्कपाटं तु यथा कुञ्चिकया हठात्।
कुण्डलिन्या तया योगी मोक्षद्वारं विभेदयेत् ॥
(ध्यानबिन्दूप० ६६-६८)

व्याकरणम्

वसन्तम्—वसति विवासयति तम इति वसन्तः। वसतेर्वैदिकाद् दीप्त्यर्थाद् धातोः 'तॄ-भू-वहि-वसि-भासि०' (उणा० ३.१२८) इत्यतो झच् प्रत्ययः। झोऽन्तादेशः।

आङ्गुष्ठम्—अङ्गुष्ठः परिमाणमस्येत्यर्थे 'अङ्गुष्ठ'शब्दात् अण् प्रत्ययः (द्र० पा० ५.१.५७)। 'तद्धितेष्वचामादेः' (पा० ७.३.११७) इत्यनेन आद्यचो वृद्धिः। द्वितीयैकवचनम्।

---

१. 'ब्रह्मस्थानं निरामयं' ब्रह्मरन्ध्रं वा इति पूर्वश्लोकोक्तं द्वारम्।
(द्र० श्लो० ६५)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुदम् —'शुन गतौ' (गतेस्त्रयोऽर्थाः—ज्ञानं, गमनं प्राप्तिश्चेति । अत्राय ज्ञानार्थको बोध्यः) (तु० प० से०) । शुन्यते ज्ञायते इति शु ज्ञानम् । शुनतेः औणादिके डुन्प्रत्यये (उणा० ५.२६), टिलोपे 'शु' इति प्रातिपदिकं भवति ज्ञानार्थकम् । शु ज्ञानं ददातीति शुदस्तम् । कप्रत्ययः । द्वितीयैकवचनम् ।

यद्वा शुदम् शुद्धम् । धकारलोपश्छान्दसः ।

इति शम्

शिवमस्तु । शुभमस्तु ॥

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

12010

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

D 04052

GURUKUL KANGRI LIBRARY

12
28-9-84

गुरुकुल 04051

ARCHIVES DATA BASE
2011 - 12

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

D01059

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar